मध्यमोदीच्यवायास्तु नन्दयन्त्यास्तथैव च ।
तथा गान्धारपञ्चम्याः पञ्चमोऽंशो ग्रहः [1]स्मृतः ॥ ८० ॥
धैवत्याश्च तथैवांशौ विज्ञेयौ धैवतर्षभौ ।
पञ्चम्यास्तु ग्रहावंशौ भवतः पञ्चमर्षभौ ॥ ८१ ॥

74 (C. 70 ; K. 74) [1]KC. न्यासोपन्यास but K. 115 and C. 100 have ह्यपन्यासा 75 (C. 71 ; K. 75) [1]K. ग्रहास्तु. [2]एव हि कीर्तितः. [3]KC. यत्प्रवृत्तं. [4]K. भवेदंशः 76 (C. 72 ab ; K. 76a) [1]K. रागश्च यस्मिन् वसति. [2]K. om. this hem. See Kalli. on SR. I. 7. 29-34. K. नेता for C तेन. 77 (C. 72c-73a ; K. 76b-77a) [1]C मन्द्रश्च तारविषया, [2]C. स्वरसंयोगी 78 (C. 73b-74 ; K. 77b-78) [1]C. ग्रहोपन्यास विन्यास्याभ्यास [2]K. परिचार्य, Kalli. on S R. I. 7. 32-34 reads this hem. as अनुवृत्तश्च यश्चेह etc. 79 (C. 75 ; K. 86) [1]K. अंशग्रहानिदानीं व्याख्यास्यामः. 80. (C. 76 ; K. 87) [1]K. स्मृतः for तथा. 81 (C. 77 ; K. 88 ab)

गान्धारोदीच्यवायास्तु ग्रहांशौ षड्जमध्यमौ ।
आर्षभ्याश्च [1]तथैवांशा निषादर्षभधैवताः ॥ ८२ ॥
[1]नैषादिन्या निषादस्तु गान्धारश्चर्षभस्तथा ।
अंशाश्च षड्जकैशिक्याः षड्जगान्धारपञ्चमाः ॥ ८३ ॥
तिसृणामपि जातीनां ग्रहास्त्वंशाश्च कीर्तिताः ।
षड्जश्च मध्यमश्चैव निषादो धैवतस्तथा ॥ ८४ ॥
[1]अंशग्रहास्तु चत्वारः षड्जोदीच्यवतीश्रिताः ।
[2]पञ्चमश्चर्षभश्चैव निषादो धैवतस्तथा ॥ ८५ ॥
[1]कर्मारव्यास्तथैवांशाश्चत्वारः सम्प्रकीर्तिताः ।
गान्धारश्चर्षभश्चैव निषादः पञ्चमस्तथा ॥ ८६ ॥
[1]चत्वारोऽंशा भवन्त्यान्ध्र्या ग्रहाश्चैते तथैवहि ।
ऋषभश्चैव षड्जश्च मध्यमः पञ्चमस्तथा ॥ ८७ ॥
[1]मध्यमाया ग्रहास्त्वंशा धैवतश्च प्रकीर्तितः ।
षड्जाया षड्जगान्धारौ मध्यमः पञ्चमस्तथा ॥ ८८ ॥
[1]धैवतश्चापि विज्ञेया ग्रहाश्चांशां प्रकीर्तिताः ।
[2]निषादर्षभगान्धारा मध्यमः पञ्चमस्तथा ॥ ८९ ॥
गान्धारी रक्तगान्धार्योर्ग्रहांशाः परिकीर्तिताः ।
[1]वर्जितर्षभयोगास्तु कैशिक्यांशा षडेव तु ॥ ९० ॥
[1]स्वरा सर्वे च विज्ञेया षड्जमध्यांशजा ग्रहाः ।
एवं त्रिषष्टिर्विज्ञेया ग्रहाश्चांशाश्च जातिषु ॥ ९१ ॥

82 (C. 78 ; K. 88c-89a) [1]K. तु निषादस्तु तथा चर्षभ धैवतौ for तथैवांशा etc. 83 (C. 79 ; K. 89b-90a). [1]K. निषाद्यां च निषादस्तु गान्धारश्चर्षभस्तथा । तथा च षड्जकैशिक्यां षड्जगान्धारपञ्चमाः ॥ 84 (C. 80 ; K. 90b-91a) 85 (C. 81 ; K. 91b-92a) [1]K. reads this hem. as षड्जोदीच्यवती जातेर्ग्रहास्त्वंशाश्च कीर्तिताः. [2]K. पञ्चमेनर्षभश्चैव 86 (C. 82 ; K. 92b-93a) [1]K. reads this as कर्मारव्या बुधैरंशा ग्रहाश्च परिकीर्तिताः । गान्धारश्चर्षभश्चैव पञ्चमोऽथ निषादवान्. 87 (C. 83a ; K. 93b-94a) [1]C. om. this hem. 88 (C. 83b-84a ; K. 94b, 96a) [1]K. reads this as मध्यमाया ग्रहा ज्ञेया अंशाश्चैव सधैवताः । निषादषड्जगान्धारा मध्यमः पञ्चमस्तथा ॥ 89 (C. 84b-85a ; K. 96b, 95a) [1]C. धैवतस्यापि [2]K. निषादषड्जगान्धाराः 90 (C. 85b-86a ; K. 95b, 97a) [1]K. reads this hem. as कैशिक्यां चर्षभहीना ग्रहांशा षट्स्वराः स्मृताः 91 (C. 86b-87a ; K. 97b-98a) [1]K. सर्वस्वरा ग्रहांशाश्च विज्ञेयाः षड्जमध्यमाः.

[1]अंशवच्च ग्रहास्तासां सर्वासामेव नित्यशः ।
सर्वासामेव जातीनां त्रिजातिस्तु [2]गणः स्मृतः ॥ ९२ ॥
सर्वथा चैव विज्ञेया [1]वर्धमानस्वरास्तथा ॥
एकस्वरो द्विस्वरश्च त्रिस्वरोऽथ चतुःस्वरः ।
पञ्चस्वरो षट्स्वरश्च तथा सप्तस्वरोऽपि वा[2] ॥ ९३ ॥

[3]अथ पञ्चस्वरपरा [4]तारगतिः ।

अंशात्तारगतिं विद्याद् आ चतुर्थस्वरादिह ।
[1]पञ्चमं त्वथवा गच्छेत्ततोऽंशविहितं त्विह ।
आ पञ्चमात् [2]सप्तमाद् वा नातः परमिहेष्यते ॥ ९४ ॥

त्रिविधा मन्द्रगति :—अंशपरा न्यासपरा[3] अपन्यासपरा चेति ।

[1]मन्द्रस्त्वंशात् परो नास्ति न्यासे तु द्वौ व्यवस्थितौ ।
[2]गान्धारे च ग्रहे न्यासे [3]दृष्टमार्षभधैवतम् ॥ ९५ ॥

द्विविधमल्पत्वं लङ्घनाद् अनभ्यासाच्च । [4]तत्र [5]षाडवौडवितकरणत्वम् [6]अंशानां गीतानाम् आन्तरमार्गम् उपगतानां स्वराणां लङ्घनात् । अनभ्यासाच्च सकृदुच्चारणं यथाजातिः । तद्वत् बहुत्वम् अल्पत्वविपर्ययाद् [7]द्विविधमेवान्येषामपि बलिनां सञ्चारः ।

[1]अल्पत्वं च बहुत्वं च [2]तथा पूर्वविनिश्चयात् ।
जातिस्वरैश्च नित्यं स्यात् [3]जात्यल्पत्वं द्विधा च तत् ॥ ९६ ॥

92 (C. 87b-88a ; K. 98b-99a) [1]C. चांशवच्च ग्रहास्तासां K. ग्रहास्तासां. [2]K. गणाः स्मृताः, C गुणः स्मृतः　93 (C. 88b-89 ; K· 99b-100) [1]K. वर्धमानस्वरा यथा. [2]K adds after this, 11 couplets (101-113) which seem to be spurious. [3]K. om. अथ. [4]C. adds कण्ठ्यांशात् after स्वरपरा.　94 (C. 92b-93 ; K. 78 prose 79) [1]K. om. this hem. [2]Kalli. on SR.I. 7. 35-36 reads सप्तमाद्, Matanga. p. 58 so, but CK पञ्चमाद्. [3]C. adds चेति after न्यासपरा　95 (C. 94 89 prose ; K. 79 prose-80 81 prose) [1]C मन्द्रो ह्यंशपरा, K. मन्द्र-स्त्वंशपरो but Kalli. (SR.I.7. 37-38) reads मन्द्रस्त्वंशात् परो [2]K. गान्धारे न्यासलिंगेन, Kalli. (*loc. cit.*) गान्धार न्यासलिंगेन. [3]K. ऋषभ धैवतम्, Kalli. (*loc. cit.*) ऋषभ सेवनम्. [4]C om. तत्र. [5]C. puts गीतानाम् आन्तरमार्गम् before षाडवौ० [6]C. अंशानां गीतानामान्तरमार्गम्. उपगतानां स्वराणां. [7]C. द्विविधमेषामन्येषामपि.　96 (C. 90 ; K. 82) [1]K. अल्पत्वे च बहुत्वे च. [2]C. यथापूर्वं विनिश्चयात्. [3]C. जात्यल्पत्वं विधानतः.

सञ्चारोऽंश बलस्थानामल्पत्वं दुर्बलेषु च ।
[1]द्विविधोऽन्तरमार्गस्तु जातीनां व्यक्तिकारकः ॥ ९७ ॥

[2]षट्स्वरं षाडवितं चतुर्दशविधं सप्तचत्वारिंशत्प्रकारम् । पूर्वोक्तविधानं यथा जात्यंशप्रकारैरिति ।

पञ्चस्वरमौडवितं विज्ञेयं दशविधं प्रयोगज्ञैः ।
त्रिंशत्प्रकारविहितं पूर्वोक्तं लक्षणं [1]चास्य ॥ ९८ ॥
षट्स्वरस्य [1]प्रयोगोऽस्ति तथा पञ्चस्वरस्य च ।
[2]चतुःस्वरप्रयोगोऽस्ति ह्यवकृष्ट ध्रुवास्वथ ॥ ९९ ॥

अथ न्यासः— [3]अंशसमाप्तौ स चैकविंशतिविधः । [4]तद्वदपन्यासोऽपि अंशमध्ये षट्पञ्चाशत्संख्यः ।

[1]न्यासो ह्यं[श]समाप्तौ स चैकविंशतिविधो विधातव्यः ।
षट्पञ्चाशत्संख्योऽ[श]मध्येऽपन्यास एव स्यात् ॥ १०० ॥
एवमुक्तमिदं सम्यग् जातीनां लक्षणं मया ।
अत ऊर्ध्वं प्रवक्ष्यामि [2]न्यासोपन्यासकल्पनम् ॥ १०१ ॥
अंशा स्युः पञ्च षड्जाया निषादर्षभवर्जिताः ।
[1]अपन्यासो भवेदत्र गान्धारः पञ्चमस्तथा ॥ १०२ ॥
[1]न्यासश्चात्र भवेत् षड्जो लोप्यः सप्तम एव तु ।
षाडवं [2]सप्तमापेतम् अल्पौ वै सप्तमर्षभौ ॥ १०३ ॥
षड्जगान्धारसञ्चारस्तथा धैवतषड्जयोः ।
गान्धारस्य [1]च बाहुल्यं त्वत्र कार्यं प्रयोक्तृभिः ॥ १०४ ॥

97 (C. 91 ; K. 83) [1]C. विविधी for द्विविधी. [2]C. om. this prose passage. 98 (C. 94 *ka* ; K. 84) [1]K. त्वस्य.　99 (C. 95 ; K. 85, 80 prose) [1]C. प्रयोगोऽयं ; [2]C. चतुःस्वरप्रयोगोऽपि देशापेच प्रयुज्यते. [3]K. अंगसमाप्तौ K. reads this after एकविंशतिविधः and om. स. [4]C reads स च कदाचित् जात्यन्तरोपन्यासः स for तद्वदपन्यासोऽपि अंगमध्ये. 100 (K. 81) [1]C. om. this. अंग in this couplet has been emended to अंश. 101 (C. 96, 100a) [1]K. om. this. [2]C. wrongly repeats here 62b. 102 (C. 97a ; K 112) [1]C. om. this hem.　103 (C. 97b-98a ; K. 113) [1]C. as न्यासः सर्वे उपन्यासौ स्यातां गान्धारपञ्चमौ [2]CK. सप्तमोपेतं　104 (C. 98b-99a, K. 114) [1]K. तु for च.

[1]अंशजातास्तथार्षभ्यान्निषादर्षभधैवताः ।
एत एव ह्यपन्यासाः न्यासश्च ऋषभः स्मृतः[2] ॥ १०५ ॥
अल्पत्वं च विशेषेण भवेत् षाडवकारिणः ।
लङ्घनं पञ्चमस्यैव स्यादारोहणसंश्रयात् ॥ १०६ ॥
षट्स्वरं सप्तमहीने पञ्चस्वर्ये च पञ्चमम् ।
विवादिनां स्वराणां च संचारोऽत्र विधीयते ॥ १०७ ॥
[1]धैवत्यां धैवतो न्यासः स्यादंशौ धैवतर्षभौ ।
अपन्यासा भवन्त्यत्र धैवतर्षभमध्यमाः ॥ १०८ ॥
षड्जपञ्चमहीनं च पञ्चस्वर्यं विधीयते ।
[1]पञ्चमेन विना चैव षाडवं परिकीर्तितम् ॥ १०९ ॥
आरोहिणौ च कर्तव्यौ लङ्घनीयौ [1]तथैव च
[2]निषादश्चर्षभश्चैव गान्धारो बलवांस्तथा ॥ ११० ॥
[1]निषादिन्यां नैषादोऽंशा गान्धारस्त्वर्षभः स्मृतः ।
एत एव ह्यपन्यासा न्यासश्चैवात्र सप्तमः ॥ १११ ॥
[1]धैवत्या इव कर्तव्यौ षाडवौडविते तथा ।
तद्वच्च लङ्घनीयौ तु बलवन्तौ तथैव च ॥ ११२ ॥
[1]अंशास्तु षड्जकैशिक्यां षड्जगान्धारपञ्चमाः ।
अपन्यासा भवन्त्यत्र षड्जसप्तमपञ्चमाः ॥ ११३ ॥
[1]गान्धारश्च भवेन्न्यासो [2]हीनस्वर्यं न चात्र तु ।
हीनस्वरस्याभावात् तु सम्पूर्णा चेयमिष्यते ।
दौर्बल्यं चात्र कर्तव्यं धैवतस्यर्षभस्य च ॥ ११४ ॥
षड्जश्च मध्यमश्चैव निषादो [1]धैवतस्तथा ।
स्युः षड्जोदीच्यवत्यंशा [2]न्यासश्चैव तु मध्यमः ॥ ११५ ॥

105 (C. 99b, 100b ; K. 115) [1]K. चार्षभ्यां तु भवन्त्यंशा धैवतर्षभसप्तमाः 106 (C. 101 ; K. 116) 107 (C. 102 ; K. 117) 108 (C. 103 ; K. 118) [1]K. धैवत्यां धैवतर्षभावंशौ न्यासः स्याद्धैवतः. 109 (C. 104a ; K. 119) [1]C. om. this hem. 110 (C. 104b, K. 120) [1]C. om. this hem. 111 (K. 121) [1]C. om. this couplet. 112 (K. 122) [1]C. om. this couplet. 113 (K. 123) [1]C. om. this couplet. 114 (K. 124) [1]C. om. this couplet. [2]C. हीनस्वरस्य [1] भावातु सम्पूर्णा चेयमिष्यते for हीनस्वर्यं न चात्र तु 115. (C. 105b-106a ; K. 125) [1]C. धैवतः स्मृतः [2]C. न्यासो मध्यम इष्यते.

[1]अपन्यासो भवत्यस्या धैवतः षड्ज एव च ।
परस्परामिहांशानां संचारश्च विधीयते ॥ ११६ ॥
[1]पञ्चमर्षभहीनं तु पञ्चस्वर्यं [2]विधीयते ।
ऋषभः षाडवे हीनो [3]गान्धारश्च बलीभवेत् ॥ ११७ ॥
[1]सर्वेऽंशा षड्जमध्याया [2]अपन्यासास्तु एव च ।
[3]षड्जो वा मध्यमो वापि न्यासः कार्यः प्रयोक्तृभिः ॥ ११८ ॥
[1]गान्धारसप्तमापेतं पञ्चस्वर्यं [2]विधीयते ।
[3]षाडवं [4]सप्तमापेतं चात्र कार्यं प्रयोगतः ॥ ११९ ॥
सर्वस्वराणां सञ्चार [1]इष्टस्तस्याः प्रयोक्तृभिः ।
षड्जग्रामाश्रिता ह्येता विज्ञेयाः सप्त जातयः ॥ १२० ॥
अतः [1]ऊर्ध्वं प्रवक्ष्यामि मध्यमग्रामसंश्रिताः
[2]अंशाः स्युः पञ्च गान्धार्यां धैवतर्षभवर्जिताः ॥ १२१ ॥
[1]अपन्यासत्वमस्यास्तु षड्जपञ्चमयोरपि ।
[2]गान्धारश्च भवेन्न्यासः षाडवं चर्षभं विना ॥ १२२ ॥
ऋषभधैवतापेतं तथा चौडवितं भवेत् ।
लङ्घनीयौ च तौ नित्यमृषभो धैवतं व्रजेत् ॥
षड्जमध्यमयोरत्र बाहुल्यं संविधीयते ॥ १२३ ॥
[1]गान्धारीविहितं न्यासं हीनस्वर्यं च लक्षणम् ।
सर्वं च रक्तपूर्वाया गान्धार्याश्च विनिर्दिशेत् ॥ १२४ ॥

116 (C. 106b-107a ; K. 126) [1]C. उपन्यासाविह स्यातां धैवतर्षभ एव च. [2]C. परस्परांशानुगमी गन्धारीनुपमो भवेत्. 117 (C. 107b-108a ; K. 127) [1]C. पञ्चमस्वरहीन [2]K. तु तत्र वै [3]C. लङ्घने च तयो र्भवेत्. 118 (C. 108b-109a ; K. 128) [1]C. सर्वेषां for सर्वेऽंशाः. [2]C. अपन्यासा त. [3]C. षड्जश्च मध्यमश्चैव न्यासौ कार्यौ. 119 (C. 109b-110a ; K. 129) [1]C. K. गान्धारसप्तमोपेतं. [2]K. तु तत्र वै. [3]C. ऋषभः षाडवे हीनो दुर्बलः स विशेषतः [4]K. सप्तमोपेतं. 120 (C. 110b-111a ; K. 130) K. इष्टस्तस्यां. 121 (C. 111b-112a ; K. 131) [1]K. परं for ऊर्ध्वं, K. गान्धार्याः पञ्चस्वरांशा धैवतर्षभवर्जिताः. 122 (C. 112b-113a ; K. 132) [1]K. अपन्यासो भवेच्चात्र षड्जः पञ्चम एव च. [2]K. गान्धारीऽत्र. 123 (K. 133) [1]C. om. this couplet, but reads in its place the following: धैवतर्षभ गान्धार्यां कर्तव्यं स्वरयोगतः ॥ and प्रयोक्तृभिः प्रयोक्तव्यं गान्धारस्य च लङ्घनम् (C. 113b, 114a). 124 (C. 115 ; K. 134-135a) [1]C. गान्धारी विहितं.

[1]बलवन्तौ विधातव्यौ धैवतः सप्तमस्तथा ।
गान्धारषड्जयोरत्र सञ्चारश्चर्षभं विना ॥ १२५ ॥
[1]अपन्यासस्तु कार्यः स्यादेक एवात्र मध्यमः ।
[2]गान्धारोदीच्यवायां तु तावंशौ षड्जमध्यमौ १२६ ॥
पञ्चस्वर्यं [1]भवेन्नात्र [2]षाट्स्वर्यमृषभं विना ।
[2]अस्यास्त्वल्पबहुत्वस्य न्यासापन्यासयोस्तथा ।
यः षड्जोदीच्यवायास्तु सर्वोऽत्र स विधिः स्मृतः[3] ॥ १२७ ॥
[1]मध्यमायां भवन्त्यंशा [2]सषड्जर्षभमध्यमाः ।
[3]पञ्चमो धैवतश्चैवापन्यासस्तत्र एव तु ॥ १२८ ॥
[1]न्यासो मध्यम एवात्र द्विश्रुत्योर्हीनता भवेत् ।
[2]गान्धारो सप्तमापेतं पञ्चस्वर्यं विधीयते ॥ १२९ ॥
[1]गान्धारहीनं पट्स्वर्यं बाहुल्यं षड्जमध्ययोः ।
[2]गान्धारस्य च दौर्बल्यं मध्यमाया विधीयते ॥ १३० ॥
मध्यमोदीच्यवायास्तु [1]पञ्चमों[2]शो प्रकीर्तितः ।
शेषो विधिस्तु कर्तव्यो[2] गान्धारोदीच्यवां गतः ॥ १३१ ॥
[1]द्वावंशावपि पञ्चम्या भवतः पञ्चमर्षभौ ।
[2]अपन्यासो निषादश्च पञ्चमर्षभसंयुतः ॥ १३२ ॥
[1]न्यासः पञ्चम एव स्यात् मध्यमर्षभहीनता ।
[2]मध्यमायां तु कर्तव्ये षाडवौडविते [3]यथा ॥ १३३ ॥

125 (C. 116 ; K. 135b-136a) [1]K. बलिनौ भवतश्चात्र धैवतः सप्तमस्तथा. 126 (C. 117 ; K. 136b-137a) [1]K. ह्यपन्यासस्तथा चात्र एको वै मध्यमः स्मृतः. [2]K. गान्धारीदौत्यवांशौ च विज्ञेयौ षड्जमध्यमौ. 127 (C. 118 ; K. 137b-138) [1]K. न चास्त्यत्र for भवेन्नात्र [2]C. षाटस्वर्यं चर्षभं. [3]C. adds कार्योऽवान्तरमार्गेस्तु न्यासोपन्यास एव तु। तत्राल्पत्वाद् द्विविधयोः षड्जौदीच्यवतीसमाः (C. 118b-119a). 128 (C. 119b-120a ; K. 139) [1]C. मध्यमाद्य. [2]K. विना गान्धारसप्तमौ. [3]K. एत एव ह्यपन्यासा न्यास एव हि मध्यमः for this hem. 129 (C. 120b ; K. 140a) [1]K. om. this hem. [2]C. om. this hem. 130 (C. 121 ; K. 140b-141) [1]C. गान्धारहीन-बाहुल्यं षट्स्वर्यं षड्जमध्ययोः [2]K. for this the following षाट्स्वर्यं चाप्यगान्धारं कर्तव्यं तु प्रयोगतः। षड्जमध्यमयोश्चात्र कार्यं बाहुल्यमेव च। गान्धारलङ्घनं चात्र नित्यं कार्यं प्रयोक्तृभिः॥ 131 (C. 122 ; K. 142) [1]K. पञ्चमांशो न हीयते. [2]C. °दीच्यवांशतः. 132 (C. 123, 124a ; K. 143) [1]K. for this couplet द्वावंशावथ पञ्चम्या ऋषभः पञ्चमस्तथा। संनिषादावपन्यासौ न्यासश्चैवात्र पञ्चमः॥ 133 (C. 124a, K. 144a) [1]K. om. this hem. [2]C. om. this hem. [3]Emend तथा into यथा.

[1]दुर्बलाश्चात्र कर्तव्या षड्जगान्धारमध्यमाः ।
[2]कुर्याच्चाप्यत्र सञ्चारं मध्यमस्यर्षभस्य च ॥
[3]गान्धारगमनं चाल्पं सप्तम्यां संप्रयोजयेत् ॥ १३४ ॥
अथ गान्धारपञ्चम्या; [1]पञ्चमोऽंशः प्रकीर्तितः ।
[2]पञ्चमश्चर्षभश्चैव अपन्यासौ प्रकीर्तितौ ॥ १३५ ॥
[1]गान्धारोऽत्र भवेन्न्यासो हीनस्वर्यं च नेष्यते ।
पञ्चम्यास्त्वथ गान्धार्याः सञ्चरश्च विधीयते ॥ १३६ ॥
ऋषभः पञ्चमश्चैव गान्धारोऽथ निषादवान् ।
चत्वारोऽंशा [1]भवन्त्यान्ध्र्या अपन्यासास्त एव च[2] ॥ १३७ ॥
गान्धारश्च भवेन्न्यासो [1]षड्जापेतश्च षाडवम् ।
[2]गान्धारषड्जयोरत्र सञ्चारः स्यात्परस्परम् ॥ १३८ ॥
[1]षष्ठसप्तमयोश्चात्र [2]न्यासो गत्यनुपूर्वशः ।
षड्जस्य लङ्घनं [3]चात्र नास्ति चौडवितं [4]तथा ॥ १३९ ॥
[1]नन्दयन्त्या भवत्यंशः पञ्चमो नित्यमेव तु ।
स्यातामस्यामुपन्यासो मध्यमः पञ्चमस्तथा ॥ १४० ॥
[1]षाडवं षड्जहीनं तु लङ्घनीयः स एव तु ।
आन्ध्रीवत्सञ्चरो नित्यमृषभस्य च लङ्घनम् ॥ १४१ ॥
[1]तत्र मन्द्रगतिः प्रोक्ता नित्यं गानप्रयोक्तृभिः ।
[2]तारगत्याथ षड्जस्तु कदाचिन्नातिवर्तते ॥ १४२ ॥
[1]गान्धारश्च ग्रहः कार्यस्तथा [2]न्यासश्च नित्यशः ।
[3]कर्मारव्या भवन्त्यंशा पञ्चमर्षभधैवताः ॥ १४३ ॥

134 (C. 124b, 125a ; K. 144b-145) [1]K. दौर्बल्यं चात्र विज्ञेयं षड्जगान्धारपञ्चमे [2]K. कुर्यादस्यां च संचारं पञ्चमस्यर्षभस्य च, [3]K. गान्धारगमनं चैव कार्यमल्पश्च सप्तमः. 135 (C. 125 ; K. 146) [1]C. पञ्चमांशः [2]C. पञ्चमश्चर्षभश्चैव 136 (C. 127 ; K. 147) [1]K. न्यासश्चात्र तु गान्धारः स च पूर्णस्वरीभवेत्, गान्धारपञ्चमाभ्यां च संचारोऽत्र विधीयते. 137 (C. 128 ; K. 148) [1]K. भवन्त्यान्ध्र्याम् [2]K. तु for च. 138 (C. 129 ; K. 149) [1]K. षड्जोपेतं [2]K. °जयोश्चापि 139 (C. 130 ; K. 150) [1]K. सप्तमस्य च षड्जस्य [2]C. न्यासगत्यापूर्वशः, [3]K. कार्यं for चात्र, [4]K. सदा for तथा 140 (C. 131 ; K. 151) [1]K. नन्दयन्त्याः क्रमाच्चास्त्वपन्यासोऽंश एव च। गान्धारी मध्यमश्चैव पञ्चमश्चेति नित्यशः। 141 (C. 132 ; K. 152) [1]K. षड्जेनांशो लङ्घनीय चान्ध्रीसंचार इष्यते। लङ्घनमृषभस्यात्र तत्र मन्द्रगतं स्मृतम्। 142 (C. 133 ; K. 153a) [1] See above note 1 to 141 [2]K. तारगत्याथ षड्जः स्यात् 143 (C. 134 ; K. 153b-154a) [1]C. गान्धारि च, [2]C. नाम्यच. [3]K. कर्मारव्याः स्मृता ह्यंशा.

[1]निषादश्चेति चत्वारो ग्रहाश्च परिकीर्तिताः ।
एत एव ह्यपन्यासा न्यासः पञ्चम इष्यते ॥ १४४ ॥
हीनस्वर्यं न चात्र स्यादनंशा बलिनस्तथा ।
गान्धारस्य विशेषेण सर्वतो गमनं भवेत् ॥ १४५ ॥
[1]कैशिक्यास्तु भवेन्त्यंशाः सर्वे चर्षभवर्जिताः ।
एत एव अपन्यासा न्यासौ गान्धारसप्तमौ ॥ १४६ ॥
धैवतेऽंशे निषादे च न्यासः पञ्चम इष्यते ।
[1]दौर्बल्यमृषभस्यात्र लङ्घनं च विशेषतः ॥ १४७ ॥
[1]अपन्यासः कदाचिच्च ऋषभोऽपि भवेदिह ।
[2]ऋषभः षाडवे हीनो धैवतश्चर्षभं विना ॥ १४८ ॥
[1]तथा चौडवितं कार्यं बलिनौ चाद्यपञ्चमौ ।
[2]षड्जमध्यावदत्रापि संचारस्तु विधीयते ॥ १४९ ॥
एवमेता बुधैर्ज्ञेया जातयो दशलक्षणाः ।
[1]स्वैः स्वैश्च करणैर्योज्याः पदेष्वभिनयैरपि ॥ १५० ॥
[1]आसामिदानीं वक्ष्यामि रसभावविकल्पनम् ।
[2]कार्या यस्मिन् रसे याश्च ताश्च मे सन्निबोधत ॥ १५१ ॥

इति भारतीये नाट्यशास्त्रे आतोद्यविधिर्नाम अष्टाविंशोऽध्यायः ॥ २८ ॥

144-45 (C. 135-136 ; K. 154b, 155) [1]K. reads for 144-145 the following धैवतश्च निषादश्चाप्यपन्यासास्त एव तु । पञ्चमश्च भवेन्न्यासो हीनस्वर्यं न चात्र तु । गान्धारस्य विशेषेण सर्वतो गमनं भवेत् । 146 (C. 137 ; K. 156) [1]K. कैशिक्यांशास्तु विज्ञेयाः स्वराः सर्वेऽर्षभं विना. 147 (C. 138 ; K. 157a, 159a) [1]C. दौर्बल्यच्चर्षभस्यास्या. 148 (C. 139a, 140a ; K. 157b, 158a) [1]C अपन्यास त्वमङ्गत्वं बाहुल्यं च कदाचन [2]K. आर्षभ्यं षाडवं चात्र (नात्र) धैवतर्षभवर्जितम्. 149 (C. 140b, 141a ; K. 158b, 159b) [1]K. तथा चौडवितं कार्यं बलिनौ षड्जपञ्चमौ, C. कार्यश्चौडवितो नात्र बलिनौ चान्यपञ्चमौ, [2]C. भवेदस्यस्यैव सञ्चारः षड्जमध्यवदिष्यते (C. 139b) 150 (C. 141b ; C. 160) [1]C. om. this hem. K. स्वैः स्वैश्च 151 (C. 141 c ; C. 161) [1]C. om. this hem. [2]K. reads यथा यस्मिन् रसे यश्च तत्त्वं मे संनिबोधय ।

एकोनत्रिंशोऽध्यायः

[1]षड्जोदीच्यवती चैव [2]षड्जमध्या तथैव च ।
[3]मध्यमपञ्चमबाहुल्यात् कार्यं शृङ्गारहास्ययोः ॥ १ ॥
[1]षाड्जी त्वथार्षभी चैव [2]षड्जर्षभग्रहस्वरात् ।
वीररौद्राद्भुतेष्वेते [3]प्रयोज्या गानयोक्तृभिः ॥ २ ॥
[1]निषादांशे च नैषादी गान्धारे षड्जकैशिकी ।
करुणे च रसे कार्या जातिर्गानविशारदैः ॥ ३ ॥[2]
धैवती [1]धैवतांशा च बीभत्से सभयानके ।
[2]धैवती करुणे योज्या चोन्मादे षड्जमध्यमा ॥ ४ ॥
ध्रुवाविधाने कर्तव्या [1]जातिर्गान[प्रयोक्तृभिः] ।
[3]रसं कार्यमवस्थां च ज्ञात्वा [नाट्ये प्रयत्नतः] ॥ ५ ॥
षड्जग्रामाश्रिता ह्येता विज्ञेया जातयो बुधैः ।

अतःपरं प्रवक्ष्यामि [1]मध्यमग्रामसंश्रयाः ॥ ६ ॥
[1]गान्धारीरक्तगान्धार्योर्गान्धारांशोपपत्तितः ।
करुणे तु रसे [2]कार्यौ [3]निषादेऽंशे तथैव च ॥ ७ ॥
मध्यमा पञ्चमी चैव नन्दयन्ती तथैव च ।
[1]गान्धारपञ्चमी चैव मध्यमोदीच्यवा तथा ॥ ८ ॥

1 (C. 1 ; K. 1) [1]K. षड्जोदीच्यकरं. [2]K. बहुमध्यं for षड्जमध्या and C. om. च at the end. [3]C. षड्जमध्यम for मध्यमपञ्चम. 2 (C. 2 ; K. 2) [1]C आर्षभी चैव षाड्जी च for षाड्जी त्वथार्षभी चैव. [2]K. स्वरांश परितस्पृहात् for षड्जर्षभग्रहस्वरात्. [3]C. वीराद्भुते च रौद्रे च. [4]C. निषादाङ्ग परिग्रहात् for प्रयोज्या etc. 3 (K. 3) [1]K. निषादंशेष नैषादी गान्धारी षड्जकैशिकी [2]C. gives in its place only गान्धार्यंशोपपत्त्या च करुणे षड्ज कैशिकी (3a.). 4 (C. 3b ; K. 4) [1]K. धैवतांशे. [2]C. om. this hem. 5 (C. 4 ; K. 5a) [1]K. जातिगाने. [2]CK. प्रयत्नतः. [3]K. om. this hem. [4]C. योज्या प्रयोक्तृभिः. 6 (C. 5; K. 5b, 6a) [1]C. मध्यमग्रामसमाश्रयाः. 7 (C. 6 ; K. 6b, 7a) [1]C. °गान्धार्यौ, K. °गान्धार्या. [2]CK. कार्यौ. [3]C. जातिगाने प्रयोक्तृभिः for निषादेऽंशे etc. 8 (C. 7a, 8a ; K. 7b-8a) [1]C. मध्यमोदीच्यवा चैव गान्धारोदीच्यवा तथा.

मध्यमपञ्चमबाहुल्यात् [1]कार्या शृङ्गारहास्ययोः ।
कर्मारवी तथा चान्ध्री [2]गान्धारोदीच्यवा तथा ॥ ९ ॥
[1]वीरे रौद्रेऽद्भुते कार्या षड्जर्षभांशयोजिता ।
कैशिकी धैवतांशा स्याद् बीभत्से सभयानके ॥ १० ॥
एकैव षड्जमध्या ज्ञेया [1]सर्वरससंश्रया जातिः ।
तस्या [2]ह्यंशा सर्वे [3]स्वरास्तु विहिता प्रयोगविधौ ॥ ११ ॥
यो यदा बलवान् यस्मिन् स्वरो [1]जातिसमाश्रयात् ।
[2]तत्प्रयुक्ते रसे गानं कार्यं गेये प्रयोक्तृभिः ॥ १२ ॥
मध्यपञ्चमभूयिष्ठं [1]गानं शृङ्गारहास्ययोः ।
षड्जर्षभप्रायकृतं वीररौद्राद्भुतेषु च ॥ १३ ॥
[1]गान्धारसप्तमप्रायं करुणे गानमिष्यते ।
तथा धैवतभूयिष्ठं बीभत्से सभयानके ॥ १४ ॥
सर्वेष्वंशेषु [1] [स्वरा] नियमोक्तविधानेन संप्रयोक्तव्या ।
काकल्यन्तरविहिता विशेषयुक्तास्तु बलवन्तः ॥ १५ ॥
एवमेता बुधैर्ज्ञेया जातयो [1]रससंश्रयाः ।
([2]वाद्यप्रयोगविहितान् स्वरांश्चैव निबोधत ॥ १६ ॥
हास्य शृङ्गारयोः कार्यौ स्वरौ मध्यमपञ्चमौ ।
षड्जर्षभौ च कर्तव्यौ वीररौद्राद्भुतेष्वथ ॥ १६क ॥
गान्धारश्च निषादश्च कर्तव्यौ करुणे रसे ।
धैवतश्च प्रयोक्तव्यो बीभत्से सभयानके ॥ १६ख ॥)

अत ऊर्ध्वं प्रवक्ष्यामि वर्णालंकारलक्षणम् ।
आरोही चावरोही च स्थायिसञ्चारिणौ तथा ॥ १७ ॥

9 (C. 7a, 9a ; K. 8b-9a) [1]K. कार्यौ, C. कार्ये. [2]C. निषादांशोपत्तितः for गान्धारोदीच्यवा तथा 10 (C. 8b, 10 ; K. 9b-10a) [1]C. for this couplet षड्जर्षभांशनिष्पन्ना कर्तव्या वीररौद्रयोः ॥ ८ ॥ कैशिकी धैवतांशा स्यात् तथा गान्धार-पञ्चमी । प्रयोक्तव्या बुधैः सम्यक् बीभत्से सभयानके ॥ १० ॥ 11 (C. 11 ; K. 10bc) [1]C. रसासंश्रया. [2]K. स्वंशा. [3]K. स्वरास्तु विज्ञेया. 12 (C. 12 ; K. 11) [1]K. जातिसमाश्रयः. [2]K. तत्प्रवृत्ते. 13 (C. 13, K. 12) [1]C. हास्यशृङ्गारयोर्भवेत् for गानं etc. 14 (C. 14 ; K. 13) [1]K. गान्धारः सप्तमप्रायः 15 (C. 15 K. 15) [1]CK. रसा. 16 (C. 16 ; K. 16a) [1]C. रस for नाटा. [2] Should there be पाठ्य for वाद्य ? cf. XIX. 38ff. 16 *ka-kha* occur only in C (16b-18) 17 (C. 19 ; K. 16b-17a)

वर्णाश्चत्वार एवैते अलंकारास्तदाश्रयाः ।
आरोहन्ति स्वरा यत्र [1]आरोहीति स भण्यते ॥ १८ ॥
यत्र [1]चैवावरोहन्ति सोऽवरोहीति [2]संज्ञितः ।
[3]स्थिरा स्वरा समा यत्र [4]स्थायी वर्णः स उच्यते ।
सञ्चरन्ति [5]स्वरा यत्र स सञ्चारीति [6]संज्ञितः ॥ १९ ॥
[1]शारीरस्वरसंभूता-[2]स्त्रिस्थानगुणगोचराः ।
चत्वारो लक्षणोपेता वर्णा [3]ह्येते प्रकीर्तिताः ॥ २० ॥
[1]एवं लक्षणसंयुक्तं यदा वर्णौ तु कर्षति ।
तदा वर्णस्य निष्पत्तिर्विज्ञेया रससम्भवाः ॥ २१ ॥
एते वर्णास्तु विज्ञेयाश्चत्वारो [1]गानयोगतः ।
[2]एतान् समाश्रितान् सम्यगलंकारान्निबोधत ॥ २२ ॥

[1]प्रसन्नादिः प्रसन्नान्तः प्रसन्नाद्यन्त एव च ।
प्रसन्नमध्यश्च [2][समो बिन्दुर्वेणुस्तथै]व च ॥ २३ ॥
[1]सन्निवृत्तप्रवृत्तश्च कम्पितः कुहरस्तथा ।
[2]रेचिताख्यस्तथा चैव प्रेङ्खोलितक एव च ॥ २४ ॥
मन्द्रतारप्रसन्नश्च तारमन्द्रप्रसन्नतः ।
[1]प्रस्वारश्च प्रसादश्च तथोद्वाहित एव च ॥ २५ ॥
[1]अवलोकितः [क्रमश्च] निष्कूजितक एव च ।
उद्गीतो ह्रादमानश्च रञ्जितश्च तथा परः ॥ २६ ॥
आवर्तकाख्यो विज्ञेयः परिवर्तक एव च ।
उद्घट्टितस्तथाक्षिप्तः सम्प्रदानं [1]तथा परः ॥ २७ ॥

18 (C. 20 ; K. 17b-18a) [1]K. आरोही स तु संज्ञितः 19 (C. 21 ; K. 18b-19) [1]K चैवावरोही च [2]K. संज्ञितः for भण्यते [3]C स्थिरस्वराः [4]C. स्थायिवर्णः स संज्ञितः [5]C. स्वय for स्वरा [6]K. कीर्तित for संज्ञितः 20 (C. 22 ; K. 20) [1]C. शरीरस्वर[0] [2]K. [0]तस्त्रिस्थान[0] [3]K. स्तव for ह्येते. 21 (C. 23 ; K. 21) [1]एवं पदं (Ag.) 22 (C. 24 ; K. 22) [1]K. गीतयोजकाः for गानयोगतः. [2]K. एतानेवाश्रुतो भूयः ह्यलं[0] for समाश्रितान् सम्यगलं[0]. 23 (C. 25) [1]K. om. 25-30. [2]C. समोऽन्यस्थिर एव च. See also C. 31b. 24 (C. 26) [1]C. स्यान्निवृत्तिः प्रवृत्तिश्च [2]C. रोचितव्यवस्था, [3] See 23 note 1. 25 (C. 27) [1]C. प्रसारश्च [2] See 23 note 1. 26 (C. 28) [1]C. अवलोकितस्ततश्चैव. [2] See 23 note 1. 27 (C. 29) [1]C. तदा for तथा.

हसिताख्योऽथ हुंकारः सन्धिप्रच्छादनस्तथा ।
[1]विधूनाख्यस्तथा [ज्ञेयो] गात्रवर्णस्तथैव च ॥ २८ ॥
प्रसन्नादिः प्रसन्नान्तः प्रसन्नाद्यन्त एव च ।
[1]प्रसन्नमध्यश्च तथा [2]समो रेचित एव च ॥ २९ ॥
प्रस्वारश्च प्रसादश्च स्थायिवर्णसमाश्रयः ।
अथ [2]संचारिजान् भूयः कीर्त्यमानान् निबोधत ॥ ३० ॥
[1]मन्द्रतारप्रसन्नादिर्बिन्दुः प्रेङ्खोलितस्तथा ।
[2]सनिन्वृत्तप्रवृत्तश्च रेचितः कम्पितः समः ॥ ३१ ॥
[1]कुहरश्चैव वेणुश्च [2]रञ्जितो ह्यवलोकितः ।
[3]आवर्तकपरिवर्तौ [4]ज्ञेयाः सञ्चारिणस्तथा ॥ ३२ ॥
[1]निष्कूजितः सहुंकारः [2]हसितं [3]बिन्दुरेचितम् ।
प्रेङ्खोलितं तथाक्षिप्तं [4]विधूनोद्घट्टितं तथा ॥ ३३ ॥
[1]ह्रादमानः सम्प्रदानं [2]सन्धिप्रच्छादनं तथा ।
प्रसन्नादिः प्रसन्नान्त इति [3]चारोहिणः स्मृताः ॥ ३४ ॥
[1]विधूनो [2]गात्रवर्णश्च तथोद्वाहित एव च ।
[3]उद्गीतश्च तथा वेणुरित्येते ह्यवरोहिणः ॥ ३५ ॥
सप्तरूपगता ज्ञेया अलंकारास्त्विमे बुधैः ।
नेष्यन्ते हि ध्रुवास्वेते जातिवर्णप्रकर्षणात् ॥ ३६ ॥
बिन्दुर्वापि हि वेणुर्वा ये चान्येऽपि प्रकीर्तिताः ।
ते ध्रुवाणां [2]प्रयोगेषु न कार्या स्वप्रमाणतः ॥ ३७ ॥

28 (C. 30) [1]C. विधूनाख्यस्तदा. [2] See 25 note 1. 29 (C. 31 ; K. 23) [1]C. तथा प्रसन्न एवं च for प्रसन्नमध्यश्च तथा [2]C. समोऽनुचित एव, K. क्रमरेचित, Ag. क्रमरेचित 30 (C. 32 ; K. 24) [1]K प्रस्तारश्च [2]K. संचारितान् 31 (C. 33 ; K. 25) [1]C. मन्त्रतार प्रसन्नश्च, K, मन्द्र स्तथा प्रसन्नादि [2]C. तारमन्द्रप्रसन्नश्च सन्निवृत्तप्रवर्त्तकः for the accepted reading from Ag. p. 532. 32 (C. 34 ; K. 26) [1]C. कुदर[0] for कुहर ; [2]K. रञ्जिता. [3]CK. परावृत्तौ, [4]K. ज्ञेयः. 33 (C. 35 ; K. 27) [1]C. निष्कूजित सहुंकार, K. निष्कर्षोऽत्युच्चयश्चैव [2]K. हसितो [3]K. [0]रेश्च च, for [0]रेचितम् [4]K. विस्तीर्णा ह्यालितस्तथा for विधूनोद्घट्टित स्तथा (MC. विधूमोद्घट्टित). 34 (C. 36 ; K. 28) [1]K. स्यन्दमानः for ह्रादमानः. [2]C. सन्धिः प्रह्लादन ; [3]K. वारोहिणः. 35 (C. 37 ; K. 29) [1]CM. विधूमो, K. विधूतः ; [2]K. स्थायिवर्ण[0] for गात्रवर्ण[0] [3]K. उद्दितश्च तथा वेणि विज्ञेया for उद्गीतश्च etc. 36 (C. 38 ; K. 30) [1]K. नैतेष्वाकं ध्रुवास्विष्टा जातिवर्णप्रकर्षणैः 37 (C. 39 ; K. 31a) [illegible] [2]K. प्रयोगेषु कार्या ह्यारोहिणः स्वराः.

यस्मादर्थानुरूपा [1]हि ध्रुवा [2]काव्यार्थदर्शिका ।
वर्णानां तु [3]पुनः कार्यं कृशत्वं [4]पदसंश्रयम् ॥ ३८ ॥
[1]ये तु प्रयोगं गच्छन्ति तांश्च वर्णान् निबोधत ।
प्रसन्नादिः प्रसन्नान्तः प्रसन्नाद्यन्त एव च ॥ ३९ ॥
[1]तथा प्रसन्नमध्यश्च बिन्दुः [2]कम्पितरेचितौ ।
[3]तारश्च तारमन्द्रश्च तथा तारतरः पुनः[4] ॥ ४० ॥
[1]प्रेङ्खोलितस्तथा मन्द्रो मन्द्रतारः समस्तथा ।
स्यान्निवृत्तप्रवृत्तश्च प्रसादोऽपांग एव च ॥ ४१ ॥
[1]अवलोकस्तथा वेणुरित्येते सर्ववर्णगाः ।
स्थायिवर्णादृते त्वन्ये सर्ववर्णा प्रयोगिनः ॥ ४२ ॥

[1]अत ऊर्ध्वं प्रवक्ष्यामि वर्णालंकारलक्षणम् ।
क्रमशो [2]दीप्यते यस्तु प्रसन्नादिः स कथ्यते ॥ ४३ ॥
व्यस्तोच्चारित एवैष [1]प्रसन्नान्तोऽभिधीयते ।
आद्यन्तयोः [2]प्रसदनात् प्रसन्नाद्यन्त इष्यते ॥ ४४ ॥
प्रसन्नमध्यो मध्ये तु प्रसन्नत्वादुदाहृतः ।
सर्वसाम्यात् समो ज्ञेयो [1]स्थितस्त्वेकस्वरेऽपि यः[2] ॥ ४५ ॥
बिन्दुरेककलस्तारः [1]स्पृष्ट्वा च पुनरागतम् ।
[2]स्यान्निवृत्तप्रवृत्तश्च मन्द्रं गत्वा समागतः ॥ ४६ ॥

38 (C. 40 ; K. 31b-32a) [1]K. [0]दि for हि. [2]C. कार्यार्थदर्शिका, for काव्यार्थ[0] [3]K. मुने [4]C. तु पदसं (N. भ्रुवा)श्रयम्. 39 (C. 41 ; K. 32b-33a) [1]K. यत्र प्रयोगे गच्छन्ति. 40 (C. 42 ; K. 33b) [2]K. puts तथा after प्रसन्नमध्यश्च [3]C. [0]रेचिता. [4]K. om. this hem. 41 (C. 43 ; K. 34) [1]C. [0]स्तथातारमन्द्रतारः 42 (C. 44 ; K. 35) [1]K. ऊर्मिस्त्रोषावलोकश्चेत्यपित्येके सर्ववर्णगा। स्थायिवर्णा इवैतेषां संप्रवक्ष्यामि लक्षणम् ॥ 43 (C. 45 ; K. 36a) [1]K. om. this hem. [2]K. दीपितो यः स्यात् 44. (C. 46 : K. 36b-37a) [1]K. प्रसन्नान्तो विधीयते [2]C. प्रशमनात्, K. प्रसम(द)नात्. 45 (C. 47 ; K. 37b-38a) [1]C. स्थिरत्वे कस्वरोऽपि. [2]K. reads after it the following : श्रुतयोऽन्या द्वितीयस्या मृदुमध्यायताः स्मृताः। आयतत्वं तु चैनीचं मृदुत्वं तु विपर्ययम् । स्वखरे मध्यमत्वं च श्रुतीनामेव निर्णयः। दीप्तायते करुणानां मृदुमध्यमयोस्तथा । 46 (C. 48 , K. 40b) [1]K. कम्पितश्च कलाद्वयम् for स्पृष्ट्वा च पुनरागतम्. [2]K. om. this hem.

[1]आक्रीडितलयो यश्च स वेणुः परिकीर्तितः ।
कण्ठेनिरुद्धपवनः कुहरो नाम जायते ॥ ४७ ॥
[1]त्रिकलाकम्पनात् तद्वद्रेचिताख्यः शिरोगतः ।
उरोगतः कम्पितः स्यात् कम्पनात्तु कलात्रयम् ॥ ४८ ॥
[1]गतागतप्रवृत्तो यः स प्रेङ्खोलित [2]उच्यते ।
[3]यस्तु कण्ठे स्वरोऽथ स्यात् स तु तारः प्रकीर्तितः ॥ ४९ ॥
उरोगतस्तथा मन्द्रो मूर्ध्नि [1]तारतरः स्मृतः ।
क्रमागतस्तु यस्तारः [2]चतुर्थः पञ्चमोऽपि वा ॥ ५० ॥
[1]तारमन्द्रप्रसन्नश्च ज्ञेयो [2]मन्द्रगतिश्च सः ।
लङ्घयित्वाऽपरान् मन्द्रान् [3]क्रमात् तारगतिं गतः ॥ ५१ ॥
[1]मन्द्रतारप्रसन्नश्च [2]विज्ञेयो ह्यवरोहणात् ।
[3]एकस्वराधिरूढः क्रमशः प्रस्वारसंज्ञितो ज्ञेयः ॥ ५२ ॥
[1]प्रस्वारस्तु निवृत्तः शनैः प्रसन्नः प्रसादः स्यात् ।
[2]अपाङ्गिकस्तु विज्ञेयः स्वराणामथ सञ्चारात् ॥ ५३ ॥
[1]समनन्तरौ द्वावपि चरत्युद्वाहितो द्विकल एव ॥
आरोहत्येककलां पुनरेककलां प्रसादयति ॥ ५४ ॥
उद्वाहित एव स्यादवलोकितसंज्ञको द्विरभ्यस्तः ।
एकं द्वौ त्रीन् गच्छन् स्वरान् क्रमेण क्रमो ज्ञेयः ॥ ५५ ॥
एकान्तरमारुह्य [1]प्रत्येत्येकान्तरं स्वरो यस्तु ।
[2]निष्कूजितसंज्ञोऽसौ [3]ज्ञेयो सूरिभिरलंकारः ॥ ५६ ॥
[1]आदावारोही स्यात् प्रस्वारोऽन्तेऽवरोही तु ।
यत्र क्रमात् कलासु वदन्त्यलंकारमुद्गीतम् ॥ ५७ ॥

47 (C. 49 : K 46a) [1]K. om. this hem. 48 (C. 50 ; K. 45b) [1]K. रेचितः शिरसि ज्ञेय कम्पितस्तु कलात्रयम्. 49 (C. 51 ; K. 41) [1]C. गतागतप्रवृत्ते ; [2]K. दृश्यते [3]C. यस्तु (K. यस्य) कण्ठे स्वरोऽधस्तावत्. 50 (C. 52 ; K. 42) [1]K. मन्द्रप्रचारतः for तारतरः स्मृतः [2]KC. षष्ठः पञ्चम. 51 (C. 53 ab ; K. 43) [1]C. तारमन्द्रः प्रसन्नस्तु, K. [0]मन्द्रप्रसन्ने सु ; [2]K. मन्द्रगतस्य. [3]K. परात्. 52 (C. 54c-54a ; K. 44a) [1]C. मन्द्रतारः प्रसन्नस्तु, K. मन्द्रतारः प्रसन्नस्तु. [2]C. विज्ञेयो ह्यारोहणाद् बुधैः. [3]K. om. this hem. 53 (C. 54b ; K. 44b-45a) [1]K. प्रसन्नान्तः स्वरो यत्र प्रसादः स तु संज्ञितः [2]C. om. this hem. 54 (C. 55) [1]K. om. this couplet. 55 (C. 56). 56 (C. 57) [1]C. प्रत्येकान्तरं. [2]C. अनिष्कूजितक, Bd (151) [3]ज्ञेयः सूरिभिर अलंकारः C. ज्ञेयोऽलंकार उद्गीतः. 57 (C, 70) [1]See Bd. 164.

[1]क्रमयोगेनानेन तु सञ्चार्यैकान्तरस्वरो द्विकलम् ।
द्व्यवरः षट्पर एव ह्यारोही ह्यादमानः स्यात् ॥ ५८ ॥
[1]अथ रञ्जितस्तु समन्तरस्वरे द्वे कले पुनः स्थित्वा ।
अर्धकलामारोही पुनरेव तथावरोही स्यात् ॥ ५९ ॥
[1]आवर्तकश्चतुर्षु स्वरेषु समन्तरेषु [2]सम्भवति ।
आरोहणावरोहणविधिना [3]चैकान्तरेष्वपि ॥ ६० ॥
[1]ज्ञेयो [2]निरन्तरकृतस्त्वष्टकलः [3]सान्तरस्तथा कार्यः ।
[4]तज्ज्ञैः कलाश्चतस्र[5]स्त्वावृत्यावर्तको भवति ॥ ६१ ॥
[1]अधिरुह्य च स्वरांस्त्रीन् स्वरान्तरं लङ्घयति च तद्वृत्तौ ।
पुनरपि परावृत्या स स्यात् परिवर्तकोऽष्टकलः ॥ ६२ ॥
[1]यस्य स्वरावतीतौ [2]तथा परं ह्यन्तरस्वरो भवति ।
[3][अष्टादशकलश्चैव] स भवेदुद्घट्टितो नित्यम् ॥ ६३ ॥
[1]आक्षिप्तकस्त्रिस्वरजः कर्तव्यः षड्विधः कलामात्रकः ।
एककलस्त्वधरः स्याद्विज्ञेयः षट्कलस्तु परः ॥ ६४ ॥
[1]आक्षिप्तकचतुर्भिः [2]स्वरैः[त्रिस्वरैः] कलान्तरोपेतैः ।
एकान्तरस्वरक्रम इह गदितः सम्प्रदानस्तु ॥ ६५ ॥
[1]द्विरपि [2]द्विकलं गदितं [3]हसितमिवोच्चारितं तथा हसितम् ।
समनन्तरस्वरकृतं [4]चाक्षिप्तकमिव बुधैर्ज्ञेयम् ॥ ६६ ॥
[1]समनन्तरस्वरेषु च हसितवद् द्व्यप(व)रश्चतुष्परो वापि ।
आरोहत्येककलां हुंकाराख्यः स विज्ञेयः ॥ ६७ ॥
[1]स्थानान्तरमारुह्य प्रत्येति ततश्चतुष्कलं क्रमशः ।
नोर्ध्वपरिक्षेपः स्यात् सन्धिप्रच्छादनं नाम ॥ ६८ ॥
[1]आदौ पदमुत्पाद्य तु यत्र स्याद् द्विस्वरे लघुनि वर्णे ।
समनन्तरमारोहत्येककलं तद् विधूनं तु ॥ ६९ ॥

58 (C. 58) [1]See Bd. 152. 59 (C. 59) [1]See Bd. 153. 60 (C. 60) [1]See Bd. 154. [2]C. सञ्चरति. [3]Bd. 154 चैकान्तरेष्वपि वा. C. [0]कोऽप्यन्तरेष्वपि च. M. [0]कोऽप्यन्तरे[0]. 61 (C. 61) [1] See Bd. 155. [2]Bd. निरन्तरकृष्टकलः. [3]Bd. सान्तरस्तु. [4]Bd. प्राज्ञैः. [5]Bd. [0]स्रः स्वहृत्यावर्ततो. 62 (C. 63) [1]See Bd. 156. 63 (C. 63) [1]See Bd. 157. [2]C. यथा, M. Bd. तथा. [3]C. एककलश्चैव तथा. 64 (C. 64) [1]See Bd. 158. 65 (C. 65) [1]See Bd. 159. [2]C. स्वरैस्तु काले. 66 (C. 66) [1]See Bd. 160. [2]C. विकलं. [3]C. हिंसितमिव चारितं तथा हसितम्. [4]C. N. (C. तत्) तज्ज्ञैराक्षिप्तमितीव. 67 (C. 67) [1]See Bd. 161. 68 (C. 68) [1]See Bd. 162. 69 (C. 69) [1]See Bd. 163.

[1]हुंकारवदारोहेदनन्तरं तु स्वरं कलान्तरयोः ।
द्वौ द्वौ प्रकम्प्यमानौ स्वरौ ततश्च प्रसन्नौ द्वौ ॥ ७० ॥
[1]एषोऽलंकारविधौ विज्ञेयो गात्रवर्ण इत्येव ।
[2]एकारौकारस्तथा दीर्घाक्षरमन्यदपि योज्यम् ॥ ७१ ॥
[1]गीतालंकराणां करणविधिरयं यथावदुपदिष्टः ।
एभिरलंकर्तव्या गीतिर्वर्णाविरोधेन ॥ ७२ ॥
[1]स्थाने चालंकारं कुर्यात् न ह्युरसि काञ्चिकां बध्येत् ।
अतिवहवोऽलंकारा [2]वर्णविहीना न योक्तव्याः ॥ ७३ ॥
एवमेते त्वलंकारा विज्ञेया वर्णसंश्रयाः ।
अथातः संप्रवक्ष्यामि छन्दोऽक्षरसमन्वितान् ॥ ७४ ॥
शशिना विरहितेव निशा विजलेव नदी लता विपुष्पेव ।
[1]अविभूषितेव च स्त्री गीतिरलंकारहीना स्यात् ॥ ७५ ॥
अलंकारास्त्रयस्त्रिंशदेवमेते मयोदिताः ।

अत ऊर्ध्वं प्रवक्ष्यामि गीतिनामपि लक्षणम् ॥ ७६ ॥
प्रथमा मागधी ज्ञेया द्वितीया [1]त्वर्धमागधी ।
सम्भाविता तृतोया च चतुर्थी पृथुला स्मृता ॥ ७७ ॥
[1]भिन्नवृत्तिप्रगीता या सा गीतिर्मागधी मता ।
[2]अर्धकालनिवृत्ता च विज्ञेया [3]त्वर्धमागधी ॥ ७८ ॥
सम्भाविता च विज्ञेया गुर्वक्षरसमन्विता ।
लघ्वक्षरकृता [1]या तु पृथुला [2]संप्रकीर्तिता ॥ ७९ ॥
एतास्तु गीतयो ज्ञेया [1]ध्रुवायोगं विनैव हि ।
[2]गान्धर्व एव योज्यास्तु नित्यं गानप्रयोक्तृभिः ॥ ८० ॥

70 (C. 71) [1]See Bd. 165. 71 (C. 72) [1]See Bd. 166. [2]Bd. भाकारोकार-तया, 72 (C. 73) [1]See Bd. 167. 73 (C. 74) [1]See Bd. 168. [2]C. हीनास्तु योक्तव्याः, Bd. °हीनाः, N. न योक्तव्याः. 74 (K. 46b-47a). 75 (B. 75 ; K. 47bc) [1]K. भनलङ्क्यते च नारीगीतिरलंकार.° 76 (C. 76) [1]K. om. 76. 77 (C. 77 ; K. 48) [1]C. चार्धमागधी. 78 (C. 78 ; K. 49) [1]K. विनिवृत्तप्रवृत्ता या सा ज्ञेया मागधी बुधैः । [2]K. अर्धतः संनिवृत्ता च. [3]K. ह्यर्धमागधी. 79 (C. 79 ; K. 50) [1]C. नित्या for या तु [2]K. सा प्रकीर्तिता. 80 (C. 80-81a ; K. 51a) [1]K. ध्रुवयोग'. [2]K. om. this hem.

[1]गीतयो गदिताः सम्यग् धातूंश्चैव निबोधत ।
[2]अत ऊर्ध्वं प्रवक्ष्यामि धातुवाद्यस्य लक्षणम् ॥ ८१ ॥
विस्तारः [1]करणश्चैव आविद्धो व्यञ्जनस्तथा ।
चत्वारो धातवो ज्ञेया [2]वादित्रकरणाश्रयाः ॥ ८२ ॥
[1]संघातजश्च समवायजश्च [2]विस्तारजोऽनुबन्धकृतः ।
ज्ञेयश्चतुःप्रकारो धातुर्विस्तारसंज्ञस्तु ॥ ८३ ॥
[1]विधिर्यस्तु स्मृत स्तस्य पूर्वं विस्तार [2]एव च ।
संघातसमवायौ तु विज्ञेयौ [3]तौ द्विकत्रिकौ ॥ ८४ ॥
पूर्वश्चतुर्विधस्तत्र पश्चिमोऽष्टविधः स्मृतः ।
करणानां विशेषेण [1]विज्ञेया वै पृथक् पृथक् ॥ ८५ ॥
[1]अधश्चोर्ध्वश्च विज्ञेयावधरोत्तरजौ स्मृतौ ।
संघातजविधिस्त्वेष विज्ञेयो [2]वाद्ययोक्तृभिः ॥ ८६ ॥
[1]द्वावुत्तरौ [2]द्विरधरस्त्वधरादिश्चोत्तरावसानश्च ।
[3]ज्ञेयस्तथोत्तरादिः पुनरप्यधरावसानश्च ॥ ८७ ॥
समवायजस्तथा स्यात्रिरुत्तरस्त्रिरधरश्च विज्ञेयः ।
[1]द्व्यधरोत्तरावसानो [2]द्विरुत्तरस्त्वाधरान्तस्तु ॥ ८८ ॥
[1]प्रागुत्तरो द्विरधरो द्विरुत्तरावसानश्च ।
[2]मध्योत्तरो द्विरधरो द्विरुत्तरोऽप्यधरमध्यश्च ॥ ८९ ॥
अनुबन्धस्तु ज्ञेयो व्याससमासात्त्वनियत एव सदा ।
एवं चतुर्दशविधो[1] नित्यं विस्तारधातुः स्यात् ॥ ९० ॥

[1]रिभितोच्चयनीरटितो ह्रादस्तथानुबन्धश्चैव क्रमात् ।
[2]पञ्चविधो विज्ञेयो वीणावाद्ये करणधातुः ॥ ९१ ॥

81 (C. 81a ; K. 51b) [1]C. om. this hem. [2]K. om. this hem. 82 (C. 81bc ; K. 52) [1]K. करणश्च स्याद. [2]K. स्याद्यन्तकरणाश्रयाः 83 (C. 82 ; K. 53) [1]K. संघातजोऽथ [2]C. °नुबन्धश्च for °नुबन्धकृतः. 84 (C. 83 ; K. 54) [1]K. विधयस्तु स्मृतास्तस्य. C. एव तु. [3]C. om. तौ. 85 (C. 84 ; K. 55) [1]. K. विज्ञेया वै. [2]C. विधिश्चैव. 86 (C. 85 ; K. 56) [1]K. अधश्चोर्ध्वं च ; [2]K. वदनं प्रति for वाद्ययोक्तृभिः. 87 (C. 86 ; K. 57) [1]K. द्वावुत्तरौ [2]K. द्विरधरस्त्वधरादि स्वात्तरावसानश्च [3]K. ज्ञेयः प्रयोत्तरादिः. 88 (C. 87 ; K. 58) [1]K. द्विरथोत्तराधरान्तौ, [2]C. द्विरुत्तर स्वाधरान्तस्तु, K. द्विरधरश्चोत्तरविरामश्च. 89 (C. 88 ; K. 59) [1]K. द्विरथोत्तररवसानोऽधरादिरुत्तर-मुखो द्विरधरश्च. [2]C. उत्तरमध्यश्च तथा मध्ये त्वधरः पुनर्ज्ञेयः. 90 (K. 60) [1]K. °विधौ. 91 (C. 96 ; K. 61) [1]K. रिभिदितीघनीचरदितह्रदीस्ततथानुबन्ध एवं स्यात्, C. रुभिताक्रादश्च तथानुबन्धसंज्ञश्च करणधातुः. [2]K. एवं विधोऽपि for पञ्चविधो.

[1]त्रिकपञ्चकसप्तकनवकघातयुक्तो यथाक्रमं विहितः ।
सर्वैरनुबन्धकृतैर् गुर्वन्तः स्यात् करणधातुः ॥ ९२ ॥

[1]क्षेपप्लुतातिपातोऽतिकीर्णानुबन्धसंज्ञिताश्चेति ।
आविद्धो विज्ञेयो [2]धातुर्वै पञ्चविध एव ॥ ९३ ॥
द्वित्रिचतुष्कैर्नवकैः प्रहारैः क्रमशः [1]कृतैः [2]शनैः
आविद्धधातुर्विज्ञेयस्त्वनुबन्धविभूषितः[3] ॥ ९४ ॥

[1]व्यञ्जनधातुर्ज्ञेयः [2]करतलनिष्कोटितं तथोन्मृष्टम् ।
[3]रेफावमृष्टपुष्पानुस्वनितं [4]बिन्दुरनुबन्धः ॥ ९५ ॥
अङ्गुष्ठाभ्यां [1]समं तन्त्र्या स्पर्शनं [2]यत् कलं तु तत् ।
वामेन पीडनं कृत्वा दक्षिणेनाऽतिरतलम्[3] ॥ ९६ ॥
सव्याङ्गुष्ठप्रहारस्तु निष्कोटितमिहोच्यते[1] ।
[2]सव्यप्रदेशिनीघातमुन्मृष्टमिति संज्ञितम् ॥ ९७ ॥
सर्वाङ्गुलिसमाक्षेपाद्[1] रेफ [1]इत्यभिधीयते ।
कनिष्ठकाङ्गुष्ठाकाभ्यां तु [3]दक्षिणाभ्यामधोगतम् ॥ ९८ ॥
तन्त्रीषु त्रिप्रहारं [1]चाप्यवमृष्टमिति स्मृतम् ।
कनिष्ठाङ्गुष्ठसंयुक्तं पुष्पमित्यभिधीयते ॥ ९९ ॥
तलस्थानेऽ[1]धरन्यासस्त्वनुस्वनितमुच्यते ।
[2]गुर्वक्षरैरेकतन्त्र्यां तु बिन्दुरित्यभिसंज्ञितः ॥ १०० ॥
[1]व्याससमासादेषामनुबन्धः सार्वधातुको ज्ञेयः ।
इति दशविधो प्रयोज्यो वीणायां [2]व्यञ्जनो धातुः ॥ १०१ ॥

92 (C. 97 ; K. 62) [1]C. त्रिकपञ्चकसप्तकनवकैर्घातैर्युक्तो यथाक्रमं विहितः ; K. त्रिकपञ्चकसप्तनवकैर्यथाक्रमं स सुनो भवेद्वाद्ये. 93 (C. 98 ; K. 63) [1]K. क्षेपः स्तुता * * * नियतोऽतिकीर्णमनुबन्धश्चैव. [2]C. धातुर्वाद्यप्रयोगे तु. 94 (C. 99 ; K. 64) [1]K. om. क्रतैः [2]C. om. शनैः [3]K. सानुबन्धविभूषितः. 95 (C. 89 ; K. 65) [1]K. व्यञ्जनधातोः पुष्प'. [2]C. °निष्कोटितान्यथोन्मृष्टम्. K. °निष्कोटितं तमोधृष्टम्. [3]K. रेफानुबन्धसंज्ञोऽनुस्वनितं, C. °ष्यामुस्वरितं. [4]K. बिन्दुरवमृष्टम्. 96 (C. 90 ; K. 66b-67a) [1]C. तु तन्त्रीणां for समं तन्त्र्या, (K. समं तन्त्री). [2]K. य. [3]K. °स्तले for °स्तलम्. 97 (C. 91 ; K. 67b-68a) [1]K. °मिहेष्यते. [2]K. प्रहारो वामतर्जन्यामंगुष्ठमिति संज्ञितम्. 98 (C. 92 ; K. 68b-70a) [1]K. °समाक्षेपे. [2]K. इत्यभिसंज्ञितः [3]K. दक्षिणा × × मधोमुखम्. 99 (C. 93 ; K. 70b, 66a) [1]C. वाप्यवमृष्टमिति स्मृतम्, K. चाप्यवमृष्टं प्रकीर्तितम्. 100 (C. 94 ; K. 69) [1]C. °धरन्यासस्तानध्वनितम्, K. °थतन्त्रीणामनुस्तनितम् [2]K. गुर्वक्षरकृता तन्त्री. 101 (C. 95 ; K. 71) [1]K. व्याससमासा देष्टामनुबन्धः सर्व° [2]K. व्यञ्जको.

इत्येते धातवः प्रोक्ताश्चत्वारो लक्षणान्विताः ।
तिसृणामपि वृत्तीनां [1]यासु वाद्यं प्रतिष्ठितम् ॥ १०२ ॥

[2]तिस्रो गतिवृत्तयः प्राधान्येन ग्राह्याः चित्रावृत्तिर्दक्षिणाश्चेति । तासां वाद्यताललयगीतियतिमार्गप्राधान्यानि यथास्वं व्यञ्जनानि भवन्ति । तत्र चित्रायां संक्षिप्तवाद्यं [मागधी गीतिर् एककल-] [3]स्तालो द्रुतो लयः समा यतिः अनागतग्रहाणां प्राधान्यम् । तथा वृत्तौ [सम्भाविता] [4]गीतिः × वादित्रं द्विकलस्तालो मध्यो लयः स्रोतोगता यतिः समग्रहमार्गाणां प्राधान्यम् । दक्षिणायां [पृथुला] [5]गीतिश्चतुष्कलस्तालो विलम्बितो लयो गोपुच्छा यतिर् [6]अतीतग्रहमार्गाणां प्राधान्यम् ।

तिस्रस्तु वृत्तयश्चित्रादक्षिणावृत्तिसंज्ञिताः ।
वाद्यगीतोभयगुणा निर्दिष्टास्ता यथाक्रमम् ॥ १०३ ॥
सर्वासामेव वृत्तीनां ललिताद्यास्तु जातयः ।
धातुभिः सह [1]संयुक्ता भवन्ति गुणवत्तरा ॥ १०४ ॥
एतेषां धातूनां समवायाज्जातयस्तु जायन्ते ।
[1]स्यादुदात्तललितरिभितघनसंज्ञा[श्च तु] चतस्रश्च ॥ १०५ ॥
तत्रोदात्ता विस्तारधातुविषया बहुविषयताद्धा ।
ललिता व्यञ्जनहेतोर्ललितत्वादेव संप्रोक्ता ॥ १०६ ॥
आविद्धधातुविषया [1]रिभिताघातसञ्चयाद् निर्दिष्टा ।
करणविषया घनसंज्ञा गुरुलघुसञ्चयात्तस्य ॥ १०७ ॥
त्रिविधं [1]वैणकवाद्यं कर्तव्यं गीतसंश्रयं तज्ज्ञैः ।
[2]तत्त्वं तथानुगतमोघश्चानेककरणसंयुक्तम् ॥ १०८ ॥
लयतालवर्णपदयतिगीत्यक्षरभावकं [1]भवेत्तत्त्वम् ।
गीतं च [2]यदनुगच्छेदनुगतमित्युच्यते वाद्यम् ॥ १०९ ॥

102 (C. 100 ; K. 72) [1]K. यस्तु. [2]K. om. this prose passage and gives 103 in its stead. See Bd. p. 151. [3]C. तालद्रुतलय समा यतिः. [4]C. गीतिवादित्रद्विकलतालमध्यलयस्रोतोगता यतिः. [5]C. गीतिचतुष्कलतालविलम्बितलय गोपुच्छा यतिः" [6]C. अतीतमाग्रहमार्गानाम्. 103 (K. 73) 104 (C. 101 ; K. 74) [1]K. संभक्ता for संयुता. 105 (K. 75) [1]K. स्यात्स्यादुदात्त°. [1]106 (K. 76). 107 (K. 77) [1]K. रिभिनर्घातसंचयाद. 108 (C. 102 ; K. 78) [1]C. वैणवं. K. गीते कार्यं वाद्यं वीणासमुद्भवं. [2]K. तत्त्वह्यनुगतमोघश्चानककरणसमायुक्ताः. 109 (C. 103 ; K. 79) [1]K. च य त्तत्त्वम्. [2]K. यदनुगच्छत्यनुगतमिति तद्वैवनवाद्यम.

आविद्धकरणबहुलं [1]उपर्युपरिपाणिकं द्रुतलयं च ।
अनपेक्षितगीतार्थं [2]चौघं बुधैर्ज्ञेयम् ॥ ११० ॥
स्थिते तत्त्वं प्रयोक्तव्यं मध्ये चानुगतं भवेत् ।
द्रुते चौघं प्रयुञ्जीयादेष वाद्यगतो विधिः ॥ १११ ॥
तत्त्वं तु प्रथमे गाने द्वितीयेऽनुगतं[1] भवेत् ।
ओघस्तृतीये कर्तव्यो लयतालविचक्षणैः ॥ ११२ ॥
[1]एवं तज्ज्ञैर्ज्ञेया वीणावाद्ये तु धातवः प्रोक्ता ।
वक्ष्येऽधुना विपञ्चीवाद्यविधाने तु करणार्थम् ॥ ११३ ॥
[1]रूपकृतं प्रतिकृतं प्रतिभेदो रूपशेष ओघश्च ।
षष्ठी [2]प्रतिशुष्का ह्येवं ज्ञेयं करणजातम् ॥ ११४ ॥
[1]वीणावाद्ये द्विगुणं गुरुलाघववादनं भवेद्रूपम् ।
[2]रूपं प्रतिभेदकृतं प्रतिकृतमित्युच्यते वाद्यम् ॥ ११५ ॥
युगपत्कृतेऽ[1]न्यकरणं प्रतिभेदो दीर्घलाघवकृत् स्यात् ।
[2]वीणावाद्यविरामेऽविरतकरणं तु रूपशेषः स्यात् ॥ ११६ ॥
[1]आविद्धकरणयुक्तो ह्युपर्यपरिपाणिकस्त्वोघः[2] ।
[3]प्रतिशुष्का विज्ञेया वाद्ये स चैकतन्त्रिकृता ॥ ११७ ॥
कार्यं [1]ध्रुवा प्रयोगे प्रायेण हि कोणवादनं तज्ज्ञैः ।
[2]द्वाभ्यामपि वीणाभ्यां गाने वा वादने चापि ॥ ११८ ॥
स्थानं वा पात्रं वा स्यात् तन्त्रिषु विभावयेत् समं गानम् ।
तच्चौघतुल्यकरणं वाद्यं कार्यं विपञ्च्यास्तु ॥ ११९ ॥
सप्ततन्त्री [1]भवेच्चित्रा विपञ्ची नवतन्त्रिका ।
[2]विपञ्ची कोणवाद्या स्याच्च् चित्रा चाङ्गुलिवादना ॥ १२० ॥

110 (C. 104, K. 80) [1]K. ह्युपर्युपरिपाणिकं. [2]K. वाद्यं त्वोघे विधातव्यम्. 111 (C. 105.) 112 (C. 106). [1]C. ऽनुगतः. 113 (C. 107 ; K. 118) [1]K. एवमेतत् स्वरकृतं ज्ञेयं वीणाशरीरजम् । विपञ्च्याद्यनुवक्तानि करणानि निबोधत. 114 (C. 108 ; K. 119) [1]C. रूपकृतं. [3]K. वै प्रतिशुष्का त्वेवं विज्ञेयं. 115 (C. 109 ; K.120) [1]KC. वीणावाद्य[0] [2]C. रूपं रूपं for रूपं ; K. रूपमेवानुकृतप्रतिनूनमित्युच्यते वाद्यम्. 116 (C. 110 ; K. 121a, 122a) [1]K. [0]न्यविकरणं प्रतिभो. [2]K. [0]विरामेऽस्य विरतकरणं तु. 117 (C. 111 ; K. 122b) [1]K. [0]करणयोगाद्, [2]K. [0]पाणिकैश्चोद्यः. [3]K. om. this hem. 118 (C. 112 ; K. 123a) [1]K. ध्रुवाविधानेन. [2]K. om. this hem. 119 (C. 113). 120 (C. 114 ; K. 124) [1]K. भवेच्चित्रा विपञ्चीभिभवे तथा [2]K. कोणवाद्या विपञ्ची.

[1]एवं वेद्या तज्ज्ञैर्नानाकरणाश्रया विपञ्ची तु ।
अत ऊर्ध्वं व्याख्यास्ये लक्षणयुक्तं बहिर्गीतम् ॥ १२१ ॥
[1]आश्रावणा तथारम्भो वक्त्रपाणिस्तथैव च ।
[2]संघोटना तथा कार्या पुनश्च परिघट्टना ॥ १२२ ॥
[1]मार्गासारितमन्यत् स्याल्लीलाकृतमथापि वा ।
आसारितानि च तथा [2]त्रिप्रकारकृतानि तु ॥ १२३ ॥
एतानि च बहिर्गीतान्यादौ योज्यानि योक्तृभिः ।
[1]सतालानि ह्यतालानि [2]चित्रवृत्तिगतानि तु ॥ १२४ ॥
प्रयोजनं [1]हि पूर्वोक्तं पूर्वरङ्गविधौ मया ।
[2]तेषां चैव तु वक्ष्यामि लक्षणं सनिदर्शनम् ॥ १२५ ॥

तत्राश्रावणा नाम—

विस्तारधातुविहितैः करणैः प्रविभागशो द्विरभ्यस्तैः ।
[1]द्विश्चापि सन्निवृत्तैः [2]करणोपचयैः क्रमेण स्यात् ॥ १२६ ॥
[1]गुरूणि त्वाद्यावेकादशकचतुर्दशक सपञ्चदशकम् ।
सचतुर्विंशकमेव द्विगुणीकृतमेतदेव स्यात् ॥ १२७ ॥
लघुगुरूणि च [1]ततः षट् तथाष्टमं गुरु भवेत्तथा च पुनः ।
षट् च लघूनि तथान्त्यं गुरु[2][त्रिः]स्यादाश्रावणायां तु ॥ १२८ ॥
त्रिः शम्योपरिपाणौ [1]तालोऽपि ह्येष निर्दिष्टः ।
समपाणौ द्वे [1]शम्ये [च] तालावप्येवमेव स्यात् ॥ १२९ ॥
[1]भूयः शम्या तालावनुगुणादुत्तरस्तथा द्विकलश्च ।
[2]चञ्चत्पुटस्तथा स्यादेवं ह्याश्रावणातालः ॥ १३० ॥

121 (C. 115 ; K. 81) [1]K. reads this couplet as एवं ज्ञेया वैणववाद्यविधाने तु धातवस्तज्ज्ञैः वक्ष्याम्यतःपरमहं निगीतविधानसमवायम्. 122 (C. 116 ; K. 82) [1]C. चाश्रावणा-रम्भविधौ. [2]C. परिघट्टना च विज्ञेया तथा संघोटनैव च. 123 (C. 117 ; K. 83) [1]C. [0]सारितमेव स्यात्. [2]C. विप्रमाणानि वै तथा. 124. (C.118 ; K. 84) [1]CK. सत्त्वान्यलापतालानि. [2]K. चित्तवृत्तौ. C. चित्रवृत्तगतानि. 125 (C. 119; K. 85) [1]K. च तज्ज्ञेयं. [2]K. एतेषां संप्रवक्ष्यामि दर्शनानि यथाक्रमम्. 126 (C. 120 ; K. 86) [1]K. द्विस्त्वपि ; C. विश्वापि. [2]K. करणोपचमैः. 127 (C. 121 ; K. 87) [1]K. गुरूणात्यदावेकादशं च सचतुर्दशं सपञ्चदशम्. [2]K. सचतुर्विंशकामयद्विगुणीकृतमेतदेवस्यात्. 128 (C. 122 ; K. 88) [1]K. स्यादष्ट for ततः षट्. [2]KC. बाह्याश्रावणायां तु. 129 (C. 123 ; K. 89) [1]K. पिच्चोववाममेव चैककवान्. [2]K. साम्यताली वाम्ये चमे वाथ. 130 (C. 124 ; K. 90) [1]K. भूषय (with K. 89b) तालावचयाणापुत्तरस्तथा चैव for 130a. C. [0]तालानुगुणाद्[0], N. [0]तालानुवाणादुः. [2]K. वञ्चत्पुटस्तथा स्यादेवं.

अत्रोदाहरणं—

[3]क्रुं दुं जगति यवलितकजम्बुकम्रुंर तितिसल कुचसलवा दिर्द्रि गणपति । पशुपति कञ्चुक दिद्दे परभुज दिगिनिशि वादिगि वा दिगिगिनि च पशुपति ति च ।

अथारम्भः—

दीर्घान्यादावष्टौ द्वादश च लघूनि नैधनं चैव ।
चत्वारि गुरूणि तथा ह्रस्वान्यष्टौ [1]च दीर्घं च ॥ १३१ ॥
लघुसंज्ञानि [1]चत्वारि [2]द्विगुणीकृतो दीर्घद्वये तदन्ते ।
अष्टौ लघूनि नैधनमित्यारम्भेऽक्षरविधानम् ॥ १३२ ॥

अस्य तु वाद्यं—

कार्यं [1]त्रिपर्वविहितैरुपवहनैरप्यधः समवरोहैः ।
तलरिभितह्लादयुतैः करणैर्विस्तारभूयिष्ठैः ॥ १३३ ॥
अपचययुक्तैर्द्विस्त्रिस्तथा[2]निवृत्तैस्तथा द्विरभ्यस्तैः ।
[3]आरम्भे वाद्यविधिः कार्यस्त्वेवं प्रयोगज्ञैः ॥ १३४ ॥
[1]तालस्त्रिकलस्त्वादौ शम्येककला कलाद्वये तालाः ।
[2]द्विकला च पुनः शम्या तालो द्विकलश्च कर्तव्यः ॥ १३५ ॥
[2]द्विकलश्च सन्निपातः पुनः [1]पितापुत्रकश्च षट्पूर्वः ।
[2]चञ्चत्पुटस्तथा स्यादारम्भे तालसंयोगस्तु ॥ १३६ ॥

[अत्रोदाहरणम्]

[3]म्रुं जं दुडु जगति अवलिनक दिगिवा दिंजेति निकाल कुच कुशजम्बुकं तिनि घा । आगणपति पशुपति [वा आगणपति पशुपति] घा ।

[3]This passage is corrupt and occurs only in K. 131 (C. 125; K. 91) [1]C. om. च. 132 (C. 126; K. 92) [1]K. चतुर्धा [2]K. निधनद्विगुणीकृतानि. दीर्घं (र्घौऽ)न्ते. C. द्विगुणीकृतानि दीर्घे द्व. [3]K. om. this. 133 (C. 127; K. 93) [1]K. °विहितैरुद्वहनैः, NC. °हीनैरथसम(C. स)वारोह. [2]K. तलरिभितद्वभाद्युतैः; C. सुलरहित गुरुयुक्तै. 134 (C. 128; K. 94) [1]C. द्विः कृत्वा च for द्विस्त्रिस्तथा [2]C. निर्वर्तितैर्द्विरभ्यस्तैः [3]K. भारम्भीऽयवतरणत्रिपर्वयुक्तैश्च कर्तव्यः. 135 (C. 129; K. 95a) [1]C. तालत्रिकनात्वादौ शमेग्रककनतातालं द्वयमिताल:. [2]K. om. this hem. except द्विकलाच (95b). 136 (C. 130; K. 100b-101) [1]K. °पुत्रकम्पचपूर्वः. [2]K. विश्वकपुरस्तथा चैत्यारभ्भे ताल-योगस्तु. [3] This passage is corrupt and occurs in K. only.

अथ चक्रपाणिः—

[1]आविद्धकरणयुक्तो द्व्यङ्ग स्यादेककः [2]प्रवृत्तो वा ।
[2]अर्धव्यञ्जनधातुर्वाद्ये ऽप्यथ चक्रपाणिस्तु ॥ १३७ ॥
गुरूणि पञ्च ह्रस्वानि षट् [1]गुरूणि चतुर्गुणः ।
गुरुणी द्वे लघुत्वेकं चत्वार्यथ गुरूणि च ॥ १३८ ॥
चत्वार्यथ लघूनि स्युस्त्रीणि दीर्घाणि चैव हि ।
लघून्यष्टौ च दीर्घं च चक्रपाणौ [1]विधीयते ॥ १३९ ॥
द्विकले [1]मद्रके यत्तु [2]शम्यातालनिपातनम् ।
तत्सर्वं चक्रपाणौ तु [3]मुखे ह्यष्टकलाः स्मृताः ॥ १४० ॥
[1]शम्यातालौ तालशम्ये तेषु कुर्यात् क्रमेण तु ।
तालं शम्या च तालं च सन्निपातं तथैव च ॥ १४१ ॥
तस्याधस्तात् पुनः कार्यं पञ्चपाणिचतुष्टयम् ।
[1]चक्रपाणेरयं तालो मुखप्रतिमुखाश्रयः ॥ १४२ ॥

अत्रोदाहरणम्—

[2]दिङ्गिः क्रुं द्रूं जंबुकगजपतियाः म्रतुड्डादिदुभेये डुघिषि दुनकिटिड्नादुं घट्टु-घट्टकिटिमट्टु ।

अथ संघोटना—

विस्तारकरणैस्त्रिभिश्च चित्रैस्तथा हि वृत्तैश्च ।
त्रिश्चाभ्यस्तोपचयैर्वदन्ति संघोटनावाद्यम् ॥ १४३ ॥
गुरुणी लघून्यथाष्टौ [1]दीर्घं द्वितयं तथा च [2]कर्तव्यम् ।
लघुदीर्घे लघु च पुनश्चतु-[3]र्गुणश्चापि कर्तव्यम् ॥ १४४ ॥

137 (C. 131; K. 104a) [1]K. °युक्ताद्वाङ्गः. [2]C. प्रवृत्ते [2]K. om. this hem. 138 (C. 132, K. 102) [1]K. स्वरश्चतुर्गुणः for गुरूणि चतुर्गुणः. 139 (C. 133, K. 103) [1]K. भवेद्द विधिः for विधीयते. 140 (C. 134; K. 97 ab) [1]C. मन्द्रके. [2]K. °तालादियोजितम्. [3]C. मुखेत्र ह्यष्टौ, K. कार्यमष्टकले मूखे. 141 (C. 135) [1]K. om. this couplet. 142 (C. 136; K. 97c) [1]K. om. this hem. [2]K. This passage is corrupt and occurs in K. only. 143 (C. 139; K. 105) [1]K reads this couplet as follows: विस्तार करणे चित्रद्विविवितिषवर्तीती द्विरभ्यस्तैः। उपाश्रययुक्तौ च सदा वदन्ति संखोटनावाद्यम्. 144 (C. 140; K. 98, 106) [1]C. दीर्घद्वितयं. K. दीर्घं द्विगुणं (द्विगुणे). [2]K. कर्तव्या (106). [3]K. °गुणं संप्रकर्तव्यम्.

पुनरष्टौ [1]ह्रस्वा स्युस्त्वथ गुरुनिधनं तथा कार्यम् ।
[2]संघोटनवस्तुविधौ [3]ज्ञेयं गुरुलाघवविधानम् ॥ १४५ ॥
अधिदण्डां हस्ताभ्यां वीणामुपगृह्य दक्षिणाङ्गुल्या ।
[2]अङ्गुष्ठाभ्यां च सदा कार्यं संघोटनावाद्यम् ॥ १४६ ॥
संघोटने स्वराणां संवादिविवादिनश्चापि ।
[2]संघोटनात् त्वभिहिता शेषानुवादिभिश्चैव ।
[3]अस्यास्तालः शीर्षकवत् पञ्चपाणिविहितः ॥ १४७ ॥

[अत्रोदाहरणम्]

[1]झंडं जगति यचलित कडु डुडुंडुं महायोगि श्रुक कपाल यासुपति गणपतिक ।

अथ परिघट्टना—

दीर्घाण्यादावष्टौ लघुनी [1]कुर्यात् पुनर्द्विगुणितानि ।
[2]ह्रस्वान्यापि चत्वारि द्विगुणानि स्युः सदीर्घाणि ॥ १४८ ॥
षोडश लघूनि च स्युः [1]सगुरुण्यन्ते तथैव कार्याणि ।
[2]एष सपरिघट्टनाया [3]गुरुलघुवस्तुक्रमः प्रोक्तः ॥ १४९ ॥
[1]वाद्यं चास्य तज्ज्ञैः [2]सोपवहनं हस्तलाघवात् कार्यम् ।
व्यञ्जनधातुसमुत्थं [3]नानाकरणाश्रयोपेतम् ॥ १५० ॥
[1]संपक्केष्टाकः स्यात्तालः करणैस्तु धातुसंयुक्तैः ।
[2]गुरुलघुयोगादेवं विहितं कार्यं बुधैर्नित्यम् ।

अथ मार्गासारितम्—

[3]चत्वारि गुरूणि स्युर्लघूनि चत्वार्यथ द्विगुणितानि ॥ १५१ ॥

145 (C. 141 ; K. 99, 107) [1]K. ह्रस्वानि स्युरिह तथा (पुनरष्टौ ह्रस्वानिस्यस्तु ते) नैधनं च (तथा) कर्तव्यम् (कार्यम्) [2]C. संघोटनंवस्तु⁰ K. संखोटनवस्तु⁰ [3]C. विज्ञेयं, K. ह्रस्वगुरुविधिः समुद्दिष्टः. 146 (C. 137 ; K. 100a) [1]K. has only अधिदण्डहस्त and not the rest. 147 (C. 138, 142a ; K. 104b-105a) [1]K. संखोटय स्वरं यादिना तु संवादिना तथाधिवलम् । [2]K. समवायिभिश्च शेषा नतु वादिभिरल्पकैशांशैः. 148 (C. 143b, 144a ; K. 109) [1]C. च द्वे गुरूण्यपि च कुर्यात्. [2]C. लघुनी द्वे सर्वाणि गुरूणि सहैव दीर्घेण. 149 (C. 144b, 145a ; K. 110a) [1]K. सहनिधनगतेन वात्र कार्याणि. [2]C. एष स परिघट्टनायां. [3]K. ⁰लघुवस्तुक्रमः. 150 (C. 142b, 143a ; K. 111) [1]C. परिघट्टनासमत्वं वाद्यं तथास्त लाघवात् कार्यम्. [2]K. सोदृहुलं. [3]K. नानाकारणा⁰. 151 (C. 145b, 146a ; K. 112) [1]KC. संपिष्टकवज्ञाया. [2] C. om. ... and has मार्गासारि for it

[1]गुरूणि लघूनि चाष्टावन्त्यं गुरु चेति ।
[2]गुरुणि च लघूनि तथा स्युर्मार्गासारिते [3]च वस्तूनि ॥ १५२ ॥
[1]मार्गासारिते [2]वाद्यं विस्ताराविद्धकरण संयुतम् ।
तालैः सकलैरथ [3]गुरुलघु सञ्चये स्यादयम् ॥ १५३ ॥

अत्रोदाहरणम्—

[4]दिग्लत्संद्धं जगति पचतिनकदिह्ने संडुं ।

अथवा—

चत्वारि तु गुरूणि स्युर्ह्रस्वान्यष्टौ भवन्ति हि ।
गुरूणि तथा ह्रस्वानि दीर्घमन्त्यमथापि वा ॥ १५४ ॥

अत्राप्युदाहरणम्—

दिकं टुं जगति यवति यचलि । झं दुं तिति झल कुल तिति वा ।

अथ लीलाकृतम्—

[1]कनिष्ठासारितविधौ चास्य तालश्रवणमधुराणि लीलाकृतानि च ।
[2]अभिसृतपरिसृतानि तान्यर्थवशादिह कर्तव्यानि प्रयोगज्ञैः ॥ १५५ ॥

अथासारितानि ज्येष्ठमध्यकनिष्ठानि । तानि च [3]तालमानप्रमाणनिर्दिष्टानि तालविधाने यथाक्रमं [4]व्याख्यास्ये ।

[1]एवमेतत् स्वरगतं ज्ञेयं वीणाशरीरजम् ।
अत ऊर्ध्वं प्रवक्ष्यामि सुषिरातोद्यलक्षणम् ॥ १५६ ॥

इति भारतीये नाट्यशास्त्रे [2]ततातोद्यविधानं नाम एकोनत्रिंशोऽध्यायः ॥

152 (C. 147 ; K. 114b) [1]K. om. this hem. [2]K. ह्रस्वानि गुरूणि तथा. [3]K. ह्येवम्. 153 (C. 146 ; K. 113) [1]C. gives only मार्गासारि in 146b and विस्ताराविद्ध······संयुतम् in 146a. [2]K. पाद्यं for वाद्यं. [3]K. गुरुलघुसञ्चयस्यायम्. [4]This passage is corrupt and is in K. only. 154 (K. 115) [1]C. om. from here to तिति वा and adds वालासारितश्चैव ताभौ स्य परिकीर्तिता. 155 (C. 148 ; K. 117) [1]K. om. कनिष्ठासारिताविधौ चास्य ताल. [2]K. सृतपरिसृतेतरकृतानि. C. चाभिकृतपरिवृत्तानि. [3]K. तलप्रमाणनिर्दिष्टानि. [4]K. व्याख्यामः. 156 (C. 149 ; K. 118a, 125) [1]K. reads this as follows : ततवाद्यविधानमिदं सर्वं प्रोक्तं मया समासेन । वक्ष्याम्यतश्च भूयः शुषिरातोद्यस्य लक्षणम्. N. एवं स्वरगतं ज्ञेयं वीणाशारीरसंभवम् । अतःपरं. [2]K. ततावद्येतिजातिविधानो नामाध्यायः एकोनत्रिंशत्तमः.

त्रिंशोऽध्यायः

[1]आतोद्यं सुषिरं नाम ज्ञेयं [2]वंशकृतं बुधैः ।
वैण एव विधिस्तत्र [3]स्वरग्रामसमाश्रयः ॥ १ ॥
द्विकत्रिकचतुष्कास्तु ज्ञेया वंशगताः स्वरा ।
[1]कम्पमानार्धमुक्ताश्च व्यक्तमुक्तास्तथैव च ॥ २ ॥
तत्रोपरि यथा [1]ह्येकस्वरो वैणः [2]स्वरान्तरे ।
[3]प्राप्नोत्यन्यत्वमेवेह तथा वंशगतोऽपि हि ॥ ३ ॥
द्विकत्रिकचतुष्को वा [1]स्वरः स्याच्छ्रुतिसंख्यया ।
[2]अ[न्वी]रणात् तु शेषाणां स्वराणामपि सम्भवः ॥ ४ ॥
[1]स्वराणां च श्रुतिकृतं चतुस्त्रिद्विभिश्च लक्षणम् ।
[2]अङ्गुलि[पात]नकृतं तच्च मे सन्निबोधतः ॥ ५ ॥
व्यक्तमुक्ताङ्गुलिस्तत्र स्वरो ज्ञेयश्चतुःश्रुतिः ।
कम्पमानाङ्गुलिश्चैव त्रिश्रुतिः परिकीर्त्यते ॥ ६ ॥
[1]द्विकोऽर्धाङ्गुलिमुक्तस्तु एवं श्रुत्याश्रिताः स्वराः ।
[2]एते स्युर्मध्यमग्रामे भूयः षड्जाश्रिताः पुनः ॥ ७ ॥
व्यक्तमुक्ताङ्गुलिकृता षड्जमध्यमपञ्चमाः ।
धैवतश्चार्षभश्चैव [1]कम्पमानाङ्गुलिकृतौ ॥ ८ ॥
[1]अर्धमुक्ताङ्गुलिश्चैव गान्धारोऽथ निषादवान् ।
[2]स्वरसाधारणे चापि [3]काकल्यन्तरसंज्ञके ॥ ९ ॥

1 (C. 1 ; K. 1) [1]C. आद्यं तु for आतोद्यं. [2]K. वंशगतं. [3]K. स्वरग्राम्य⁰. 2 (C. 2 ; K. 2) [1]C. कम्पितोऽर्ध⁰. 3 (C. 3 ; K. [1]K. ह्येकः स्वरो. [2] K.स्वरोत्तरे. [3]K. ⁰त्वमिवाह. 4 (C. 4 ; K. 4) [1]K. श्रुतिसंख्या भवेत् स्वरः. [2]CK. अनीरणात्. 5 (C. 5a ; K. 5a) [1]K. om. this hem. and C. reads only स्वराणां च in it. N. चतुर्द्विस्त्र(स्त्रि)श्च लक्षणम्. [2]KC. अङ्गुलिवादनकृतं. C. om. 6 (C. 5b-6a ; K. 5b-6a). 7 (C. 6b-7a ; K. 6b-7a) [1]K. द्विकार्धाङ्गुलिमुक्तः स्यादिति श्रुत्याश्रिता. [2]C. एते तु मध्यमः. 8 (C. 7b-8a ; K. 7b-8a) [1]C. ⁰ङ्गुलीकृता. 9 (C. 8b ; K. 8b-9a) [1]C. om. this hem. [2]K. साधारणं. [3]K. वान्तरस्वरसंस्थया for काकल्यन्तरसंज्ञके.

निषादगान्धारयोश्च षड्जमध्यमयोरपि ।
विपर्ययः सन्निकर्षे श्रुतिलक्षणसिद्धितः[1] ॥ १० ॥
[1]वैणकण्ठप्रदेशेन सिद्धा [2]वंशाश्रिताः स्वराः ।
यं यं [3]गीतः स्वरं गच्छेत् तं तं वंशेन वादयेत् ॥
[4]शारीरवैणवंशानाम् एकीभावः प्रशस्यते ॥ ११ ॥
[1]अविचलितमविकृष्टं वर्णालङ्कारसंयुतं मन्द्रम् ।
विधिव[2]ल्ललितं मधुरं वेणोरेवं स्मृतं वाद्यम् ॥ १२ ॥
एवमेतत्स्वरकृतं विज्ञेयं वंशयोक्तृभिः ।
अत ऊर्ध्वं प्रवक्ष्यामि [1]घनातोद्यविकल्पनम् ॥ १३ ॥

इति भारतीये नाट्यशास्त्रे सुषिरातोद्यविधानं नाम त्रिंशोऽध्यायः ।

10 (C. 9 ; K. 9b-10a) [1]K. ⁰सिद्धिदः. 11 (C. 10 ; K. 10b-11a) [1]C. वेणुदण्डप्रवेशेन. [1]K. वैणक तु प्रवेशेन. [2]K. कण्ठाश्रिताः. [3]K. गीता. C. गतः. [4]C. शारीरवंशवैणानाम्. 12 (C. 11 ; K. 12) [1]C. अविचलितमविच्छिन्नं. [2]C. मन्दं विधिललित मधुरं for ललितं मधुरं स्निग्धं. 13 (C. 12 ; K. 13) [1]K. तालवाद्य⁰ for घनातोद्य⁰.

एकत्रिंशोऽध्यायः

[1]तालो घन इति प्रोक्तः [2]कलापातलयान्वितः ।
[3]कलास्तस्य प्रमाणं वै विज्ञेयं [4]तालयोक्तृभिः ॥ १ ॥
या लौकिकी कला काष्ठा [1]निमेषश्च स्मृता बुधैः ।
न सा तालकला ज्ञेया ह्यन्येषा तालजा कला ॥ २ ॥
निमेषा पञ्च मात्रा [1]स्यान्मात्रायोगात् [2]कला स्मृता ।[3]
निमेषा पञ्च विज्ञेया गीतकाले कलान्तरम् ।
ततः कलाकालकृतो लय इत्यभिसंज्ञितः ॥ ३ ॥
त्रयो लयास्तु विज्ञेया द्रुतमध्यविलम्बिताः ।
[1]यस्तत्र तु लयो [2]मध्यस्तत्प्रमाणकला स्मृता ॥ ४ ॥
त्रिविधा सा च विज्ञेया [1]त्रिमार्गनियता बुधैः ।
चित्रे द्विमात्रा कर्तव्या [2]वृत्तौ सा द्विगुणा स्मृता ॥ ५ ॥
चतुर्गुणा दक्षिणे स्यादित्येवं त्रिविधा कला ।
कलाकालप्रमाणेन ताल [1]इत्यभिसंज्ञितः ॥ ६ ॥
[1]चतुरस्रश्च त्र्यस्रश्च तालो द्विविध एव हि ।
द्विविधस्यापि तालस्य [2]चैका प्रकृतिरिष्यते ॥ ७ ॥
तथा योनिद्वयं [1]चास्य कीर्त्यमानं निबोधत ।
[2]चञ्चत्पुटस्तु विज्ञेयो तथा [3]चापपुटोऽपि च ॥ ८ ॥
[1]चतुष्कलोऽथ द्विकलस्तालो यस्मात् प्रवर्तते ।
चतुरस्रस्तु [2]विज्ञेयस्तालश्चञ्चत्पुटो बुधैः ॥ ९ ॥

1 (C. 1 ; K. 1) [1]K. वाद्य तूर्यायन for तालो घन इति. [2]M. कालपात°. [3]CM. कालस्य तु प्रमाण. [4]K. तालयोगतः. 2 (C, 2 ; K. 2) [1]C. निमेषाश्च स्मृता. 3 (C. 3-4a ; K. 3) [1]CM. स्यामात्रायोगात्. [2]M. कलौ. [3]K. om. 3b. 4 (C. 4b-5a ; K. 4) [1]C. य स्तत्र मन्द्रीऽथलयस्तत्. [2]M. °स्तत्प्रमाणा. 5 (C. 5b-6a ; K. 5b-6a) [1]K. त्रिमार्गनियमा. [2]C. वार्त्तिके for वृत्तौ सा. 6 (C. 6b-7a ; K. 6b, 5a) [1]K. इत्यभिसंज्ञितः. 7 (C. 7b-8a ; K. 7) [1]K. त्र्यस्रश्च चतुरस्रश्च स तालो द्विविधः स्मृतः. [2]K. त्वेका. 8 (C. 8b, 9a) K. 8) [1]K. ताला चान्यमान निबोधत. [2]M. चञ्चत्पुट°. K. चञ्चपुट° [3]M. चाचपुट, K. चापपुटा बुधैः. 9 (C. 9b, 10a ; K. 9a) [1]K. om. 9a. [2]K. चञ्चपुट. M. °श्चञ्चत्-

[1]त्र्यस्रश्चापपुटश्चैव गुरुलघ्वक्षरान्वितः ।
[2]प्रथमं गुरुणी कृत्वा लघु चान्त्यं प्लुतं तथा ॥ १० ॥
[1]अक्षराणां निवेशेन स तु चञ्चत्पुटस्तदा ।
आदौ गुर्वक्षरं यत्र [2]लघुनो गुरु चैव हि ॥ ११ ॥
त्र्यस्रः स खलु विज्ञेयस्तालश्चापपुटो[2] भवेत् ।
अनयोर्मिश्रभावाच्च मिश्रस्तालः प्रकीर्तितः ॥ १२ ॥
[1]षट्पितापुत्रकश्चैव पञ्चपाणिः स चेष्यते ।
यथोक्तैरभिनिष्पन्नः स्वसंज्ञागुरुलाघवैः ॥ १३ ॥
समासयोगात्तालोऽयं त्रिविधः परिकीर्तितः ।
सन्निपातस्ततः शम्या तालः शम्या [1]अथापि वा ॥ १४ ॥
शम्यातालौ द्विरभ्यस्तौ तालशम्ये [1]तथैव च ।
सन्निपातादिको ज्ञेयः शम्यादिश्च तथापरः ॥ १५ ॥
[1]तालादिश्च त्रिभिर्भेदैः पुनश्चञ्चत्पुटो भवेत् ।
[2]सन्निपातादिको नाट्ये चतुरस्रो भवेदयम् ॥ १६ ॥
शम्यादिकस्तु विज्ञेयस्तज्ज्ञैरासारितादिषु[1] ।
तालादिकस्तथा प्रोक्तो विद्वद्भिः पाणिकादिषु ॥ १७ ॥
[1]चञ्चत्पुटस्य ये [2]भेदा सन्निपातादयस्त्रयः ।
त एव भेदा विज्ञेया [3]बुधैश्चापपुटे पृथक् ॥ १८ ॥
[1]सन्निपातादिकस्त्वस्य [2]बलवानितरेऽपि च ।
[3]षट्कलोऽष्टकलश्चैव तालो ह्यस्मात् प्रवर्तते ॥ १९ ॥
शम्यातालप्रवेशेन [1]त्र्यस्रोऽन्योऽपि विधीयते ।
षट्पितापुत्रककृतः पञ्चपाणिरुदाहृतः ॥ २० ॥

10 (C. 10b ; K. 9b, 10a) [1]K. त्र्यस्रश्चञ्चपुटश्चैव. C. om. 9a ; [2]K. आदौ द्वे गुरुणी यस्य लघुकं प्लुतमेव च (See Kn. on SR. V. 19) 11 (C. 11b ; K. 10b, 11a) [1]C. has for 11a कुर्यात् चञ्चत्पुटस्यैव बुधश्चापपुटस्य तु. [2]K. अन्ते लघुनि चैव हि (See Kn. on SR. V. 19). 12 (C. 12 ; K. 11b, 17) [1]K. °स्तालश्चञ्चपुटाश्रयः. 13 (C. 13) [1]K. om. 13. 14 (C. 14a ; K. 12a) [1]K. मथापि. 15 (C. 14b, 15a ; K. 12b) [1]C. तथापि वा. 16 (C. 15b, 16a ; K. 13a) [1]C. तथा तालादिभिर्भावैर्युग्मश्चञ्चत्पुटोभवेत्. [2]K. om. 16b. 17 (C. 16b, 17a ; K. 13b, 14a) [1]C. °रासादि (रि) तेषु च. 18 (C. 17b, 18a ; K. 14b, 15a) [1]C. चञ्चत्पुटस्य. [2]K. भावाः for भेदाः [3]K. °श्चञ्चपुटस्य च. 19 (C. 18b ; K. 15b, 16a) [1]K. °स्तस्य C. °स्तस्य for स्त्वस्य. [2]K. °न्नं तरतथा. [3]C. om. 19b. 20 (C. 19 ; K. 17b, 18a) [1]K. अन्योऽस्ति पि for त्र्यस्रोऽन्योऽपि.

आद्यं प्लुतं द्वितीयं [1]तु लघु यत्राक्षरं भवेत् ।
तृतीयं च चतुर्थं च [2]गुरुणी पञ्चमं लघु ॥ २१ ॥
प्लुतान्तः षट्पितापुत्रो गुरुलाघवसंयुतः ।
[1]पञ्चपाणिः स विज्ञेयः षट्पातस्तु षडक्षरः ॥ २२ ॥
[1]सन्निपातस्ततस्तालः शम्या तालस्तथैव च ।
[2]शम्या चैव हि तालश्च षट्पातस्तस्य कीर्तितः ॥ २३ ॥
[1]तालादिस्त्र्यस्त्रभेदोऽन्यः [2]संपर्केष्टाकसंज्ञितः ।
[3]गुरुपञ्चाक्षराद्यन्त्यप्लुतमात्रासमन्वितः ।
[4]सन्निपातस्ततः शम्या ताल शम्यैकतालकः ॥ २४ ॥
त्र्यस्त्रं सर्वगुरुं कृत्वा [1]निष्क्रामं तत्र योजयेत् ।
शम्याद्वयं ततस्त्वेष [2]उद्घट्टः कथितो बुधैः ॥ २५ ॥

[1]एवमेककलो ज्ञेयः [2]शुद्धश्चञ्चत्पुटादिक ।
यथाक्षरोऽथ [3]द्विकलस्तथा चैव चतुष्कलः ॥ २६ ॥
त्रयो भेदा हि [1]तालस्य द्विगुणा द्विगुणाः स्मृताः ।
चतुरस्त्रस्त्रिभिर्भेदैस्तालस्तु परिकीर्तितः ॥ २७ ॥
चतुष्कलो ह्यष्टकलः [1]कलाषोडशकः पुनः ।
त्र्यस्त्रस्तालस्तु [2]षट्भेदास्त्रिकलः षट्कलस्तथा ॥ २८ ॥
[1]कलाद्वादशकोऽपि स्याच्चतुर्विंशतिकस्तथा ।
[2]कलाष्टचत्वारिंशत्कं कला षण्णवती तथा ॥ २९ ॥
तालो [1]नवविधश्चायमयुग्मः सम्प्रकीर्तितः ।
[2]द्विप्रकारस्त्वयं तालो निःशब्दः शब्दवांस्तथा ॥ ३० ॥

21 (C. 20 ; K. 18b-19a) [1]K. च. [2]K. गुरुणि. 22 (C. 21a ; K. 19b, 20a) [1]C. om. 22b. 23 (C. 21b, 22a ; K. 20b, 21a) [1]C. षस्मादौ सन्निपातः स्यात् तालशमिातरः परम्. [2]C. तालशमिा च तालश्च षट्पाताश्च प्रकीर्तिताः. 24 (C. 22b, 23 ; K. 21b, 22a) [1]K. तालादिस्त्र्यस्त्रभेदो, C. तालादिस्त्र्यस्त्रभेदे [2]K. संपत्केष्टक. [3]C. गुरुसर्वाक्षरो यस्तु प्लुतादन्तः प्रकीर्तितः. 25 (C. 24 ; K. 22b, 23a) [1]K. निष्कामं. [2]K. तद्दङ्. [3]K. om. 25c. 26 (C. 25 ; K. 26b) [1]C. एकमेककलो, K. om. 26a. [2]C. श्चञ्चत्पुटा⁰ [3]K. ⁰स्तथैव च for ⁰स्तथा चैव. 27 (C. 26 ; K. 27) [1]K. लस्याथ for तालस्य. 28 (C. 27 ; K. 28) [1]C. कलषोडशकः, K. कलाः षोडश चैव हि. 29 (C. 28 ; K. 29) [1]K. कला द्वादश चैवास्यश्चतुर्विंशतिरेव च. [2]K, चत्वारिंशत्तथाष्टौ च तथा षण्णवतिः कला. 30 (C. 29 ; K. 29a) [1]K. ⁰मांगं समासात परिकीर्तितः. [2]K. om. this hem.

[1]प्रयोगं द्विविधं चास्य कीर्त्यमानं निबोधत ।
[2]तत्रावापोऽथ निष्क्रामो विक्षेपश्च प्रवेशकः ॥ ३१ ॥
चतुर्विकल्प इत्येवं निःशब्दः [2]परिकीर्तितः ।
शम्या तालो ध्रुवश्चेति सन्निपातस्तथा [3]परः ॥ ३२ ॥
इति शब्देन संयुक्तो विज्ञेयश्च चतुर्विधः ।
[2]एतेषामथ वक्ष्यामि हस्ताङ्गुलिविकल्पनम् ॥ ३३ ॥
[1]लक्षणञ्च प्रमाणञ्च यथावदनुपूर्वशः ।
[2]ऊर्ध्वाङ्गुलिसमाक्षेप आवाप इति संज्ञितः ॥ ३४ ॥
[1]निष्क्रामोऽधोगतस्य स्यादङ्गुलीनां प्रसारणम् ।
तस्य दक्षिणतः [2]क्षेपो विक्षेपः परिकीर्तितः ॥ ३५ ॥
[1]निवर्तनं च हस्तस्य प्रवेशोऽधोमुखस्य तु ।
[2]कृत्वाङ्गुलीनामाक्षेपं निष्क्रामं च भवेदथ ॥ ३६ ॥
[1]विक्षेपश्च पुनः कार्यः पुनश्चैव प्रवेशनम् ।
यदा चतुष्कलो योगस्तदा त्वेष [2]विधिर्भवेत् ॥ ३७ ॥
[1]निष्क्रामश्च प्रवेशश्च द्विकले परिकीर्तितौ ।
एषामन्तरपातास्तु पातसंज्ञा प्रकीर्तिताः ॥ ३८ ॥
शम्यातालश्च विज्ञेयः सन्निपातस्तथैव च ।
[1]शम्या दक्षिणहस्तस्य तालः पातस्तु वामतः ।
हस्तयोस्तु समः पातः सन्निपात इति स्मृतः ॥ ३९ ॥
[1]ध्रुवस्तु [2]मात्रिकः पातः रागमार्गप्रयोजकः ।
कला यास्त्रिविधा प्रोक्ता [2]तासां पातो ध्रुवः स्मृतः ॥ ४० ॥

31 (C. 30 ; K. 30b) [1]K. om. this hem. [2]K. तत्र चालाप निष्कामौ विक्षेपोऽथ प्रवेशनम्. 32 (C. 31 ; K. 31) [1]K चतुर्द्विकल. [2]K. परिकीर्तितः. [3]K. परे. 33 (C. 32 ; K. 32) [1]C. चतुर्विधम्. [2]K. एतेषां चैव. 34 (C. 33 ; K. 33a) [1]K. om. this hem. [2]C. सर्वाङ्गुलि समाक्षेपः आवाप, K. उत्तानाङ्गुलिसंकोच आलाप. 35 (C. 34 ; K. 33b. 34a) [1]K. निष्कामोऽधोगतस्य स्याददङ्गुलीनां ; C. निष्कामोऽधोगतस्यादङ्गुलीनां. [2]C. क्षेपात्. [3]K. इति संज्ञितः for परिकीर्तितः. 36 (C. 35 ; K. 34b) [1]MN. विकर्तनं. [2]K. om. 36b. 37 (C. 36 ; K. 35a, 36b) [1]K. om. 37a. [2]K. विधिस्मृतः. 38 (C. 37 ; K. 35b ; 36a) [1]K. निष्कमश्च. [2]K. द्विकले. 39 (C. 38, 39a ; K. 36b, 37a) [1]K. om. 39a and has for 39b सहव्यस्त निपातस्तु सम्यताल (शम्याताल) श्च वामतः. 40 (C. 39b, 40a ; K. 37b) [1]K. om. 40a. [2]K. ⁰N. मात्रिक, C. माद्रिक. [3]K. तस्याः.

यथाक्षरस्य तालस्य [1]स तु गुर्वक्षरो [2]भवेत् ।
यथाक्षरकृतैः पात-[3]स्तालो ज्ञेयो [4]यथास्थितः ॥ ४१ ॥
[1]गुर्वक्षरैश्च विश्लिष्टैः स [2]एव द्विकलो भवेत् ।
द्विर्भावो द्विकलस्यैव विज्ञेयस्तु चतुष्कलः ॥ ४२ ॥
[1]यथाक्षरकृताः पाताः सर्वैरेव प्रकीर्तिताः ।
[2]चञ्चत्पुटस्य विज्ञेयस्तथा चापपुटस्य च ॥ ४३ ॥
पञ्चपाणेश्च विहिताः भेदा ह्येते त्रयः स्मृताः ।
व्युदस्य [2]युग्ममोजं ये पञ्च ताला भवन्ति हि ॥ ४४ ॥
मिश्रा [1]गीताङ्गसंयुक्ता ज्ञेया [2]ह्युद्घट्टकादयः ।
कला पञ्च तथा सप्त पुनर्नव च कीर्तिताः ॥ ४५ ॥
[1]दश चैकादशैते च संकीर्णा समुदाहृताः ।
न ह्येषामुपयोगोऽस्ति सप्तरूपे [2]ध्रुवास्वपि ॥ ४६ ॥
प्रवृत्तादिषु कर्तव्या एते [1]गानप्रयोक्तृभिः ।
त्र्यस्रश्च चतुरस्रश्च षट्कलोऽष्टकलस्तथा ॥ ४७ ॥
ध्रुवाणां तु [1]भवेत्तालं संप्रवक्ष्यामि तत्त्वतः ।
कनिष्ठाङ्गुलिनिष्क्रामो [2]शम्याश्चैव ततो भवेत् ॥ ४८ ॥
कनिष्ठिकानामिकाभ्यां तु [1]निष्क्रामोऽतो विधीयते ।
[2]ततस्तालस्तु कर्तव्यः शम्या चैव तु पञ्चमी ॥ ४९ ॥
प्रवेशो [1]मध्यमाङ्गुष्ठे कर्तव्यस्तर्जनीकृतः ।
[2]निष्क्रामः सन्निपातोऽन्त्ये नित्यमष्टकलो भवेत् ॥ ५० ॥

41 (C. 40b, 41a ; K. 38) [1]K. सरी. [2]C. स्मृतः [3]स्ताले. [4]K. यथाचरः. 42 (C. 41b, 42a ; K. 39) [1]K. [0]चरैस्तु. [2]K. नव[0]. [3]K. द्विर्भावा. 43 (C.42b, 43a) [1]C. यदाचरकृतैः पातै. [2]MN. चञ्चत्पुटस्य. K. om. 43. 44 (C. 43b, 44a, K. 23b) [1]C. युग्मराजं वै. K. युग्मतो ये च. 45 (C. 44b, 45a ; K. 24) [1]C. [0]संयुक्तात्. [2]C. ह्युद्घट्टकदयः. K. ह्युद्घड्डकादयः. 46 (C. 45b, 46a ; K. 25) [1]K. दशैकादश चैवैते. K. ध्रुवासु च. 47 (C. 46b, 47a ; K. 26a ; 40a) [1]K. भूयः. 48 (C. 47b, 48a ; K. 40b, 41a) [1]K. [0]त्तालैस्तं च वक्ष्यामि. [2]K. सम्या चैव. 49 (C. 48b, 49a, K. 41b, 42a) [1]C. निष्क्रामौऽतौ. [2]K. ततश्च तालः कर्तव्या. 50 (C. 49b, 50a ; K. 42b, 43a) [1]N. मध्यमोङ्गुष्ठ, K. ह्यष्टमी षष्ठः. [2]C. निष्क्रामो सन्निपातोऽन्त्या. K. निष्क्रामसन्निपाताऽन्त्या.

एष युग्मे [1]कलापातविकल्पोऽङ्गुलिभिः कृतः[2] ।
कनिष्ठाङ्गुलिनिष्क्रामः प्रथमे [1]तु कला भवेत्[3] ॥ ५१ ॥
शम्यापातो [1]द्वितीया तु तृतीया ताल एव च ।
शम्या तत्र चतुर्थी तु पञ्चमो तर्जनीक्रमात् ॥ ५२ ॥
षष्ठश्च सन्निपातः स्यादेष वै षट्कलो विधिः ।
[1]एष त्र्यस्रे कलापातविकल्पोऽङ्गुलिभिः कृतः ॥ ५३ ॥
कनिष्ठाङ्गुलि निष्क्रामः प्रवेशश्च तथा भवेत् ।
कनिष्ठानामिकास्थाने [1]ततस्तालस्तृतीयकः ॥ ५४ ॥
[1]शम्यापातश्चतुर्थी तु निष्क्रामो मध्यमाकृतः ।
[2]षष्ठस्तालस्ततो ज्ञेयो निष्क्रामस्तर्जनीकृतः ॥ ५५ ॥
शम्याष्टमी ततस्तालो नवमी तु कला स्मृता ।
[1]कनिष्ठिका प्रवेशस्तु दशमी तु कला भवेत् ॥ ५६ ॥
निष्क्रामश्चैव तर्जन्या तदनन्तरमिष्यते ।
[1]सन्निपातस्तथान्ते च कलाद्वादशकं भवेत् ॥ ५७ ॥
एष [1]त्वावापविक्षेपव्यवधानेन पण्डितैः ।
विधिश्चतुष्कलो ज्ञेयः प्रागुक्ताङ्गुलिभिः कृतः ॥ ५८ ॥
[1]द्विकलश्चतुष्कलश्च पादभागः प्रकीर्तितः ।
चत्वारः पादभागाश्च मात्रेति परिभाष्यते ॥ ५९ ॥
[1]चञ्चत्पुटस्य तालस्य तथा चापपुटस्य च ।
पञ्चपाणेश्च विज्ञेया भेदा ह्येते पृथक् पृथक् ॥ ६० ॥
[1]एवमेष मया तालः समासात् [2]परिकीर्तितः ।
आसारिते वर्धमाने [3]गीतांगेषु च यः स्मृतः ॥ ६१ ॥

51 (C. 50b, 52b ; K. 43b, 44a) [1]CMN. कलोपेतो (M. [0]तं, N. [0]त.) [2]K. तु कलो. [3]MN. put C. 52b-54a after C. 50a. [3]C. प्रथमानुकलो. 52 (C. 53 ; K. 44b, 45a) [1]C. द्वितीये. [2]C. तृतीये. 53 (54a ; K. 45b, 46a) [1]C. om. 53b. 54 (C. 51 ; K. 46b, 47a) [1]K. तालो ज्ञेयस्तृतीयकः. 55 (C. 52a, 54b ; K. 47b, 48a) [1]C. शम्याताल[0]. [2]K. षष्ठस्तालतथा. 56 (C. 55 ; K. 48b, 49a) [1]C. [0]प्रदेशस्तु for प्रवेशस्तु. 57 (C. 56 ; K. 49b, 50a) [1]K. [0]स्तथा ते च. [2]NC. कल (N. [0]ला) द्वादशके. 58 (C. 57 ; K. 50b, 51a) [1]K. तो वापविक्षेप व्यवधानश्च. 59 (K 51b ; 52a) [1]C. om. this altogether. 60 (K. 52b, 53a) [1]C. om. this couplet. 61 (C. 58 ; K. 53b, 54a) [1]MC. एवमेव. [2]C. समुदाहृतः. [3]K. गीतेष्वपि हि यः स्मृतः.

[1]अथासारितकानां तु संप्रवक्ष्यामि लक्षणम् ।
[2]भेदश्चञ्चत्पुटस्यादौ तथा गुरुलघुप्लुतैः ।। ६२ ।।
पञ्चपाणिं ततः कुर्याद् द्विरभ्यस्तं प्रयोगवित् ।
यथाक्षरं तु [1]पूर्वत्र यथावद्विनिवेशयेत् ।। ६३ ।।
शम्यातालः पुनश्चैव शम्यातालमथापि वा ।
आद्येऽक्षरे सन्निपातं [1]पञ्चपाणेश्च योजयेत् ।। ६४ ।।
[1]तालं शम्यां च तालं च शम्यातालौ ततः परम् ।
एष एव द्वितीयेऽपि [2]पञ्चपाणौ विधिः स्मृतः ।। ६५ ।।
[1]प्लुतस्यान्तेऽपि तस्येष्टः सन्निपातः प्रयोक्तृभिः ।
एवं यथाक्षरं ज्ञेयं कनिष्ठासारितं बुधैः ।। ६६ ।।
यथाक्षरस्याक्षरैश्च [1]तालपातान् निबोधत ।
चकारे तु भवेच्छम्या [2]द्वितीये ताल एव च ।। ६७ ।।
पुकारे तु भवेच्छम्या टकारे ताल एव च ।
एवं [1]चच्चत्पुटो ज्ञेयः [2]पञ्चपाणिरतःपरम् ।। ६८ ।।
[1]षट्कारे सन्निपातः स्यात् पिकारे ताल एव च ।
तकारे तु भवेच्छम्या [2]पुकारे ताल एव च ।। ६९ ।।
त्रकारे तु भवेच्छम्या ककारे ताल एव च ।
द्वितीयेऽप्येवमेव स्यात् सन्निपातस्ततः परम् ।। ७० ।।
गुर्वक्षराणां [1]विश्लेषादेवमेव तु मध्यमम् ।
विश्लेषितानामेषां तु द्विर्भावे या कला भवेत् ।। ७१ ।।
[1]पातान्ते सा प्रयोक्तव्या यथावदनुपूर्वशः ।
[2]द्विर्भावो मध्यमस्यैव ज्येष्ठमित्यभिधीयते ।। ७२ ।।

62 (C. 59a ; K. 54b, 55a) [1]C. om. 62a. [2]K. भेदी चच्चत्पुट. C. ज्ञेयश्चच्चत्पुटस्यादौ क्षत्वा तु गुरुलाघवम्. 63 (C. 59b, 60a ; K. 55b, 56a) [1]K. सर्वत्र for पूर्वत्र. 64 (C. 60b, 61a ; K. 56b, 57a) [1]C. पञ्चपाणेश्च, K. पञ्चबाणश्च. 65 (C. 61b, 62a ; K. 57b, 58a) [1]C. शम्यातालश्च तालश्च शम्याताल⁰. [2]K. पञ्चबाणौ. 66 (C. 62b, 63a ; K. 58b, 59a) [1]C. प्लुतस्यान्ते-कृतसौष्ठः. K. प्लुतच्छेदे⁰. 67 (C. 63b, 64a ; K. 59b, 60a) [1]C. वामपातात् for तालपातान्. [2]C. द्वितीयस्ताल. 68 (C. 64b, 65a ; K. 60b, 61a) [1]MN. चच्चत्पुटौ. K. चच्चपुटे. [2]K, पञ्चपाणे⁰. 69 (K. 61b, 62a) [1]K. षडारे, C. om. 69. [2]K. एकारे for पुकारे. 70 (K. 62b, 63a) [1]C. om. 70. altogether. 71 (C. 65 ; K. 63b, 64a) [1]C. विक्षेपात्. 72 (C. 66a ; K. 64b, 65a) [1]C. om. 72a. [2]C. विभावो.

[1]मध्यमस्य विधानेन न्यसेच्च द्विगुणाः कलाः ।
[2]सन्निपातैर्निपातैश्च तेषां वस्तु प्रकीर्तितम् ।। ७३ ।।

[1]अतःपरं प्रवक्ष्यामि लयान्तरितलक्षणम् ।
तालो यस्य कनिष्ठः स्यात् स लयान्तरितः स्मृतः ।।
[1]कला [2]कालान्तरकृता केवलं तु कलान्तरम् ।। ७४ ।।
अयमेव तालयोगो विशेषसिद्धिस्तु [1]पूर्वनिर्दिष्टा ।
[2]भवति हि लयान्तरिते शब्दाद् भेदो लयाच्चैव ।। ७५ ।।

[1]आसारितां संयोगो वर्धमानक इष्यते ।
[2]उत्पत्तिं लक्षणं चास्य गदतो मे निबोधत ।। ७६ ।।
निहत्य [1]दानवं घोरं रुद्रेणामितौजसा ।
नृत्तमुत्पादितं [2]चित्रं पूर्वं ताण्डवसंज्ञितम् ।। ७७ ।।
अथ भूतगणैः सर्वैस्तस्मिन् काले महात्मभिः ।
वर्धमानमिदं [1]सृष्टं पिण्डीबन्धैर्विभूषितम् ।। ७८ ।।
परितुष्टश्च [1]तं दृष्ट्वा सपत्नीको वृषध्वजः ।
प्रददौ च वरं श्रेष्ठं सह [2]देव्या महेश्वरः ।। ७९ ।।
[1]तल्लक्ष्यलक्षणयुतं मार्गयुक्तिविधिक्रमैः ।
[2]वर्धमानं प्रयोक्तारो यास्यन्ति शिवगोचरम् ।। ८० ।।
[1]एवमेतन्मया दृष्टं पिण्डीबन्धनिमित्ततः ।
अधुना तु प्रवक्ष्यामि लक्षणं श्रृणुत द्विजाः ।। ८१ ।।

[1]वृत्ति दक्षिणचित्रेषु मार्गेषु विनियोजितम् ।
द्विविधं वर्धमानं स्यात् स्वप्रमाणविनिर्मितम् ।। ८२ ।।

73 (C. 66b, 67a ; K. 65b, 66a) [1]C. मध्यमव्यवधानेन. [2]C. सन्निपातनि⁰. 74 (C. 67b, 68a) [1]K. om. 74. [2]MN. काला. 75 (C. 69 ; K. 93) [1]K. सूर्यवद्दिष्टा. [2]MNC. भवन्ति हि. [3]K. लयश्चैव. 76 (C. 225 ; K. 66b) [1]K. om. 76a. [2]K. समानलक्षणांश्चैव. 77 (C. 226 ; K. 67) [1]C. दारुणं. [2]C. चित्रताण्डव⁰. 78 (C. 227 ; K. 68) [1]K दृष्टं. 79 (C. 228 ; K. 69) [1]K. तद्दृष्ट्वा. [2]C. देव्या महासुरः. K. देवगणाधिपैः. 80 (C. 229 ; K. 70) [1]K. लक्ष्यलक्षणसंपन्ना. [2]K. वर्धमानप्रयो⁰. [3]C. शिवगौरवम्. 81 (C. 230 ; K. 71) [1]C. एवमेव पुरा. [2]C. सं⁰. 82 (K. 72) [1]C. om, 82.

[1]अतालं च सतालं च तत्प्रमाणं द्विजा स्मृतम् ।
चतस्रः कण्डिकाश्चैव तावन्त्यासारितानि तु ॥ ८३ ॥
ध्रुवकेण कलाभिस्तु कण्डिका देवकल्पिता ।
वर्धमानशरीरे तु क्रियते मार्गयोजना ॥ ८४ ॥
आद्या नवकला तु स्यादष्टाभिस्तत्परा स्मृता ।
दश षट् च तथा चैव तृतीया कण्डिकेष्यते ॥ ८५ ॥
चतुर्थी कण्डिका चैव द्वात्रिंशत्कलिका स्मृता ।
कलाभिरेवं निर्दिष्टा कण्डिका वर्धमानके ॥ ८६ ॥
केवलं मार्गसंभूता स्वालयोपाङ्गवर्जिता ।
एकद्वित्रिचतुर्योगात्ताभिरासारितानि तु ॥ ८७ ॥
वर्धमाने प्रसूयन्ते मार्गतालाङ्गयोगतः ।
प्रथमां कण्डिकां कृत्वा बालतालप्रयोजिताम् ॥ ८८ ॥
[1]अन्तिमार्धं कलाहीनं कुर्यादेवं कनिष्ठकम् ।
द्वितीयां [2]कण्डिकां कृत्वा [3]प्रथमा सकला यदि ॥ ८९ ॥
[1]युज्यते पूर्वतालेन [2]तदा तत्स्याल्लयान्तरम् ।
[3]वर्धमानं तदा चित्रैर्नहि वृत्तेन योजयेत् ॥ ९० ॥
[1]बहिर्वा वर्धमाने वा [2]कनिष्ठां न हि दक्षिणे ।
[2]द्विगुणाक्षरसंयोगादन्यमार्गनियोजनात्[3] ॥ ९१ ॥
[1]नृत्तकालविशेषाच्च [2]बालतालाल्लयान्तरम् ।
कनिष्ठासारिते तालो यो मया परिकीर्तितः ॥ ९२ ॥
स एव सर्वः कर्तव्यः प्रथमे [1]कण्डिकाद्वये ।
तृतीया सद्वितीया च प्रथमा चैव [2]तत्कला ॥ ९३ ॥

83 (C. 231a ; K. 73) [1]C. om. 83a. 84 (K. 74) [1]C. om. 84. 85 (K. 75) [1]cf. C. 232. 86 (K. 76) 87 (K. 77). 88 (K. 78) [1]C. om. 88a. 89 (C. 251b, 252a ; K. 79) [1]C. षधिंमर्धिं:. [2]C. बालमासारितन्तु तत्. [2]C. कणिंका. [3]C. प्रथमं. 90 (C. 252b, 253b ; K. 80) [1]C. पूज्यते. [2]C. यदा यत्तल्लयान्तरम्. [3]C. वर्धमानां तदा चित्रैर्नं विवृत्तेन ; K. वर्धमानं विना चित्रैर्न हि वृत्तौ लयान्तरम्. 91 (C. 254, 70a ; K. 81) [1]C. स हि वर्धमाने वा. [2]K. कनिष्ठां. [2]K. द्विगुणाचीर⁰. [3]C. ⁰तृष्वन्यमास्व (मार्ग) प्रयोजनम् (नात्). 92 (C. 70b, 255 ; K. I41a, 82a) [1]C. वृत्तेर्विशिष्टकालाच्च. [2]C. लयादन्य (बालताल) लयान्तरम्. K. बाल्यादन्यल्लयान्तरम्. 93 (C. 256 ; K. 141b, 82b) [1]K. कण्डिकवेद्वये. [2]C. तद्गपेत.

द्विकलं योगमाश्रित्य मध्यमासारितं [1]तु तत् ।
चतुर्थीमादितः कृत्वा चतस्रः कण्डिका [2]यदा
[3]चतुष्कलेन युज्यन्ते ज्येष्ठमासारितन्तु तत् ॥ ९४ ॥

प्रयोगस्तु यथा त्वेषां पिण्डीबन्धैर्विकल्प्यते ।
प्रत्येकं [1]त्वङ्गविन्यासस्तदा तेषां पृथक् पृथक् ॥ ९५ ॥
मुखं प्रतिमुखं चैव [1]देहः संहरणं तथा ।
अङ्गान्येतानि चत्वारि सर्वेष्वासारितेषु च ॥ ९६ ॥
उपोहनं मुखं तेषां युग्मं प्रतिमुखं भवेत् ।
ओजः [1]शरीर संहारावेमङ्गविधिक्रमः ॥ ९७ ॥
[1]इत्येवं चतुरङ्गानि ज्ञेयान्यासारितानि तु ।
[1]चतुरासारितैर्बद्धं वर्धमानकमुच्यते ॥ ९८ ॥
[1]वर्णताललयग्रन्थवाद्याभिनयवर्धनात् ।
[1]पात्राणां वृद्धियोगाच्च वर्धमानकमुच्यते ॥ ९९ ॥
[1]वर्धमानशरीरस्य भवेदासारितस्य च ।
कार्यकारणभावेन [2]परस्परविकल्पनम् ॥ १०० ॥
[1]यथा वृक्षाङ्कवेद्बीजो बीजात् वृक्षस्य सम्भवः ।
अन्योन्यहेतु संयोगः प्रसर्तव्यस्तथैव तु ॥ १०१ ॥
[1]योगादेककलात् सूते कनिष्ठकं लयान्तरे ।
द्विकलान् मध्यमं चैव ज्येष्ठं चैव चतुष्कलात् ॥ १०२ ॥
चच्चत्पुटपरिवर्तः शम्यादि द्वौ च पञ्चपाणिकृतौ ।
अन्ते च संनिपातः पातविधिरयं कनिष्ठस्य ॥ १०३ ॥
[1]अयमेव तालयोगो विशेषसिद्धिश्च पूर्वनिर्दिष्टा ।
भवतीह लयान्तरिते शब्दाद् भेदो लयाच्चैव ॥ १०४ ॥

94 (C. 257a, 258 ; K. 83, 84a) [1]C. तथा. [2]K. यथा. [3]C. चतुष्कयोगमाश्रित्य. 95 (C. 260b, 261a ; K. 84b, 85a) [1]C. ⁰विन्यासः सर्वेषां च पृथक् पृथक्. 96 (C. 193 ; K. 85b, 86a) [1]K. देहसंहरणं. 97 (C. 194ab, K. 86b, 87a) [1]K. ⁰शरीसंहारावयमङ्ग⁰. 98 (C. 194c ; K. 87b, 88a) [1]C. om. 93b. 99 (C. 263 ; K. 88b, 89a) [1]C. वर्धताललयाग्रन्थ⁰. [2]C. पत्राणां. 100 (C. 264 ; K. 89b, 90a) [1]K. वर्धमाने. [2]K. ⁰विकल्पनम्. 101 (K. 90b, 91a) [1]C. om. 101. 102 (K. 91bc) [1]C. om. 102. 103 (K. 92) [1]C. om. 103. 104 (K. 93) [1]C. om. 104.

[1]उत्तरकालान् कृत्वा त्वादो विप्राः कलाः परित्यज्य ।
एतत् पातविधानं मध्यमकासारिते प्रोक्तम् ॥ १०५ ॥
[1]ज्येष्ठस्य भवति नियमादादावेका चतुष्कला मात्रा ।
मात्रा कुं दु (?) गता स्यात् कृत्वा तौ द्वौ च परिवर्तौ ॥ १०६ ॥
[1]बालं नवकलं येषां न तेषां साधुसंमतम् ।
सन्निपाताङ्गविन्यासं कलानियमतः कृतम् ॥ १०७ ॥
[1]अथ तत्र मुखे तालौ ध्रुवपातैरेव [2]नियमितो मानम् ।
तस्य [3]कलामात्राक्षरगुरुलघुवर्णस्थितिं वक्ष्ये ॥ १०८ ॥
ज्येष्ठस्य कला ह्यष्टौ मुखं भवेन्मध्यमस्य [1]सप्त कलाः ।
[2]षष्ठिर्लयान्तरे स्यात् पञ्चैव कलाः कनिष्ठस्य ॥ १०९ ॥
आदावन्ते गुरूणि मध्ये च लघूनि [1]वाद्यतः प्रभृति ।
अष्टौ द्वादश षोडश विंशतिरपि [2]चाक्षराणि स्युः ॥ ११० ॥
आसारितोपवहनेष्वादावासारणानि युक्तानि ।
तान्यक्षराणि वक्ष्ये यानि पुरा ब्रह्मगीतानि ॥ १११ ॥

यथा—[1]कुद्दु जगति यदि सिनि गिजं हु प्रथमे लयान्तरे, वापि तितिजल कुचकलय मध्ये, इति कुच वलितक ज्येष्ठे ।

[1]इत्यक्षरपतनकला गुरुलघुवर्णस्थितिप्रविभक्तः ।
आसारितमुखसंज्ञे उपवहनविधिः समुद्दिष्टः ॥ ११२ ॥
[1]एवमेतत् विस्तारं कथितं परिमाणकम् ।
चत्वारस्तु [2]गणा युग्मे ओजे [3]षट् परिकीर्तिताः ॥ ११३ ॥

105 (K. 94) [1]C. om. 105. 106 (K. 95) [1]C. om. 106. 107 (K. 96) [1]C. om. 107. 108 (C. 195 ; K. 97) [1]K. तेषां संमुखतालं. [2]K. नियमतात्मानम्. [3]K. कलापाक्षर गुरुलघुवर्णः. 109 (C. 196 ; K. 98) [1]K. समूलकम्. [2]K. षडिलयान्तरे. 110 (C. 197 ; K. 99) [1]C. साद्यत. K. वालतः, M. वाधतः. [2]K. वाचराणि. 111 (C. 198, 199 ; K. 100) [1]The example given is very corrupt. The version given is from K. The equally corrupt C. version as follows : चद्दलच्च ञ्जगति लबत दिधि चणु (M. वाण दच घण दञ्ज भति लवलित दिष्टि भण दम् N. भाण्ड, भाणट, जगति यवलित दिगि भाणटम्.) एतत् (N. तं M. द) बालि ञ्ज्ञेयं कुतसद्दङ्ग धया चगति (N. ध्वयान्तरगति) दित दित (N. दिगित) गिसल द्दङ्ग मध्ये ते चाहङ्ग भव (वेज्) ज्येष्ठम्. 112 (K. 101) [1]C. om. 112. 113 (C. 200a ; K. 102) [1]C. om. 113a. [2]KC. गणा. [3]K. षड्ा for षट्.

पञ्चपाणौ द्वितीये तु [1]सार्धाः षट् परिकीर्तिताः ।
कनीय [2]एवं कर्तव्यमक्षरैस्तालमानतः ॥ ११४ ॥

यथा— [1]देवं देवैः संस्तुतमीशं[3] दैत्यैर्यक्षैः[4] प्रणमितचरणम्[5] ।
[6]त्रैलोक्यहितमीशं हरं रुद्रं [7]शरणमहमुपगतः ॥

अष्टावेव गणाः कार्याः पूर्वताले यथाविधिः ।
द्वादशैव तु कर्तव्या [1]षट्पितापुत्रके गणाः ॥ ११५ ॥
अर्धत्रयोदश-[1]स्तथा तृतीये [2]वस्तुसंज्ञिनि ।
एवम् अक्षरविन्यासो मध्यमासारिते स्मृतः ॥ ११६ ॥

यथा—भूताधिपतिं भगनेत्रहरणमीशं [3]देवैर्वन्द्यं [4]सुरमखमथनं रौद्रं भयदं [5]गजचर्मपटं । शम्भुं त्र्यक्षं ज्वलननिभजटं [6]भुजंगपरिकरं ॥ [7]त्रिदशगणवृतं दैत्यैर्नित्यं परिपठितचरितम् [8]अमरपतिनमितम् अभिमतसुखदं [9]रुद्रं पीतं [10]पितृवननिलयं गङ्गाप्लावितशोभनजटं तं शरणं गतोऽस्मि वरदं च महेश्वरम् ।

कार्या षोडश युग्माख्ये ताले तु प्रथमे गणाः ।
चतुर्विंशतिरोजाख्ये द्वितीये वस्तुसंज्ञिते ॥ ११७ ॥
चतुर्विंशतिरर्धश्च तृतीये [1]वस्तुके भवेत् ।
ज्येष्ठे त्वासारिते कार्य एवमक्षरसञ्चयः ॥ ११८ ॥

यथा—अमरप्रवरं मदनांगहरं भुवनैकनाथम् अभयप्रदं [2]त्रिपुरनाशकरं देवं तमहं प्रणतः । [3]सुरपितृमुनिगणप्रणतचरणं [4]पृथिवीसलिलानलपवन-

114 (C. 200bc, 201 ; K. 103) [1]K. सार्धं. [2]C. एव. [3]K. om. ईशं. [4]K. adds after this नागैः पितृभिश्च. [5]K. नमितचरणम्. [6]K. त्रैलोक्यहेतुमीशं रुद्रं. C. त्रैलोकहितं हरं शं (N. हरमीशं). [7]K. शरणमन्यऽसुपगतः. 115 (C. 202-204 ; K. 104-105 and prose) [1]K. [0]गणास् [2]K. वस्तुसंज्ञिता. [3]K. देवैर्वैद्यं, C. देवम्. [4]K. सुरवरमथनं. [5]K. [0]चर्मव्रतं. [6]K. भुजग. [7]C. त्रिदशपरिगणं. [8]C. अमरपति चरितम्. [9]K. om. रुद्रं पीतं. [10]K. om. पितृवन······महेश्वरम् and has in its stead शरणम् सुरातमुतचरणमहमुपगतः. 117 (C. 205 ; K. 106). 118 (C. 206, 207 ; K. 107) [1]K. वस्तुसंज्ञिते for वस्तुके भवेत्. [2]K. त्रिपुरान्तकं. [3]K. सुरपितृगणनतचरणं. C. सुरगणपितृमुनिगणमहितं. [4]K. पृथिवीसविलज्वलनभैरवरूपं खट्वाङ्गकपालधरं पवनः सूर्यचन्द्रौ यजारमाप्योमाख्याः कामी.

यज्ञाधिपतिसूर्यचन्द्रव्योमाख्याः अष्टौ मुनिभिर्यस्य [5]कार्या प्रोक्ताः त्रैलोक्यगुरुं तमचिन्त्यमजं विद्यानिलयं भैरवरूपं [6]खट्वांगधरं स्थित्युत्पत्तिप्रलयनिमित्तं [7]सूक्ष्माक्षम् अचिन्त्यं चन्द्रार्धधरम् [8]तिलकार्धधरं [9]नेत्रार्धधरम् [10]कुचार्धधरम् कान्ताधंधरं । [11]बहुलैर्विविधैर्विधृतैर्विकटैर्मुण्डैः विमुखैर्विषमैः प्रमथैः परिवृतमीशं [12]सततं प्रणतः ।

आसारितानां सर्वेषां [1]त्रयो भेदा प्रकीर्तिताः ।
यथाक्षरं [2]द्विसंख्यातं त्रिसंख्यातमथापि वा ॥ ११९ ॥
[1]तालच्छेदद्विगुणितैः [2]समवर्णैर्गणैः कृतम् ।
अनिवृत्ताक्षरपदं यथाक्षरमिति स्मृतम् ॥ १२० ॥
निवृत्त्या यत्समायुक्तं द्विसंख्यातं [1]तदुच्यते ।
[2]निवृत्तिद्वयसम्पन्नं त्रिसंख्यातमितीष्यते ॥ १२१ ॥
चतुष्कादौ चतुर्मात्रा यथोक्त[1]गुरुलाघवाः ।
यथायोगं [2]गणा कार्याः गीतेष्वासारितेषु च ॥ १२२ ॥
अक्षरैर्या चतुर्मात्रा द्विमात्रा [1]वर्णतस्तथा ।
चित्रे कला भवेद् या तु वृत्तौ सा द्विगुणा स्मृता ॥ १२३ ॥
वृत्तौ या वर्णमात्रा [1]तु चतुर्मात्रा प्रकीर्तिता ।
[2]द्विगुणा दक्षिणे [3]सा तु कला ज्ञेयाः प्रयोक्तृभिः ॥ १२४ ॥
न मार्गभेदोऽक्षरेषु कश्चिदप्युपपद्यते ।
[1]वर्णमात्रा द्विगुणिताद् वर्णभेदः प्रकीर्तितः ॥ १२५ ॥
यथाक्षरेषु भूयिष्ठं गीतेष्वासारितेषु च ।
विधिरेष समुद्दिष्टो [1]वर्णतालसमाश्रयः॥ १२६ ॥

[5]C. om. कार्या प्रोक्ता. [6]K. खट्वाङ्गकपालधरं. [8]C. त्रिकलार्धधरं. [9]K. रसनार्धधरं. [10]C. मुग्धार्धधरं कान्तार्धं K. om. this. [11]K. बहुभिर्विकृते विविधे विकसुविंद्यतिविमुखैः. [12]K. puts before this सुखदं. 119 (C. 208, K. 108) [1]K. ये भेदाः. [2]C. द्विसंखोति. 120 (C. 209 ; K. 109) [1]K. तालच्छेदी. [2]C. समवर्णैर्गुणैः K. समवर्णगणैः. 121 (C. 210 ; K. 110) [1]K. तदुच्यते. [2]C. निवृत्तित्रय⁰. K. निवृत्तद्वय⁰. 122 (C. 211 ; K. 111) [1]C. ⁰लाघवः. [2]C. कला for गणाः. 123 (C. 212 ; K. 112) [1]K. वर्णतस्तु सा. 124 (C. 213 ; K. 113) [1]K. ⁰भिश्चतुर्मात्राः. [2]K. द्विगुणद × णे. [3]C. या. 125 (C. 214 ; K. 114) [1]C. वर्णमात्रादिगुणनात्. 126 (C. 215 ; K. 115) [1]K. वर्णतालपदाश्रयः.

द्विसंख्याते निवृत्तिस्तु [1]कार्यास्यादर्धयोगतः ।
[2]द्विसंख्यातार्धयोगेन [3]त्रिसंख्यातेऽपि चेष्यते ॥ १२७ ॥
[1]न च चित्रे द्विसंख्यातं कदाचिदपि योजयेत् ।
[2]न च वृत्तौ त्रिसंख्यातं गीतेष्वासारितेषु च ॥ १२८ ॥
दक्षिणे स्यात् त्रिसंख्यातं द्विसंख्यातं च वार्तिके ।
[1]चित्रे यथाक्षरं [2]प्रोक्तमिति मार्गविनिश्चयः ॥ १२९ ॥
दक्षिणेनैव गत्वादौ निवृत्तौ वृत्तिवद् व्रजेत् ।
चित्रवच्च यथान्यायं [1]त्रिसंख्याते विधिः स्मृतः ॥ १३० ॥
अनेनैव विधानेन द्विसंख्यातमपीष्यते ।
वृत्तौ वा दक्षिणे वापि [1]प्रयोगोऽस्यैव चेष्यते ॥ १३१ ॥
वस्त्वादौ वस्तुमध्ये च वस्त्वन्ते वा निवृत्तयः ।
प्रयोक्तव्या प्रयोगज्ञैर्विचार्याङ्गबलाबलम् ॥ १३२ ॥
निवृत्तौ तु कला न्यूना यदा [1]वस्तुवशाद्भवेत् ।
[2]आ कलापत्तनात्तस्या वर्णः कार्यः निवृत्तिमान् ॥ १३३ ॥
वर्णालंकारसम्भोगार्थं [1]विच्छेदः करणस्य च ।
तत्त्वादीनां प्रयोगश्च निवृत्तीनां प्रयोजनम् ॥ १३४ ॥
वर्णतालाक्षराणां च संयोगोऽयं मया स्मृतः ।
आसारितेषु गीतेषु वर्धमानेषु चैव हि ॥ १३५ ॥

[1]चतस्रः कण्डिका [2]ज्ञेया वर्धमाने प्रयोक्तृभिः ।
विशाला [3]संगता चैव [4]सुनन्दा सुमुखी तथा ॥ १३६ ॥
[1]ततः पूर्वा नवकला द्वितीयाष्ट[2]कला स्मृता ।
तृतीया षोडशकला द्वात्रिंशच्च तथोत्तरा ॥ १३७ ॥

127 (C. 216 ; K. 116) [1]CK. कार्याद्यस्यार्धयोगतः, कार्या चार्धं वियोगतः. [2]C. द्विसंख्यातकयोगेन. [3]CK. त्रिसंख्यातेऽपि. 128 (C. 217 ; K. 117) [1]C. न च वृत्तौ. K. न चित्रे द्विविः. [2]K न च वृत्तित्रिसंख्यातं. 129 (C. 218, K. 118) [1]C. चित्रौ. [2]C. प्रोक्तं एषां. 130 (C. 219 ; K. 119) [1]C. त्रिसंख्याते. 131 (C. 220 ; K. 120) [1]K. प्रयोगेऽस्य सदैव तु. 132 (C. 221 ; K. 121) 133 (C. 222 ; K. 122) [1]C. वस्तुवद्भवेत्. [2]K. चकालपातनात्तस्याः. 134 (C. 223 ; K. 123ab) [1]C. विच्छेद करणस्य. 135 (C. 224 ; K. 123c, 124a) [1]C. तु for च. 136 (C. 231 ; K. 124b, 125a) [1]K. वर्धमानं तु विज्ञेयं चतस्रः कण्डिका बुधैः. [2]C. कण्टिका. [3]C. संमता. [4]K. सुतदा. 137 (C. 232) [1]K. om. 137.

[1]उपोहनविधिस्तासामधुना च मयोच्यते ।
उपोहनं विशालया [2]विशालाया [2]कलापञ्चकमेव हि ।
[3]षट्कलाः संगतायाश्च सुनन्दायाश्च सप्तकम् ॥ १३८ ॥
सुमुख्याश्चोपवहनं नित्यमष्टकलं भवेत् ।
[1]एतेषां चैव वक्ष्यामि गुरुलघ्वक्षरक्रमम् ॥ १३९ ॥
आदौ गुरुद्वयं कार्यं चतुर्दश [1]लघून्यपि ।
उपोहनं विशालायाः पुनरन्ते [2]गुरुः स्मृतः ॥ १४० ॥

यथा—[3]झं दुं जगति अवलितक दिगिनिकुचक्कततिति वा ।

[1]चतुर्भिरधिकैः ह्रस्वैर् गुरुत्रयसमन्वितम् ।
संगतायाश्च मुनिभिरुपोहनमिति स्मृतः ॥ १४१ ॥

[यथा]—

चतुर्भिरधिकैरेवं [1]लघुभिर् गुरुसंयुतैः ।
[2]सुनन्दायाश्च विज्ञेयो [3]ह्युपोहनविधिर्बुधैः ॥ १४२ ॥

यथा—झं दुं जगति अवलितक दिगिगिति झलकुचलति विभो ।

[1]अष्टाविंशल्लघूनि स्युः सुमुख्याश्च [2]गुरूणि च ।
[3]उपोहनविधानेन तु ज्ञेयानि मुनिसत्तमाः ॥ १४३ ॥

यथा—[4]झं दुं जगति अवलिकदिगिविगिति ति झल झ च कुलतिति जगतिति वा ।

138 (C. 234b, 235; K. 125b, 126a) [1]K. om. 138a. [2]K. कला पञ्च भवेदिह. [3]K. षडङ्गताया विज्ञेया सुनन्दायाश्च सप्त च. 139 (C. 236; K. 126b) [1]K. om. 139b. 140 (C. 237; K. 127) [1]K. लघून्यथ. [2]C. विधिः for गुरुः. [3]C. has nothing in its place. 141 (C. 238) [1]K. om. 141. 142 (C. 239; K. 128) [1]K °गुरुसंस्तुतैः; C. °गुरुसंयुतं. [2]C. सुनन्दयोश्च. [3]C. उपोहन°. K. ह्यपोहन°. [4]C. om. this example. 143 (C. 240; K. 129) [1]K. षड्विंशतिर्लघुनि. [2]C. गुरुत्रयम्. [3]K. °विधानेन ज्ञेयानि; C. °विधाने तु ज्ञेयं तु द्विजसत्तमाः. [4]C. om. this example.

उपोह्यन्ते स्वरा [1]यस्मात् [2]यस्माद् गीतं प्रवर्तते ।
तस्मादुपोहनं ज्ञेयं शुष्काक्षरसमन्वितम् ॥ १४४ ॥
[1]अथवोपोह्यते यस्मात् प्रयोगः सूचनादिभिः ।
तस्मादुपोहनं [2]ह्येतद् गानं भाण्डसमाश्रयम् ॥ १४५ ॥
शम्यातालौ द्विरभ्यस्तौ सन्निपातान्त्य एव च ।
उपोहने विशालायास्तालोऽयं परिकीर्तितः ॥ १४६ ॥
द्विकलः संगतायास्तु [1]तालश्चापपुटः स्मृतः ।
[2]तस्यैव सन्निपातोऽन्त्ये सुनन्दायास्तथैव च ॥ १४७ ॥
[1]चच्चत्पुटस्तु द्विकलः [2]सुमुख्यां स्यादुपोहने ।
उपोहने द्विरभ्यस्तैस्ततः कार्या तु कण्डिका ॥ १४८ ॥
एतान्युपोहनानीह चत्वारि गदितानि [1]तु ।
आनुपूर्व्या प्रयोगश्च कण्डिकानां निबोधतः ॥ १४९ ॥
[1]शम्या तालस्तथा शम्या पुनस्तालो यथाक्रमम् ।
त्रिकलः सन्निपातश्च विशालायाः प्रकीर्तितः ॥ १५० ॥
[1]चच्चत्पुटस्तु द्विकलः संगताया अपि स्मृतः ।
[2]चतुष्कलः सुनन्दाया स एव गदितो बुधैः ॥ १५१ ॥
सन्निपातद्वयोपेतो द्विचित्रस्तु प्रयोक्तृभिः ।
कार्यश्चतुष्कलो युग्मः सुमुख्याश्च यथाक्रमम् ॥ १५२ ॥
वर्धमानस्य तालोऽयं कण्डिकानां पृथक् पृथक् ।
मया प्रोक्तः पुनश्चैव [1]संहतानां निबोधत ॥ १५३ ॥
पूर्वा विशाला कर्तव्या [1]बालतालप्रयोजिता ।
[2]अन्तिमा त्रिकलोपेता बालमासारितन्तु तत् ॥ १५४ ॥

144 (C. 241; K. 130) [1]K. यत्र for यस्मात्. [2]K. येन. C. तस्मात्. [3]C. स्थायिस्वरसमाश्रयम् for शुष्काक्षर समन्वितम्. 145 (C. 242; K. 131) [1]K. अथवा मोह्यते...... प्रयोगसूचना°. [2]K. ह्येतज्ज्ञानभाण्ड°; C. ह्येतद्गानाभाण्ड°. 146 (C. 243; K. 132). 147 (C. 244ab; K. 133) [1]C. तालश्चापुटः; K. तालश्चच्च पुटः. [2]K. त्रिकलीयुक्ततालादि for तस्यैव etc. 148 (C. 244c-245a; K. 134) [1]CK. चच्चत्पुटस्तु. [2]K. सुमुख्याः. 149 (C. 245c-246a; K. 135) [1]K. ह for तु. 150 (C. 233; K. 136) [1]K. शम्या तालो पुनः शम्या ततस्तालो यथाक्रमम्. 151 (C. 234a; K. 137) [1]CK. चच्चत्पुटस्तु त्रिकलः. [2]C. om. 151b. 152 (K. 138) [1]C. om. 152. 153 (KC. 250; K. 139) [1]C. संयुक्तानां for संहतनं. 154 (C. 246; K. 140a) [1]K. संगता तदनन्तरम for बालताल etc. [2]K. om. 154b.

संगताया [1]ग्रहं कृत्वा विशाला सकला यदि ।
[2]युज्यते पूर्वताले तु तदा स्यात्तल्लयान्तरम् ॥ १५५ ॥
सुनन्दा च ततः कार्या संगता पुनरेव हि ।
विशालाञ्च पुनश्चैव सुमुखीं च प्रयोजयेत् ॥ १५६ ॥
कनिष्ठासारिते तालो यो मया परिकीर्तितः ।
स एव सर्वः कर्तव्यः प्रथमे [1]कण्डिकोद्भवे ॥ १५७ ॥
सुनन्दा संगता चैव विशाला च यथोदिता ।
सुनन्दाया ग्रहं कृत्वा ततश्चैव प्रयोजयेत् ॥ १५८ ॥
मध्यमासारिते तालो यो मया परिकीर्तितः ।
[2]शम्यात्रयस्य कर्तव्यः सुनन्दाद्यस्य पण्डितैः ॥ १५९ ॥
सुमुखी च सुनन्दा च [1]संगता पुनरिष्यते ।
[1]सुमुख्यादौ ग्रहं कृत्वा यथोक्तं संप्रयोजयेत् ॥ १६० ॥
[1]विशालायाः समाप्तिस्तु ज्ञेया अथ [2]निवृत्तयः ।
[2]ज्येष्ठे त्वासारिते तालो निःशब्दः शब्दवांस्तथा ॥ १६१ ॥
स सर्व एव कर्तव्यो बुधैश्चतसृणामपि ।
[1]संयोगे [2]कण्डिकानां [3]तु तालोऽयं परिकीर्तितः ।
[4]एवमासां समायोगाद् वर्धमानकमिष्यते ॥ १६२ ॥
[1]बालं नवकलं ज्ञेयं [2]दशसप्तलयान्तरम् ।
पञ्चषष्टिकलं ज्येष्ठं एयत्रिंशत्तु मध्यमम् ॥ १६३ ॥
[1]एतत्तालविधानं तु सर्वेष्वासारितेषु च ।
[2]कलानां वृद्धिमासाद्य त्वक्षराणां तु वर्धनात् ।
लयस्य वर्धनाच्चापि वर्धमानकमुच्यते ॥ १६४ ॥
आसारितेषु [1]गीतेषु वर्धमानेषु चैव हि ।
[2]द्विगुणस्तालयोगेन कार्यो [3]ह्यक्षरजो विधिः ॥ १६५ ॥

155 (C. 247 ; K. 140b) [1]C. गृहं. [2]K. om. 155b. 156 (C. 248) [1]K om. 156. 157 (C. 255b, 256a ; K. 141) [1]C. कण्डिकाद्वये. 158 (K. 142) [1]C. om. 158. 159 (C. 257 ; K. 143) [1]C. सोऽन्यत्व यस्य कर्तव्यः सुनन्दां न्यस्य योक्तृभि. 160 (C. 249a ; K. 144) [1]C. संगता पुनरिष्यते. [2]C. om. 160b. 161 (C. 249b, 259a ; K. 145a) [1]K. om. 161a. [2] MN. दश. [2]C. जोष्ठत्व' सारिते. 162 (C. 259b, 260a ; K. 145b, 146) [1]K. संयोगः. [2]C. कण्डिकालोपः [3]C. om. तु तालोऽयं. [4]C. om. 162c. 163 (C. 261b, 262a ; K. 147) [1]K. वालं न सुकलं ज्ञेयं. [2]K. दशशब्दलयान्तरम्. 164 (C. 262b ; K. 148) [1]K. om. 164a. C. om. 164bc. 165 (C. 265 ;

[1]समाप्तावन्तरहितः संनिपातो यदा भवेत् ।
अन्त्या कला द्विमात्रा तु [2]तदा ज्ञेया प्रयोक्तृभिः ॥ १६६ ॥
एवमेतन्मया प्रोक्तं [1]वर्धमानस्य लक्षणम् ।

आसारितानां वक्ष्यामि [2]प्रस्तारं लघुलक्षणम् ॥ १६७ ॥
अन्यूनायां कलायां तु ध्रुवं प्राज्ञो निवेशयेत् ।
अथ तालाक्षरवशाच्छेषानन्तांश्च योजयेत् ॥ १६८ ॥
प्लुते लघ्वक्षरे चैव ध्रुवे साम्यं न विद्यते ।
न विद्यते त्रिभिः पातैः समत्वमुपदिश्यते ॥ १६९ ॥
तालैश्च संनिपातैश्च शम्याभिश्च ध्रुवेण च ।
कनिष्ठासारितं कार्यं मध्यमं ज्येष्ठमेव च ॥ १७० ॥

* * *

[1]द्विगुणोत्तरया वृद्धया ह्रस्वैव तु मध्यमं विधातव्यम् ।
प्रस्तारे [चैव] कलानां शम्या तालान्तरोपेतम् ॥ १७१ ॥
[1]उत्तरतालः प्रथमे वस्तुन्यादौ कलात्रयं त्यक्त्वा ।
कार्यौ मध्ये नित्यं द्वौ परिवृत्तौ च संपूर्णौ ॥ १७२ ॥
पूर्वं शम्या कार्या द्विकलस्तालः [1]कलाद्वयं शम्या ।
पुनरेककलस्तालस्त्रिकलः [2]स्यात् सन्निपातश्च ॥ १७३ ॥
[1]त्रिकलोऽथ पुनस्तालः शम्येककलाद्वये [1]तालः ।
द्विकला च पुनः शम्या [3]तालः [4]द्विकलश्च कर्तव्यः ॥ १७४ ॥
त्रिकलश्च सन्निपातो [1]भूयो विधिरेष [2]एव कर्तव्यः ।
[3]द्वादशकलस्तृतीये तस्यान्ते सन्निपातश्च ॥ १७५ ॥
प्रथमस्त्वष्टकलः स्याद् द्वादशकलिकौ [1]तथापरौ ज्ञेयौ ।
अन्त्यश्च [2]सन्निपातो मध्यस्यासारितस्योक्तः ॥ १७६ ॥

166 (C. 266 ; K. 150) [1]K. समाप्तायान्तरयिनः. [2]C. तदा कार्या. 167 (C. 267a, 151b, K. 151) [1]C. वर्धमानक. [2]K. विस्तारं for प्रस्तारं. 168 (K. 152). 169 (K. 153). 170 (K. 154). 171 (C. 72 ; K. 155b, 156a) [1]C. द्विगुणान्तरह्रस्वा. 172 (C. 73) [1]K. om. 172. 173 (C. 74 ; K. 156b, 157a) [1]C. कलद्वये गम्या. [2]C. om. स्यात्. 174 (C. 75, 169b ; K. 157b, 158a) [1]K. त्रिकलोऽन्यस्मिं स्तालः. [2]C. तालम्. [3]C. द्वितालः. [4]K. om. द्विकलश्च कर्तव्यः. 175 (C. 170 ; K. 159) [1]C. भूत्वयी for भूयो. [2]C. om. एव. [3]K. द्वादशकला⁰. 176 (C. 171 ; K. 160) [1]C. तथा

ये पूर्वमङ्गुलिकृताः [1]प्रवेशविक्षेपनिष्क्रमा गदिताः ।
ते सर्वे कर्तव्या मध्ये त्वासारिते तज्ज्ञैः ॥ १७७ ॥
[1]अथ ज्येष्ठे तु कर्तव्यं [2]शम्यातालल्यात्मकम् ।
[3]शरीरं हि बुधैर्नित्यं पञ्चषष्टिकलान्वितम् ॥ १७८ ॥
[1]तस्यावापोऽथ निष्कामो [2]विक्षेपोऽथ प्रवेशनम् ।
अङ्गुलीनां [3]तु कर्तव्यं कलामानं चतुष्कलम् ॥ १७९ ॥
ज्येष्ठं चतुष्कलं स्यादावापैः संयुक्तं सविक्षेपैः ।
वस्त्वन्यत्र स्यात् सप्तदशकलं तु शम्यादि ॥ १८० ॥
पूर्वं शम्या कार्या चतुष्कलो वै [1]भवेत् ततस्तालः ।
शम्या चतुष्कला स्याद् [2]द्विकलस्ततस्तालस्ततः कार्यः ॥ १८१ ॥
कार्यश्च सन्निपातः [1]षट्कलिकः षट्कलश्च तालः स्यात् ।
द्विकला च पुनश्शम्या चतुष्कलः स्यात् पुनस्तालः ॥ १८२ ॥
शम्या चतुष्कला [1]स्यात् तालो द्विकलश्च कर्तव्यः ।
पुनरेव [2]सन्निपातश्च षट्कलः संविधातव्यः ॥ १८३ ॥
विधिरेष एव कृत्स्नः पुनस्तृतीये [1]सन्निपातेऽन्ते तु ।
[2]पुनरेषामङ्गुलिविक्षेपं संप्रवक्ष्यामि ॥ १८४ ॥
[1]आवापः सह [2]शम्यया निष्कामश्च ततः परम् ।
विक्षेपश्च ततस्तालः कार्यः पुनरावाप इष्यते ॥ १८५ ॥
[1]अनामिकाया निष्कामो विक्षेपोऽनन्तरं स्मृतः ।
[2]शम्यया सह आवापस्तालो विक्षेपणं पुनः ॥ १८६ ॥
[1]कार्यश्च मध्यमयाङ्गुल्या प्रवेशश्च [2]ततःपरम् ।
आवापश्च ततः कार्यस्तर्जनीनिष्क्रमस्तथा ॥ १८७ ॥

177 (C. 172 ; K. 161) [1]K. प्रवेशान्निष्क्रामसंज्ञया गदिताः. 178 (C. 173 ; K. 162a) [1]K. षयं. [2]K. शम्यातालकलान्वितम्. [3]K. om. 178b. 179 (C. 174 ; K. 162b, 162c) [1]K. शतवयोऽथ for तस्यावापोऽथ. [2]C. निक्षेपश्च निवेशनम्. [3]C. प्र⁰ for तु. 180 (C. 175). 181 (C. 176 ; K. 163) [1]C. भवेत् तालः. [2]K. द्विकलस्तालश्च कर्तव्यः. 182 (C. 177 ; K. 164) [1]C. षट्कलिकस्पर्शकलश्च. K. षट्कलः षट्कलश्च. 183 (C. 178 ; K. 165) [1]K. स्याद्द्विकलतालश्च. [2]C. सन्निपातः. 184 (C. 179 ; K. 166) [1]C. सन्निपातान्ते N. पातोऽन्ते. [2]K. पुनरेव वेषमङ्गुलिविक्षेपात्. 185 (C. 180 ; K. 167) [1]K. पूर्वं शम्या तथावापो निष्क्रामश्च ततः पुनः । विक्षेपोऽथ पुनस्ताल पुनरावाप इष्यते ॥ [2]C. शम्यायां. 186 (C. 181 ; K. 168) [1]K. अनामिको कनीयस्यान्निष्क्रामश्च पुनस्ततः । ताभ्यामेव हि विक्षेपः शम्याथो वापि एव वा ॥

[1]विक्षेपश्च पुनः कार्यः सन्निपातस्तथैव च ।
कला: [2]सप्तदशैवैताः [3]संनिपाते तदन्तरम्[4] ॥ १८८ ॥
आवापश्च पुनः कार्यः [1]कनीयस्याथ निर्गमः ।
[2]विक्षेपश्च प्रवेशश्च आवापश्च ततः पुनः ॥ १८९ ॥
[1]अनामिकाकनीयस्योस्ततस्तालो भवेत् पुनः ।
विक्षेपश्च पुनस्ताभ्यां ततः शम्या प्रकीर्तिता ॥ १९० ॥
[1]आवापश्च कनीयस्यां तत स्तालं नियोजयेत् ।
आवापश्च ततः कार्यस्तर्जनीनिष्क्रमस्तथा ।
[2]विक्षेपः पञ्चदशकः शम्यया सह कीर्तितः ॥ १९१ ॥
[1]आवापश्चैव कर्तव्यः [2]पुनस्तालः प्रयोक्तृभिः ।
विक्षेपश्च प्रवेशश्च पुनरावाप एव च ॥ १९२ ॥
प्रदेशिन्या च निष्कामो विक्षेपश्च पुनः स्मृतः ।
[1]सन्निपातस्तथान्त्ये च चतुर्विंशतिको भवेत् ॥ १९३ ॥
[1]तृतीयसन्निपातस्य एष एव विधि स्मृतः ।
एवं ज्येष्ठस्य [2]विज्ञेयस्तालाङ्गुलिविकल्पितः ॥ १९४ ॥
प्रथमः षोडशकलश्चतुर्विंशतिकस्तथा[1] ।
द्वितीयश्च तृतीयश्च [2]सन्निपातः कलाधिकः ॥ १९५ ॥
[1]प्रत्येकं पातनं येषु [2]दश सप्त भवन्ति हि ।
शम्यातालकृतानीह सन्निपातकृतानि च ॥ १९६ ॥
[1]वस्तुन्याद्ये ह्यज्येष्ठेसु द्वे चान्ये पूर्ववद् योज्ये ।
[2]षट्कशम्याष्टतालं त्रिसन्निपातं त्रिवस्तु चाप्येवम् ॥ १९७ ॥

188 (C. 182b-183a ; K. 170) [1]C. om. 188a. [2]C. सप्तदश ह्येता. [3]K. सन्निपातो तदन्तरम्. [4]C. repeats after this 187 incorrectly. 189 (C. 183b ; K. 171) [1]C. मध्यमाङ्गुल्या पुनः प्रवेशश्च. [2]C. om. 189. 190 (K. 172) [1]C. om. 190. 191 (C. 184 ; K. 173a) [1]C. om. 191a. [2]K. om. 191b. 192 (C. 185 ; K. 173b) [1]K. om. 192a. [2]C. ⁰स्ताल⁰. 193 (C. 186 ; K. 174) [1]C. सन्निपातस्तथा यश्च, MN. ⁰स्तथान्त्ये च. 194 (C. 187a, 189a ; K. 175) [1]C. तृतीये सन्निपातः स्यात्. K. तृतीयः सन्निपातस्य. [2]C. विज्ञेयस्तालोऽङ्गुलि विकल्पतः. 195 (C. 189b, 190a ; K. 176) [1]C. ⁰शतिकः स्मृतः. [2]K. सन्निपातकलाधिःक. 196 (C. 190b, 191 ; K. 177) [1]C. प्रत्येक पतनं. K. प्रत्येक पातनानेषु. [2]K. दक्षा for दश. 197 (C. 187b, 188a ; K. 178a) [1]K. om. 197a. N. वस्त्वन्याद्ये (?) C. वस्त्वस्या द्वे. [2] [illegible] C. षट्कस्य (N. ⁰शम्य⁰) [illegible]

सप्तदशपातनयुक्तं विद्यादासारितं [1]सम्यक् ॥
अष्टौ तालास्तु षट् शम्याः सन्निपातास्त्रयस्तथा ॥ १९८ ॥
[1]आसारिते विधौ ह्येष एकैकस्मिन् प्रकीर्तितः ।
[2]आसारितानामित्येवं गदितं तक्षणं मया ॥ १९९ ॥
[1]गीतानां वस्तुकानां च प्रयोगः परिकल्प्यते ।
अत ऊर्ध्वं प्रवक्ष्यामि [2]गीताकानां तु लक्षणं ॥ २०० ॥
[1]सर्वेषामेव गीतानां वस्तुष्ववयवेषु च ।
[2]विवधैककवृत्तानि त्रीण्यङ्गानि [3]भवन्ति हि ॥ २०१ ॥
[1]एककं तु विदार्येका [2]द्वे चापि विवधः स्मृतः ।
षट्परं त्र्यवरं वृत्तं [3]विदार्यः परिकीर्तिताः ॥ २०२ ॥
[1]पदवर्णसमाप्तस्तु विदारीत्यभिसंज्ञिता ।
न्यासापन्याससमंशान्तं वस्तु तत्परिकीर्तितम् ॥ २०३ ॥
[1]विदारयन्ति यस्माद्धि [2]पदमध्यस्वरा यदा ।
तदा विदारी विज्ञेया गुरुवर्णानुकारिणी ॥ २०४ ॥
[1]विवधैककयोः प्रायः मद्रके तु प्रयोजनम् ।
[2]प्रकर्याश्चापि वस्त्वर्धे पादे रोविन्दकस्य च ॥ २०५ ॥
रोविन्दकोत्तराभ्यां तु वृत्तम् [1]उल्लोप्यके तथा ।
पाणिकायां [2]बहिर्गीते लास्ये [3]चैव प्रकीर्तितम् ॥ २०६ ॥
प्रवृत्तमवगाढं च द्विविधं [1]वृत्तमुच्यते ।
आरोहित्वादवगाढं [2]प्रवृत्तमवरोहतः ॥ २०७ ॥

198 (C. 188b, 191b ; K. 178b) [1]K. सम्यक्. C. सर्वम्. 199 (C. 192a ; K. 179a) [1]K. om. 199a. [2]C. om. 199b. 200 (C. 267b ; K. 179b, 180a) [1]C. om. 200a. [2]K. गीतानां वस्तुकेष्वपि. 201 (C. 268a ; K. 180b) [1]K. om. 201a. [2]C. विविधैकवृत्तानि. [3]K. समासतःfor भवन्ति हि. 202 (C. 269 ; K. 181) [1]C. एकतन्तु. K. एकैकं तु. [2]C. द्वे चापि विविधैः स्मृतः. K. ते तु सद्विविधः स्मृतः. [3]K. शाङ्गं सहरसं च तत्. for विदार्यः परिकीर्तिताः. 203 (C. 270) [1]K. om. 203. 204 (C. 271) [1]K. om. 204. [2]C. परमध्यस्वरी, NM. °मधोस्वरा. 205 (C. 272 ; K, 182) [1]C. विविधैक°. M. om. °कयोः, and N. reads तयोः for it. [2]K. प्रवर्याश्चापि ; C. प्रकुर्याश्चापि. 206 (C. 273 ; K. 183) [1]C. मुञ्चापकस्य हि. [2]K. वहिर्गीता. [3]C. चैव प्रकीर्तितम्. 207 (C. 274 ; K. 184) [1]K. स्वल (वृत्त) मुच्यते.

आरोहणं तु द्विविधं तथा चैवावरोहणम् ।
न्यासापन्यासविहितं [1]मार्गान्तरकृतं तथा ॥ २०८ ॥
त्र्यवरैकादशपराः विदार्यः परिकीर्तिताः ।
चतुर्विंशतिरेतासां प्रमाणं परमं स्मृतम् ॥ २०९ ॥
[1]अध्यर्धा च [2]तृतीया च [3]सन्निपात[त्] प्रमाणतः ।
[4]उल्लोप्यके विदारी तु स्मृता [5]वैहायसे तथा ॥ २१० ॥
[1]विवधेन च ताः कार्या [2]युग्मवृत्तेन चैव हि ।
नद्दार्धे [3]संनिपाते तु भवेदङ्गसमापनम् ॥ २११ ॥

[1]विवधस्त्रिविधो ज्ञेयः कीर्त्यमानान् निबोधत ।
सामुद्रश्चार्धसामुद्रो विवृत्तश्चेति कीर्तितः ॥ २१२[2] ॥
[1]न्यासांतो विवधो ज्ञेयो मुक्त्वा वै गेयकं सदा ।
[2]आदौ तु मद्रके चैव सामुद्रः परिकीर्तितः ॥ २१३ ॥
लघुवर्णसमं गेयं सामुद्रे तु विधीयते ।
[1]तत्त्वन्ते च तृतीये च तद् वै गेयकसंज्ञितः ॥ २१४[2] ॥
विदार्यङ्गसमोऽर्धं [1]स्याद् अर्धं विसदृशं यथा ।
योगे [2]तु अर्धसामुद्रस्तथा ज्ञेयः प्रयोक्तृभिः ॥ २१५ ॥[3]
विदारी विषमा ज्ञेया न्यासापन्यास एव च ।
[तत्-]संप्रयोगबाहुल्यं विवृत्तं परिकीर्तितम् ॥ २१६ ॥[1]
[1]विवधश्चैककं [2]चापि [वृत्तं चैव] यथाक्रमम् ।
न्यासापन्याससमंशान्तं सदा ज्ञेयं प्रयोक्तृभिः ॥ २१७ ॥[3]
सन्यासश्चैव विन्यासो ह्यङ्गमध्यो यथाक्रमम् ।
विन्यासः स तु विज्ञेयो विदारीमध्यमस्थितः ॥ २१८ ॥[1]

208 (C. 275 ; K. 185) [1]C. मार्गान्तटकृतं. 209 (C. 276 ; K. 186). 210 (C. 277 ; K. 187) [1]K. अध्यर्धाद्धि. [2]K. तृतीयाश्च [3]C. सन्निपात प्रमाणतः. [4]C. उल्लोप्यतं, [5]C. वैहायसं. 211 (C. 278 ; K. 188) [1]C. विविधेन. [2]C. युग्मवृत्तेषु. [3]C. सन्निपातेषु. 212 (C. 279 ; [1]Cf. SR.V. 71a ; C. सासुद्रश्च समुद्रोऽपि विधौ ; [2]K. om. 212. 213 (C. 280) [1]न्यासतोऽपिविधौ ; cf. SR. V. 73a). [2]C. आद्या. [3]K. om. 213. 214 (C. 281) [1]C. तत्वन्ते. [2]K. om. 214. 215 (C. 282) [1]C. स्यात्. [2]N. त्व for तु अ°. K. om. 215. 216 (C. 283) [1]C. अथ°. [2]K. om. 216. 217 (C. 284) [1]C. विविधश्चैकतो. [2]C. चापि विदार्यं तु यथाक्रमम. [3]K. om. 217. 218 (C. 285) [1]K. om. 218.

विदारी वज्रविन्यासः पदान्ते क्वचिदेष हि ।
न तद् बाहुल्यमुद्दिष्टं प्रयोगस्य प्रयोक्तृभिः ॥ २१९ ॥[1]

[1]गीतानि सप्त मद्रकोल्लोप्यके चापरान्तकम् ।
[2]प्रकर्योवेणके चैव [3]रोविन्दकमथोत्तरम् ॥ २२० ॥
द्विविधं [1]मद्रकं तत्र चतुर्वस्तु त्रिवस्तु च ।
शीर्षकेण समायुक्तं [2]तत्तु ज्ञेयं त्रिवस्तुकम् ॥ २२१ ॥
पञ्च षट् सप्त [1]वापि स्युः [2]शीर्ष[कान्य]परान्तके ।
प्रकर्यामथ चत्वारि स्युस्त्रिण्यर्धाधिकानि च ॥ २२२ ॥
रोविन्दकं तु [1]सप्ताङ्गं षोडशाङ्गं परं स्मृतम् ।
द्वौ पादौ [2]समवर्णौ तु [3]एकके तत्र [4]कीर्तितौ ॥ २२३ ॥
प्रवृत्तं [1]विवधश्चापि [2]तस्य त्वादौ प्रयोजयेत् ।
[3]ततो देहं ततोऽङ्गानि यथायोगं निवेशयेत् ॥ २२४ ॥
[1]आकारश्चास्य मध्ये स्यादाकारश्चान्ततः स्मृतः ।
अविकल्पकमन्तेऽस्य शीर्षकं संप्रयोजयेत् ॥ २२५ ॥
सप्ताङ्गं द्वादशाङ्गं वा [1]प्रोक्तमोवेणकं बुधैः ।
तत्र [2]द्व्यङ्गं तु सप्ताङ्गं [3]त्र्यङ्गं द्वादशकं स्मृतम् ॥ २२६ ॥
[1]पादः सन्धिर्माषघातो वज्रं संपिष्टकं तथा ।
[2]शीर्षकं चतुरस्रञ्च [3]तथा चैवोपवर्तनम् ॥ २२७ ॥
उपपातः [1]प्रवेण्यौ च [2]द्व्यङ्गं संहरणं तथा ।
अङ्गानि द्वादशाङ्गस्य [3]स्मृतान्योवेणकस्य तु ॥ २२८ ॥

219 (C. 286) [1] K. om. 219. 220 (C. 287 ; K. 189) [1]C. ज्ञेयानि सप्तगीतानि मन्द्रकोऽथोऽपरान्ततः. K. गीतानि सम मद्रकोल्लोप्यके च परान्तकम्. [2]K. प्रकर्यो वेणकं चैव, C. प्रतर्योवेणको विद्यात्. [3]रोविन्दकमथोत्तरम्. C. ह्यल्लोत्तु ग्रोत्तरं तथा. 221 (C. 288 ; K. 190) [1]C. मन्द्रकं. [2]K. तच्च. 222 (C. 289 ; K. 191) [1]K. तानि. [2]CK. शीर्षकं चाप०. 223 (C. 290 ; K. 192) [1]K. वस्तूनां for सप्ताङ्गं. [2]C. समवर्णेन, K. समवर्णोस्तु. [3]C. एकैक सत्र. K. एककौ चात्र. [4]C. कीर्तितः. 224 (C. 291 ; K. 193a) [1]M. विवधं चापि. CN. त्रिविधं चापि. K. विवधं चापि. [2]K. तस्मात्. [3]K. om. 224b. 225 (C. 292) [1]K. om. 225. 226 (C. 293 ; K. 193b, 194a) [1]C. प्रोक्तमावेणकं. K. प्राच्यमोवेणकं. [2]K. द्व्यन्तं. [3]K. त्र्यन्तं. 227 (C. 294 ; K. 194b-195a) [1]C. प्रस्तारसन्धिमाषोस्थवज्रसंविष्टकं. [2]K. एककं. [3]K. वाप्युपवर्तनमेव च. 228 (C, 295 ; K. 195b-196a) [1]M. प्रवेण्यौ. KC. प्रवेणी.
[illegible]

संपिष्टकोपपाताभ्यां [1]प्रवेणीभ्यां विवर्जितम् ।
उपवर्तनहीनञ्च सप्ताङ्गमपि कीर्तितम् ॥ २२९ ॥
[1]विवर्तनं तु [2]सप्ताङ्गं तुल्यवर्णपदं स्मृतम् ।
अनयोर्द्वादशाङ्गे तु [3]तथान्यपदमिष्यते ॥ २३० ॥
[1]उल्लोप्यकेऽपि चाङ्गानाम् एष एव विधिः स्मृतः ।
[2]अवगाढं प्रवृत्तं च महाजनिकमेव च ॥ २३१ ॥
[1]त्र्यङ्गस्तु स्यात्तथा द्व्यङ्गो महाजनिकवर्जितः ।
[2]स्थितं प्रवृत्तसंयोगादेकाङ्गो वापि कीर्त्यते ॥ २३२ ॥
एकाङ्गे संविधातव्यं महाजनिकमेव च ।
[1]द्व्यङ्गं स्थितं प्रवृत्तं [2]वाप्येककाङ्गं प्रकीर्तितम्[3] ॥ २३३ ॥
[1]द्व्यङ्गे व्याससमासाभ्यां ध्रुवाधातुविधिः स्मृतः ।
[2]स्थितं प्रवृत्तं च तथा महाजनिकमेव च ॥ २३४ ॥
[1]त्र्यङ्गस्तु स्यादथ द्व्यङ्गो महाजनिकवर्जितः ।
एकाङ्गोऽपि विधातव्यो महाजनिकसंयुतः ॥ २३५ ॥
[1]एवं व्याससमासाभ्यां बहुधाङ्गविधिः स्मृतः ।
चतुरस्रस्तथा त्र्यस्रो विस्र(?)श्चान्तः प्रकीर्तितः ॥ २३६ ॥
[1]ओवेणकस्य संहारो [2]द्व्यङ्ग एकाङ्ग एव वा ।
[2]नादौ न मध्ये संहारो नित्यं चैव प्रयुज्यते ॥ २३७ ॥
[1]एकको [2]विवधो वापि कार्यो ह्यन्ते बुधैः सदा ।
उल्लोप्यकं षडवरं [3]विंशत्यङ्गपरं स्मृतम् ॥ २३८ ॥

229 (C. 296 ; K.196b-197a) [1]MN. प्रवेण्या च. C. प्रवेण्या पोरवर्जितम्. 230 (C. 297 ; K. 197b-198a) [1]K. निवर्तनं. [2]K. सप्ताङ्गी. [3]C. यथान्य०. 231 (C. 298a ; K. 198b-199a) [1]C. om. 231b. [2]See below note 3 on 233. 232 (C. 298c-299a ; K. 199b, 200a) [1]K. त्र्यङ्गोत्तु (ङ्गस्तु) स्यादथ, C. त्र्यङ्गान्तरः स्यात्तथा. [2]K. स्थितिप्रवृत्तं, C. स्थितप्रवृत्तसंयोगादेकाङ्गं. 233 (C. 299b-300a ; K. 200b-201a) [1]K. द्व्यङ्गं चितप्रवृत्तं. C. द्व्यङ्गं सितप्रवृत्तं [2]K. वा चैकाङ्गं वापि कीर्तितम्. [3]MN. repeats 231a after this. 234 (C. 298b ; K. 201b-202a) [1]C. om. 234a. [2]C. सितं. 235 (K. 202b, 203a) [1]C. om. 235. 236 (K. 203b-204a) [1]C. om. 236. 237 (C. 300b ; K. 204b-205a) [1]K. उवेणक०. C. आवेणकस्य. [2]C. द्व्यङ्गे ऽप्येकाङ्ग. [3]C. om. 237b. 238 (C. 301 ; K. 205b-206a) [1]K. एककं.
[2]K. [illegible] N. [illegible] [3]K. [illegible]

[1]तत्र संहरणं ज्ञेयं मुखप्रतिमुखान्वितम् ।
[2]वैहायसकसंयुक्तं तेनापि च विवर्जितम् ॥ २३९ ॥
[1]त्रिष्वङ्गेष्ववरं ज्ञेयं परं स्याद् द्वादशस्वपि ।
[2]एकाङ्गं षट्परं ज्ञेयं वैहायसकमेव तु ॥ २४० ॥
[1]अस्य चाङ्गत्रयेऽतीते प्रयोगमुपपादयेत् ।
उल्लोप्यकोत्तराभ्यां तु [2]मुखप्रतिमुखे स्मृते ॥ २४१ ॥
ततोऽङ्गानां समासो वा विस्तारो वा विधीयते ।
मुखप्रतिमुखे चैव ज्ञेये [1]विवधसंज्ञिते ॥ २४२ ॥
[1]वृत्तं प्रतिमुखे च स्याद् अन्यायास्तु समासतः ।
उल्लोप्यके [2]तु शाखाख्यं सोत्तरे सापरान्तके ॥ २४३ ॥
प्रतिशाखा तथा चैषां [1]समवर्णपदा स्मृता ।
उत्तरं द्वादशपरं षडङ्गावरमिष्यते ॥ २४४ ॥
[1]आकारपादहीनेन [2]सह रोविन्दकेन तु ।
अन्ते [3]चाथ विशेषेण स्थाप्यमस्य हि शीर्षकम् ॥ २४५ ॥
एवमङ्गविधिः कार्यः सप्तरूपे प्रयोक्तृभिः ।
अत ऊर्ध्वं प्रवक्ष्यामि गीतानां वस्तुकल्पनम् ॥ २४६ ॥
[1]कलाः षोडश विज्ञेया मात्राः [2]सर्वेषु वस्तुषु ।
तस्याश्चैव चतुर्भागः पादभागः प्रकीर्तितः ॥ २४७ ॥
[1]आदौ गुर्वष्टकं कृत्वा न्यसेल्लघ्वष्टकं तथा ।
तत्रोपवहनं कार्यं प्रथमे तु गुरुद्वये ॥ २४८ ॥
गुर्वक्षरे तृतीये तु ततः स्यात् प्रत्युपोहनम् ।
गुर्वक्षरे चतुर्थे तु शम्या कार्या तु पञ्चमे ॥ २४९ ॥

239 (C. 302a ; K. 206b-207a) [1]K. तत्र संहरणे कार्यं. [2]C. om. 239b. 240 (C. 302b ; K. 207b-208a) [1]C. om. 240a ; [2]K. एकादशाङ्गवरं. 241 (C. 303a ; K. 208b-209a) [1]C. om. 241a. [2]C. मुखप्रतिमुखं स्मृतं. 242 (C. 303b-304a ; K. 209b-210a) [1]K. विविधे. 243 (C. 304b-305a ; K. 210b-211a) [1]K. वृत्तप्रतिमुखं स्यादन्यायास्तु. [2]K. तथा शाखा. 244 (C. 305b-306a ; K. 211b-212a) [1]सवर्णान्यपदा स्मृताः. 245 (C. 306b-307a ; K. 212b-213a) [1]C. आकारवाद°. [2]K. तुल्यं. [3]C. चास्याविशेषेण स्थापेत मध्ये च, N. चस्या विशेषेण स्थाप्यते मध्य. 246 (C. 307b-308a ; K. 213b-214a). 247 (C. 308b-309a) [1]K. om. 247. [2]C. सर्वेष्ववस्तुषु. 248 (C. 309b-310a ; K. 214b-215a) [1]N. आदौ गुर्वष्टकं.

षष्ठसप्तमयोस्तालः शम्या गुर्वक्षरेऽष्टमे ।
[1]ततोऽर्धकलिकान् पादान् कुर्याल्लघ्वक्षरेषु च ॥ २५० ॥
गुर्वक्षरे [1]तालगते पादास्तु [2]कलिकाः स्मृताः ।
शम्यातालौ तालशम्ये [3]कुर्याद् द्वे वानुपूर्वशः ॥ २५१ ॥
तालं शम्यां च तालं च सन्निपातं तथैव च ।
[1]शीर्षकश्चास्य कर्तव्यं बुधैश्चापपुटेन तु ॥ २५२ ॥
एवमेककलो [1]ज्ञेयस्तालयोगस्तु [2]मद्रके ।
[3]गुरुर्विश्लेषपादेन द्विकलं परिचक्षते ॥ २५३ ॥
[1]विश्लेषेण [2]कलाश्चात्र [3]यथापूर्वं निवेशयेत् ।
द्विकले [4]मद्रके चैव त्रिकलं स्यादुपोहनम् ॥ २५४ ॥
[1]कलिका द्विकलं [2]वापि भवेच्च प्रत्युपोहनम् ।
द्विकलैर्गुर्वक्षरकृतैः पादभागैर्यथाक्रमम् ॥ २५५ ॥
चतुर्भिस्तु भवेन्मात्रा त्रिमात्रं वस्तु संज्ञितम् ।
त्रिवस्तु द्विकलं ज्ञेयं [1]पाते पादविधिस्त्वयम् ॥ २५६ ॥
गुर्वक्षरेषु ये पाताः शम्यातालादयः स्मृताः ।
तानेव पादभागेषु [1]द्विकलेष्वत्र योजयेत् ॥ २५७ ॥
अष्टमी षोडशी शम्या दशमी च यथाक्रमम् ।
चतुर्दश्यां कलायां तु [1]तालं न द्वादशीयुतम् ॥ २५८ ॥
[1]लघ्वष्टके [2]पातविधिर्यथापूर्वं प्रकीर्तितम् ।
वस्तुत्रयेऽपि द्विकले [3]एवं पातान् प्रयोजयेत् ।
शीर्षकं चैव कर्तव्यं ष ्कलं पञ्चपाणिना ॥ २५९ ॥

250 (C. 311b-312a ; K. 216b-217a) [1]C. र्धकलितान्. 251 (C. 312b-313a ; K. 217b-218a) [1]C. तालगीते. K. तालगीत, [2]C. कलिताः. [3]K. तेषु कुर्यात् क्रमेण तु. 252 (C. 313b-314a ; K. 218b) [1]K. om. 252b. 253 (C. 314b-315a ; K. 219) [1]K. ज्ञेयः कलायोगस्तु. [2]C. मन्द्रके. [3]CK. गुरुविश्लेषपादेन. N. °षपादित्वा. K. (foot-note). गुरुर्विश्लेषणादेत्. 254 (C. 315b-316a ; K. 220) [1]K. विशेषेण. [2]K. कलास्तत्र. [3]K. पूर्वं पूर्वं. [4]C. मन्द्रके. 255 (C. 316b-317a ; K. 221) [1]K. कलिकं. [2]C. चापि न वा स्यात् प्रत्युपो°. 256 (C. 317b-318a ; K. 222) [1]K. भवेत् पातो विधीयते. C. पादे पादविधि°. 257 (C. 318b-319a ; K. 222) [1]C. द्विकलोऽथ. 258 (C. 319b-320a ; K. 224) [1]K. तान्वेदा. 259 (C. 320b-321 ; K. 225) [1]C. लघ्वक्षरे. [2]C. पादविधि. [3]C. चैवं.

[1]क्रंडं क्रंडं शैलेन्द्रराजसंस्थितमीशं शान्तं शिवं पन्नगेन्द्रपरिबद्धजटम् ।
मुनिगणनमितं ध्यानाभिरतं ज्ञानमयं मदनाङ्गहरं विभुं प्रभुम् ।
शरणागतोऽहं दैत्यैर्नागैः संस्तुतमीशं त्वां वेदमयं त्वां कर्तारं
भुवनपतिं सर्वलोकनमस्कृतम् ।
ऋग्यजुःपरिपठितं गङ्गाधरं शूलधरं भुजगेन्द्रधरं प्रणतोऽस्मि
शिवं मृगराजचर्मपरिबद्धतनुम् ।
विपुलगतिं वृषभगतिं ज्वलनशिखिसदृशकपिलजटं तमहं नमामि
शिवं शिरसा ॥

समाप्तं द्विकलमद्रकम् ।

देवं विमलं प्रणतार्तिहरं मायाधारं मायारूपं जटिलं नमामि
शिवं शिरसा ।

शीर्षकं षट्कलं समाप्तम् । द्विकलमद्रकम्[5] ।

चतुष्कलं प्रवक्ष्यामि यथावद् द्विजसत्तमाः ।
चतुष्कलैः पादभागैर्यथापूर्वमुदाहृतैः ॥ २६० ॥
चतुर्भिस्तु भवेन्मात्रा त्रिमात्रं [1]वस्तु संज्ञितम् ।
पातांश्चैव प्रवक्ष्यामि पादभागे यथाक्रमम् ॥ २६१ ॥
चतुर्थे पञ्चमेऽन्त्ये च शम्या कार्याऽष्टमे तथा ।
दशमैकादशे शम्या द्वितीया नवमे स्मृता ॥ २६२ ॥
षष्ठे च सप्तमे [1]ताल अन्त्ये च नवमेऽस्य हि ।
[1]दशमैकादशे चैव द्वितीयः समुदाहृतः ॥ २६३ ॥
[1]आद्यं तु द्वादशे प्रोक्तं सन्निपातोऽवसानतः ।
एवं पातविधानं स्यात् [2]सर्वं वस्तु प्रयोजयेत् ॥ २६४ ॥
[1]प्रथमे वस्तुके ह्यादौ कलाष्टकमुपोहनम् ।
प्रत्युपोहनमित्युक्तं द्वितीये द्विकलं भवेत् ॥ २६५ ॥
[1]तृतीये त्रिकलं ज्ञेयं चतुर्थे तु चतुष्कलम् ।
अस्यान्ते शीर्षकं कार्यं षट्पितापुत्रकेण तु ॥ २६६ ॥

[4-5]This portion is wanting in C. 260 (C. 322; K. 226). 261 (C. 323; K. 227) [1]C. स तु संज्ञित:. 262 (C. 324; K. 228). [1]C नवमैकादशे. 263 (C. 325; K. 229) [1]C. ताल. K. ताला. 264 (C. 326; K. 230) [1]K. आद्य ...

द्विकले तु यथापातं पञ्चपाणिचतुष्ट[यम्] ।
[1]द्विगेयकं तृतीये च चतुर्थे च यथाक्रमम् ॥ २६७ ॥
परिवर्तसमाप्तिस्तु चतुर्थे [1]संविधीयते ।
[2]मद्रांशोपोहनं वस्तु प्रथमं च द्वितीयकम् ॥ २६८ ॥
[1]चतुर्थस्तु त्रिप्रमाणं त्र्यस्रतालसमुद्भवम्[2] ।
[3]द्विर्भावाद् द्विकलस्यैवं विज्ञेयं च चतुष्कलम् ॥ २६९ ॥
सप्तमे [1]लघूनि त्वन्त्ये द्विर्भावोऽस्मिन् विधीयते ।
चतुष्कलोऽत्र विहितः कलाष्टकमुपोहनम् ॥ २७० ॥
एका द्वे च चतुष्कश्च तथा स्यात् प्रत्युपोहनम् ।
यथाक्षरस्य कर्तव्यं मद्रकस्य तु शीर्षकम् ॥ २७१ ॥
चतुष्कलः पञ्चपाणिर्द्विकले द्विकलः स्मृतः ।
चतुष्कलस्तु कर्तव्यो मद्रके तु चतुष्कले ॥ २७२ ॥
[1]त्रिवस्तु त्रिप्रमाणं तु त्र्यस्रतालसमुद्भवम् ।
इत्युक्तं [2]मद्रकं पातैस्त्रयोदशभिरन्वितम् ॥ २७३ ॥
गुर्वक्षराणि चत्वारि चत्वारि स्युर्लघूनि च ।
[1]द्वितीये गुरुके शम्या तृतीये ताल एव च ॥ २७४ ॥
[2]तृतीये च चतुर्थे च शम्यातालौ लघून्यपि ।
तालं शम्यां च ताले च सन्निपातं च योजयेत् ।
[1]लघ्वक्षरैकऽष्टकलिकान् पातानेतान् प्रयोजयेत् ॥ २७५ ॥
तालः शम्या च तालश्च सन्निपातोऽन्त्य एव च ।
त्र्यस्रतालसमुद्भूतं [1]विज्ञेयमपरान्तकम् ॥ २७६ ॥
गुर्वक्षराणि विश्लिष्य [[1]द्वि]कलं सम्प्रयोजयेत् ।
पादभागैस्तथा षड्भिः द्विकलं च चतुष्कलम् ॥ २७७ ॥

267 (C. 329) [1]C. द्विकेयकं, M. द्विगेयकं. N. द्विश्रेयकं. 268 (C. 330) [1]C. सा. 269a. [2]C. मन्द्रां शोपहनं. 269 (C. 331a; K. 231a) [1]K. त्रिवस्तु त्रिप्रमाणं तु. [3]K. om. [3]C. om. 269b. 270 (K. 231b-232a) [1]K. लघुनि त्वन्त्यौ. 271 (K. 232b-233a). 272 (K. 233b-234a). 273 (C. 331b; K. 234b-235a) [1]C. चतुर्वस्तु त्रिप्रमाणं. 274 (C. 332; K. 235b) [1]K. om. 274b. 275 (C. 333, K. 236. 237a) [1]C. लघ्वक्षरैऽष्टकमितान्. 276 (C. 333b-334a K. 237) [1]C. ⁰सवरान्तकम्. 277 (C. 334b-335a) [1]C. त्रिकलं.

[शम्यातालौ तालौ] शम्या तालः षष्ठो यथाक्रमम् ।
पूर्ववत् पातविन्यासः षष्ठपञ्चमयोः स्मृतः ॥ २७८ ॥
आवाप[वि]क्षेपयुतं पातैरेभिश्चतुष्कलम् ।
चतुष्कलैः पादभागैः षड्भिस्तु समलंकृतम् ॥ २७९ ॥
वस्तुसंख्यश्च षट्पञ्चसप्त[का]न् संप्रयोजयेत् ।
द्वितीये पञ्चमेऽन्त्ये च द्वे शम्ये समुदाहृते ॥ २८० ॥
तृतीये तु भवेदन्त्यं द्वितीये पञ्चमे स्मृतः ।
आदौ षष्ठे तु तालः स्यात् सन्निपातस्ततोऽन्तिमः ॥ २८१ ॥
पूर्ववस्तुसमुद्दिष्टा पाता ह्येताश्चतुष्कले ।
[एवं चतुष्कले] योगो गदित[1]स्त्वपरान्तके ॥ २८२ ॥
[1]यथाक्षर[पाते]ष्वेतद् विज्ञेयं चापरान्तकम् ।
आदौ कलोपवहनं विश्लेषाद् द्विगुणं भवेत् ॥ २८३ ॥
द्विकले कलिकं ज्ञेयं द्विकलं चाप्युपोहनम् ।
[1]कलिके कलिकं चेष्टं तथैव चाप्युपोहनम् ॥ २८४ ॥
एतदेव द्विगुणितं विज्ञेयं तु चतुष्कलम् ।
लघ्वक्षरे तृतीये तु द्विर्भवेऽन्त्या कला स्मृता ॥ २८५ ॥
[1]त्र्यस्रतालसमुद्भूतं पातैः षड्भिर्विभूषितम् ।
वस्तुशाखाख्यमित्येतद् गदितं त्वपरान्तकन् ॥ २८६ ॥
यथा शाखा तथैवास्य प्रतिशाखा विधीयते ।
पश्चिमार्धसमा सा तु तथैवान्यपदा [1]स्मृता ।
[2]शिरश्चैककलेनास्य कर्तव्यं पञ्चपाणिना ॥ २८७ ॥
वृत्तौ निवृत्तयोगश्च गते वस्तुचतुष्टये ।
शाखायां प्रतिशाखायां विशेषः पश्चिमे त्वयम् ॥ २८८ ॥
षट्कलापातसंयुक्ते तालिके तु ततः स्मृते ।
तथैककलयुक्तेऽस्ति विधिवत् पञ्चपाणिना ॥ २८९ ॥

278 (C. 335b, 336a). 279 (C. 336b, 337a). 280 (C. 337b, 338a). 281 (C. 338b-339a). 282 (C. 339b-340a) [1]C. स्वापरान्तके. MN. स्तपरान्तके. 283 (K. 237b-238a). [1]K. यथाक्षरं वधेष्वेतद्. 284 (K. 238b-239a). [1]K. कलिकं 286 (K. 240b-241a). [1]K. चस्रताल° 287 (C. 340b-341 ; K. 241b-242) [1]K. स्मृता:. [2]K. °कलेनापि. 288 (K. 243). 289 (K. 244).

[1]यथाक्षरेण तु भवेदनयोरुपवर्तनम् ।
उपोहनं तु [2]वस्त्वर्धं द्विकलं प्रत्युपोहनम् ॥ २९० ॥
[1]द्विकलं दक्षिणे कार्यं वृत्तौ चैव चतुष्कलम् ।
न चात्रोपोहनं कार्यं शेषाणां तु कदाचन ॥ २९१ ॥
[1]एवं चतुष्कले योगो मया प्रोक्तोऽपरान्तके ।
उल्लोप्यकं तु द्विगुरु द्विलघ्वन्ते [2]गुरु स्मृतम् ॥ २९२ ॥
शम्यातालौ द्विरभ्यस्तौ सन्निपातोऽन्त्य एव च ।
प्रत्यक्षरकृतैः पातैः पञ्चभिः समलंकृतम् ।
[1]चतुरस्रं समं चेदं वस्तु ज्ञेयं यथाक्षरम् ॥ २९३ ॥
पूर्वोक्तेन विधानेन द्विचतुष्कलमिष्यते ।
[1]अस्य चाङ्गत्रये गीते वैहायसिकमिष्यते ॥ २९४ ॥
[1]तदेकाङ्गा[व]रं ज्ञेयं द्वादशाङ्गपरं तथा ।
प्रमाणं द्वादशकलं [2]सप्तपातमथापि वा ॥ २९५ ॥
अस्य तु द्विकला शम्या तालश्च द्विकलस्तथा ।
द्विकला च पुनः शम्या [1]तालश्चैककलः स्मृतः ॥ २९६ ॥
ततः शम्या ततस्तालः [1]सन्निपातस्ततः परम् ।
[2]शाखेयं प्रतिशाखा तु नित्यमन्यपदा स्मृता ॥ २९७ ॥
[1]पदा त्वस्य भवेदन्त्ये तदन्ताहरणं बुधैः ।
यथाक्षरेण [1]नियमात् संहार्यं पञ्चपाणिना ॥ २९८ ॥
[1]स्वतालेनान्तहीनस्य [2]संहारः परिकीर्त्यते ।
[3]द्विप्रकारं निवृत्तञ्च [4]त्र्यंशोऽथ त्रिविधः स्मृतः ॥ २९९ ॥

290 (C. 342 ; K. 245) [1]K. यथाक्षरेणैव. [2]C. वस्त्वर्धे. 291 (C. 343 ; K. 246a) [1]K. दक्षिणे तु तथा वृत्तौ चतुष्कलमपीष्यते. 292 (C. 344 ; K. 246b) [1]K. om. 292a. [2]K. गुरुर्यथा. 293 (C. 345 ; K. 247, 248a) [1]K. चतुरस्रस्तु विच्छेदमेवं. 294 (C. 346 ; K. 248b-249a) [1]C. अन्ते चाङ्गत्रयातीते. 295 (C. 347ab ; K. 249b-250a) [1]CK. °ङ्गपरं [2]K. तथापातम°. 296 (C. 347c-348a ; K. 250b-251a) [1]C. तालश्च द्विकलस्तथा. 297 (C. 348b-349c ; K. 251b-252a) [1]सन्निपातमतः. [2]K. शाखेयन्तशिखा. C. शाखेयं प्रतिशाखे. 298 (C. 349b-350a ; K. 252b-253a) [1]K. यदा ह्यस्य भवेदन्तस्तद°. [2]C. कर्तव्यं. 299 (C. 350b-351a ; K. 253b-254a) [1]K. स्वतालेनात°. [2]C. संहार्यः परिवर्त्यते. [3]CK. द्विप्रकारनिवृत्तश्च. [4]C. त्र्यङ्गोऽन्त°. K. त्र्यंशोऽथ.

त्र्यस्रश्च चतुरस्रश्च [1]मिश्रश्च त्रिविधः स्मृतः ।
[2]स्थितप्रवृत्ते तस्याङ्गे महाजनिकमेव च ॥ ३०० ॥
स्यात् पञ्चपाणितालेन तदन्ताहरणं [1]तथा ।
[2]तथास्थितं भवेद् युग्मं [3]तस्यपातविधिस्त्वयम् ॥ ३०१ ॥
शम्या तु द्विकला कार्या तालश्च द्विकलः स्मृतः ।
चतुष्कलः सन्निपातः [1]प्रवृत्तमत इष्यते ॥ ३०२ ॥
[1]तस्यापि द्विकला शम्या [2]तालश्चैककलः पुनः ।
[3]चञ्चत्पुटश्च तालादिः सन्निपातस्ततः परम् ॥ ३०३ ॥
[1]स्थितं तालेन कर्तव्यं महाजनिकमस्य तु ।
निवृत्ततालः कर्तव्यो निवृत्तस्यापि तत्त्वतः ॥ ३०४ ॥
[1]स्थितमहाजनिकयोः प्रायः [2]समुपवर्तनम् ।
आदावुद्घट्टकः कार्यः परिवर्तक एव च ॥ ३०५ ॥
युग्मे [1]हि मिश्रतालत्वाद् [2]युग्मे ह्यन्तः प्रयुज्यते ।
[3]त्रिविधैककसंयुक्तः सर्वश्चान्तविधिः स्मृतः ॥ ३०६ ॥
यथावदन्ततालोऽयं [1]युग्मो मिश्रश्च कीर्तितः ।
अतःपरं प्रवक्ष्यामि [2]त्र्यस्रतालविधिं प्रति ॥ ३०७ ॥
शम्या तु द्विकला पूर्वं ततस्तालो विधीयते ।
त्रिकलः सन्निपातश्च [1]प्रवृत्तंश्चाप्यतः परम् ॥ ३०८ ॥[2]
[1]प्रवृत्तमत्र कर्तव्यं यथावत् परिवर्तनम् ।
यथाक्षरप्रयुक्तेन [2]समासात् पञ्चपाणिना ॥ ३०९ ॥

300 (C. 351b-352a ; K. 254b-255a) [1]K. मिश्रश्चापि प्रकीर्तितः. C. मिश्रश्च त्रिविधः. [2]KMN. स्थितप्रवृत्ते. C. स्थितः पृथिव्या. 301 (C. 352b-353a ; K. 255b-256a) [1]M. यथा. CN. तथा. K. यदा. [2]K. तदा. [3]C. प्रथमस्य विधिस्त्वयम्. 302 (C. 353b-354a ; K. 256b-257a) [1]K. प्रवृत्तमथ. 303 (C. 354b-355a ; K. 257b-258a) [1]K. चस्य तु [2]K. तथैवैककला. [3]C. चञ्चपुटस्य. 304 (C. 355b-356a ; K. 258b-259a) [1]C. स्थिततालो न कर्तव्यो. 305 (C. 356b-357a ; K. 259b-260a) [1]K. reads here चत तालविधि प्रे ह: प्रायः समुपवर्तनम्. [2]C. MN. शस्त⁰. 306 (C. 357b-358a ; K. 260b-261a) [1]C. तु. [2]K. युग्मे स्वस्तः. C. युग्मोऽप्यन्तः. [3]C. विविधैकैक⁰. [4]K. पूर्वं पश्चाद्विधिः. 307 (C. 358b-359a ; K. 261b-262a) [1]C. युग्मे मिश्रे च. [2]C. त्र्यस्रमन्तविधिं. 308 (359b-360a ; K. 262b-263a) [1]K. प्रवृत्तं वाप्यतः परम्. [2]C. repeat after this 307b-308a. 309 (C. 361b-362a ; K. 263b-264a) [1]K. प्रवृत्तमस्य. [2]K. विधिवत्.

[1]अस्यापि स्थिततालेन महाजनिकमिष्यते ।
[2]निवृत्तः तालः कर्तव्यः [3]तथास्यान्तनिवर्तिते ॥ ३१० ॥
युग्मौजमिश्रतालत्वान्मिश्रोऽप्यन्तः प्रवर्तनम् ।
त्रिविधैककसंयुक्तः सर्वश्चान्तविधिः स्मृतः ॥ ३११ ॥[1]
द्व्यङ्गमेकाङ्गमपि वा स्थितं कार्यं समासतः ।
तत्र युग्मं भवेद् द्व्यङ्गं [1]त्र्यस्रमेकाङ्गमिष्यते ॥ ३१२ ॥
प्रवृत्तमपि विज्ञेयं द्व्यङ्गमेकाङ्गमेव वा ।
महाजनिकमेकाङ्गं द्व्यङ्गं संहरणं स्मृतम् ॥ ३१३ ॥
स्थितादिकः प्रवृत्तान्त [1]एवमन्तं विदुर्बुधाः ।
उल्लोप्यके सदा [2]योज्यमूहापोहविशारदैः ॥ ३१४ ॥
प्रकरीवस्तु [1]षण्मात्रा पाताश्चैकान्नविंशतिः ।
[2]वस्तु प्रमाणं कर्तव्यं तथैव च चतुष्कलम् ॥ ३१५ ॥
[1]न यथाक्षरयोगोऽत्र न चात्र द्विकलो भवेत् ।
[2]आद्यमात्रात्रयस्यान्ते [3]शम्यातालौ प्रकीर्तितौ ॥ ३१६ ॥
[1]षण्मात्रं पातसंयुक्तं वस्तु कार्यं यथाक्रमम् ।
उपोहनं तु वस्त्वर्धे प्रथमे च द्विजोत्तमाः ॥ ३१७ ॥
शम्या अस्य तु मात्रा स्याद् द्वितीया तालसंयुता ।
मात्रात्रयस्य [1]चान्त्या स्यात् शम्यैका च पुनस्तथा ॥ ३१८ ॥
चतुर्थ्यां द्वादशस्तालः पञ्चम्यां चाष्टमः स्मृतः ।
षष्ठ्यां तु द्विकला शम्या तालश्च द्विकलो भवेत् ॥ ३१९ ॥
पुनश्च द्विकलस्तालः शम्या च द्विकला पुनः ।
शम्यातालश्च [1]तालश्च शम्यास्तालस्तथैव च ॥ ३२० ॥

310 (C. 362b-363a ; K. 264b-265a) [1]C. चन्यापि. [2]C. प्रवृत्तः काल.. [3]C. यथास्यान्तनिवर्तिते. MN. °निवर्तते. K. ⁰स्तथात्र विनिवृत्तिमान्. 311 (K. 265b-266a) [1]C. om. this. 312 (C. 363b-364a ; K. 266b-267a) [1]K.......त्र्यस्रमेव च. 313 (C. 364b-365a ; K. 267b-268a) [1]K. भवेत्. 314 (C. 365b-366a ; K. 268b-269a) [1]K. एवमन्तविधं बुधैः. [2]K. योज्य. 315 (C. 366b ; K. 269b-270a) [1]K. षपात्र (= षण्मात्रा). [2]C. यस्तु प्रयोगः कर्तव्यः प्रकुर्याद् द्विचतुष्कलम्. 316 (C. 367 ; K. 270b) [1]C. न यताक्षर⁰. [2]C. अद्यमात्रात्रय⁰. K. आद्यमात्राद्वय⁰. [3]K. शम्यातालान्वितौ भवेत्. 317 (C. 368) [1]MNK. om. this couplet. 318 (C. 369 ; K. 271a) [1]K. चान्यस्य for चान्त्या स्यात्. 319 (C. 370 ; K. 271b-272a). 320 (C. 371 ; K. 272b-273a) [1]K. त

शम्यातालः सन्निपात इति वस्तु [1]प्रकीर्त्यते ।
यदा त्वर्धचतुर्थानि वस्तूनि प्रकरी भवेत् ॥ ३२१ ॥
पश्चिमार्धं पदस्यैतत् [1]तदर्धं प्राग् निवेशयेत् ।
कनिष्ठासारितेनास्य [1]कार्यं संहरणं ततः ॥ ३२२ ॥
पादः पूर्वसमः कार्यस्त्वपरान्तकशाखया ।
[1]ओवेणके द्वितीयस्य तस्य च प्रतिशाखया ॥ ३२३ ॥
स एव पातविन्यासो माषघातमतःपरम् ।
षट्पातो द्वादशकलस्तस्य पातविधिस्त्वयम् ॥ ३२४ ॥
कर्तव्या द्विकला शम्या [1]तालो च द्विकल एव च ।
[2]पुनश्च द्विकलस्तालः शम्या च द्विकला पुनः ॥ ३२५ ॥
ततश्चैककलस्तालः सन्निपातः कलात्रये ।
प्रायेण माषघातस्तु विवधाङ्गः प्रकीर्तितः ॥ ३२६ ॥
[1]सन्धिश्चैव हि तस्यान्ते कदाचिदुपवर्तनम् ।
[2]तस्या स्यात्कलिकेनैव तच्चोर्धं पञ्चपाणिना ॥ ३२७ ॥
सन्धिर्यथाक्षरेणैव कर्तव्यः पञ्चपाणिना ।
एककं [1]विवधो वापि [2]तस्याङ्गं समुदाहृतम् ॥ ३२८ ॥
[1]उपवर्तनवच्चास्य पृथग्विधिरिति स्मृतः ।
अन्त्यस्य चतुरस्रस्य प्रवृत्ते यो विधिः स्मृतः ॥ ३२९ ॥
[1]विवधाङ्गेन तेनैव चतुरस्रकमिष्यते ।
सन्धिवद् [2]वज्रतालश्च द्विधा संपिष्टकं स्मृतम् ॥ ३३० ॥
सप्ताङ्गौ द्वादशकलं द्वादशाङ्गौ दशैव तु ।
निष्क्राममादितः कृत्वा [1]शम्यास्तिस्रः प्रयोजयेत् ॥ ३३१ ॥

321 (C. 372 ; K. 273b-274a) 1K. प्रकीर्तितम्. 322 (C. 373 ; K. 274b-275a) 1C. तदार्धं. 2C. तालः. 323 (C. 374 ; K. 275b-276a) 1C. चावेणकी. K. उवेणकी द्वितीयेऽपि. 324 (C. 375 ; K. 276b-277a) 1K. अनित्यः शीर्षकी for स एव etc. 2K. माषघाती for षट्पाती. 325 (C. 376a ; K. 277b-278a) 1C. गम्या च द्विकला पुनः. 2C. om. this hem. 326 (C. 376b-377a ; K. 278b-279a). 327 (C. 377b ; K. 279b-280a) 1K. सन्निपातश्च पश्चार्धः. 2C. om. this hem. 328 (C. 378 ; K. 280b-281a) 1C. एकैक विविधौ. MN. द्विविधौ. 2C. तस्याङ्गं सष्टुदाहते. 329 (C. 379 ; K. 281b) 1K. om. this hem. 330 (C. 380 ; K. 282) 1MN. विधिनाङ्गेन. C. विधिनानेन. C. वज्रकालस्य. N. ०तालः स्यात्.

[1]तालत्रयं ततश्चैव [2]शम्यातालौ ततः परम् ।
शम्यातालौ ततः कार्यौ सन्निपातोऽन्त्य एव च ॥ ३३२ ॥
[1]ओवेणके तु सप्ताङ्गे संपिष्टकमिदं स्मृतम् ।
द्विशम्या तालयोगेन द्वादशाङ्गेऽपि चेष्यते ॥ ३३३ ॥
पाता नवैकादश वा संपिष्टकमुदाहृतम् ।
वज्रवत् संप्रयोक्तव्यमुपवर्तनमेव च ॥ ३३४ ॥
युक्ता विवधवृत्ताभ्यां प्रवेणी [1]द्विविधा स्मृता ।
पञ्चपाणिः प्रकर्तव्यः प्रवेण्या तु यथाक्षरः ॥ ३३५ ॥
द्विकलो वापि मिश्रो वा प्रयोगोऽङ्गवशानुगः ।
[1]अन्ते चास्य प्रकर्तव्यं कदाचिदुपवर्तनम् ॥ ३३६ ॥
पञ्चपाणिविधानेन यथोक्तेनैव तद् भवेत् ।
[1]द्वितीयतालपातेन ह्यपपातश्च कीर्त्यते ॥ ३३७ ॥
वज्रतालेन कर्तव्यं [1]क्रमं संहरणस्य तु ।
रोविन्दके तु षण्मात्राः पातभागैश्चतुष्कलैः ॥ ३३८ ॥
[1]अर्धेऽन्ते चैव मात्राणां पञ्चानां पात इष्यते ।
[2]तालशम्या च तालश्च शम्यातालस्तथैव च ॥ ३३९ ॥
[1]अन्ते शम्या तथा चैव सर्वासामपि कीर्तिता ।
पञ्चानामपि मात्राणां विधिरेष यथाक्रमम् ॥ ३४० ॥
चतुर्दशस्तु पञ्चम्या [1]मात्रायां ताल इष्यते ।
चतुष्कला तु तत्तुल्या [2]षष्ठी मद्रकमात्रया ॥ ३४१ ॥
[1]तथा चाष्टौ कलाः कार्याः प्रथमायाम् उपोहनम् ।
ततश्चैव [2]प्रयोक्तव्यं द्विकलं प्रत्युपोहनम् ॥ ३४२ ॥
[1]पाताः स्युः सन्निपातान्ता [2]विवधैककयोजिताः ।
वर्णानुकर्षोऽष्टकलस्त्वन्ते[3] प्रस्तार इष्यते ॥ ३४३ ॥

332 (C. 382 ; K. 284) 1C. तालस्तव. 1C. शम्यातालस्. 333 (C. 383 ; K. 285) 1C. चाविणके. K. तुवेणके. 334 (C. 384 ; K. 286). 335 (C. 385 ; K. 287) 1C. विविधा. 336 (C. 386 ; K. 288) 1C. चङ्ग 337 (C. 387 ; K. 289). 1K. द्वितीयपाततालेन. 338 (C. 388 ; K. 290) 1C. चन्ता(N. स्ता)हरणमस्य तु. 339 (C. 389 ; K. 291) 1K. अधार्धतौते. 2K. तालः शम्यार्धं. 340 (C. 390 ; K. 292a) 1K. om. this hem, 341 (C. 391 ; K. 292b-293a) 1K. मात्रायास्ता०. 2C. षष्ठमन्द्रक०. 342 (C. 392 ; K. 293b-294a) 1K. इति पादस्तथाष्टौ च कलापादादुपोहनम्. 2C. द्विकलः. 343 (C. 393 ; K. 294b-295a) 1K. घातश्चेत्संनिपातश्च. 2K. विविधैकप्रयोजिताः, 3K. स्वल्पः for स्वन्ते.

तुल्यवर्णोपवहनो द्वितीयः पाद इष्यते ।
शरीरतालः कर्तव्यः [1]प्रस्तारोऽपि विशेषतः ॥ ३४४ ॥
द्विकलनैव कर्तव्यो विशेषात् पञ्चपाणिना ।
कलाद्वादशनिर्दिष्टं प्रमाणञ्चास्य तत्त्वतः ॥ ३४५ ॥
रोविन्दकशरीरं तु षट्कलोपोहनं स्मृतम् ।
[1]विवधं वा प्रवृत्तं वा तस्यादौ परिकीर्त्यते ॥ ३४६ ॥
[1]आकारवृत्तमन्यत् स्याच्चतुष्कं त्रिकमेव वा ।
तस्योपरि यथेष्टं स्यादधस्तादङ्गयोजनम् ॥ ३४७ ॥
अविशेषनिवृत्तन्तु शीर्षकं तु प्रयोजयेत् ।
यथाक्षरेण तच्चैव कर्तव्यं पञ्चपाणिना ॥ ३४८ ॥
आद्यावेकैकमन्त्यस्य प्रवृत्तो नियमो भवेत् ।
इति रोविन्दकं प्रोक्तं स्यादुत्तरमतः परम् ॥ ३४९ ॥
उत्तरं संप्रवक्ष्यामि यथाविहितलक्षणम् ।
अस्येदमुत्तरस्याथ मुखं प्रतिमुखं भवेत् ॥ ३५० ॥
उल्लोप्यकपदस्यादौ मात्रा चैका चतुष्कला ।
[1]रोविन्दकवदाका[रं] गणव[र्जं] प्रयोजयेत् ॥ ३५१ ॥
शाखा षडङ्गा त्व[व]रा द्वादशाङ्गा परा स्मृता ।
षट्पाता द्वादशकला शाखा ज्ञेया प्रमाणतः ॥ ३५२ ॥
तस्यास्तु द्विकलस्तालः शम्या चैककला भवेत् ।
तथा च द्विकलस्तालः शम्या च द्विकला ततः ॥ ३५३ ॥
पुनश्चैककलस्तालः सन्निपातः कलात्रये ॥
शाखावत् प्रतिशाखा च भवेदन्यपदा तु सा ॥ ३५४ ॥
अविशेषान्निवृत्तस्याप्यस्यान्ते नियमो भवेत् ॥
शीर्षकञ्चैव कर्तव्यम् अस्यान्ते पञ्चपाणिना ॥ ३५५ ॥
पञ्चपाणिविधानेन प्रतिशाखा ततः परम् ।
द्विकलः पञ्चपाणिस्तु [1]पूर्वपातैर्यथाक्रमम् ॥ ३५६ ॥

344 (C. 394 ; K. 295b-296a) [1]M. प्रस्तारी. N. प्रधारी. 345 (C. 395 ; K. 296b-297a). 346 (C. 396 ; K. 297b-298a) [1]C. विविधी वा K. विवधं वापि वृत्तं. 347 (C. 397 ; K. 298b) [1]K. reads only आकारवृत्तपरुषोऽव and breaks off till 440. 348-350 (C. 398-400). 351-355 (C. 401-405) [1]C. रोविन्दकपदाकारगणवर्जं.

तालोऽयं दक्षिणे मार्गे सप्तरूपस्य कीर्तितः ।
य एवं दक्षिणे कालः स वृत्तावपि चेष्यते ॥ ३५७ ॥
[1]चित्रेणेवहि सर्वत्र विशेषो यत्र नोच्यते ।
[2]अर्धयोगादेष एव [3]वृत्ते कालविधिर्भवेत् ॥ ३५८ ॥
उल्लोप्यकोत्तरमुखे हित्वा युग्मं तथैककम् ।
अर्धयोगस्तु तत्काले द्विकलः सम्प्रकीर्त्यते ॥ ३५९ ॥
चतुष्कलः स्याद् द्विकलो द्वितीयश्च तथाक्षरः ।
रोविन्दकोल्लोप्यकयोर्मद्रकोत्तरयोस्तथा ॥ ३६० ॥
शरीरेषु विधिर्ह्येष शेषेषु प्रकृतिर्भवेत् ।
प्रकृतावपि तेषां स्याद् [1]द्विकलेन चतुष्कलम् ॥ ३६१ ॥
कालेनैव भवेद् वृत्तावर्धयोगश्चतुष्कले ।
[1]वार्तश्चतुष्कलो योगो दक्षिणे स्यात् कदाचन ॥ ३६२ ॥
मद्रकोल्लोप्यकयोश्च मुखोपवहनेषु च ।
यो दक्षिणे तालविधिर्वृत्तौ स समुदाहृतः ॥ ३६३ ॥
चित्रैर्व्यस्ते समस्ते वा तावुभौ परिकीर्तितौ ।
शाखानिवृत्तमन्यत्र चित्रेऽत्र [1]त्रयमार्गिकः ॥ ३६४ ॥
इति मार्गत्रये ह्येतत् सप्तरूपं प्रकीर्तितम् ।
द्विविधा प्रकृतिश्चास्य कुलकं छेद्यकं तथा ॥ ३६५ ॥
एकार्थं कुलकं तत्र पृथक् छेद्यकमिष्यते ।
निर्युक्तं पदनिर्युक्तमनिर्युक्तं तथैव च ॥ ३६६ ॥
त्रिविधं चैव विज्ञेयं सप्तरूपं प्रयोक्तृभिः ।
बहिर्गीताङ्गशाखाभियुक्तं निर्युक्तमिष्यते ॥ ३६७ ॥
[1]बहिर्गीताविहीनं तु पदनिर्युक्तमिष्यते ।
[2]बहिर्गीतविहीनं चाप्यनिर्युक्तमिति स्मृतम् ॥ ३६८ ॥
इत्येतत् सप्तरूपस्य प्रकृतं द्विविधं स्मृतम् ।
ब्रह्मोक्तं सप्तरूपं हि [1]सामवेदाद् विनिःसृतम् ॥ ३६९ ॥

358 (C. 408) [1]CN. चित्रे णैव. [2]C. अर्धयोगात्. [3]MN. वृत्ती काल⁰. C. वृत्तताल⁰. 359-360 (C. 409-410). 361 (C. 411) [1]C. विकलेन. 362 (C. 412) [1]C. MN. चतुष्कले (M. ष्कलौ) र्धयो. 363-367 (C. 413-417a). [1]MN. ⁰मार्गिकम्. 368 (C. 417b-418a) [1]C. बहिर्गीतवि⁰. N. बहिर्गीतावगीतं च. [2]C. बहिर्गीतावहीनं. 369 (C. 418b-419a) [1]MN. सामवेदाद. C. समवेताद.

दैवताराधनं पुण्यमनन्तं गीतवादितम् ।
सर्वेषामेव गीतानामन्तेषु च्छन्दकं (?) स्मृतम् ॥ ३७० ॥
चतुरङ्गं ततस्त्र्यङ्गं नवाङ्गं युग्ममेव च ।
ऋग्गाथापाणिकानां च प्रमाणानां तथैव च ॥ ३७१ ॥
अनेनैव विधानेन युग्मौजत्वं विभावयेत् ।
यो गणः पूर्वमुद्दिष्टस्तस्यादौ तु कला भवेत् ॥ ३७२ ॥
[1]चतुर्मात्राकृतां चैव कलां समवधारयेत् ।
अष्टाङ्गा वा षडङ्गा वा [2]युग्मोजौ वा प्रमाणतः ॥ ३७३ ॥
[1]स्तुतियुक्ता तु कर्तव्या [2]माद्रिकी चैव [3]पाणिका ।
चतुष्पादा तथैकाङ्गा द्व्यङ्गा त्र्यङ्गा विभावयेत् ॥ ३७४ ॥
अङ्गैर्व्यस्तैः समस्तैर्वा [1]युग्मोजौ वा प्रकीर्तितौ ।
[2]सप्तरूपस्य तालोऽयं मया हि परिकीर्तितः ॥ ३७५ ॥
चतुरस्रा तथा त्र्यस्रा ध्रुवा ज्ञेया प्रयोक्तृभिः ।
तासां तालविधानं तु षट्प्रमाणं समासतः ॥ ३७६ ॥
अड्डिता चोत्थिता चैव चतुरस्रा प्रमाणतः ।
चतुर्भिः सन्निपातैश्च ज्ञेया चञ्चत्पुटा स्मृता ॥ ३७७ ॥
[1]सुप्रतिष्ठावसानानां सन्निपातेऽन्त इष्यते ।
अपकृष्टा स्मृता त्र्यस्रा तथा चापपुटाश्रिता ॥ ३७८ ॥
चतुर्भिः सन्निपातैश्च युक्ता [1]पादान्तसंश्रितैः ।
तथाकाशग्रहस्तासां तावच्चञ्चत्पुटः स्मृतः ॥ ३७९ ॥
बिलम्बिता च त्र्यस्रा च [1]सा एतद्द्वितयान्विता ।
निष्क्रामादिप्रयुक्तेन योज्या चापपुटेन तु ॥ ३८० ॥
[2]पादान्ते सन्निपातस्य द्विपादा युग्मसंज्ञिता ।
[1]चञ्चत्पुटेन संयोज्या द्विकलेन यथाविधि ।
शीर्षकाणि च योज्यानि द्विविधं पञ्चपाणिना ॥ ३८१ ॥

370-372 (C. 419b-422a). 373 (C. 422b-423a) [1]C. कृताश्चैव कलाः. [1]C. युग्मौ यौ. 374 (C. 423b-424a) [1]C. इति युक्तवा. [2]M.N. मन्त्रिकी, C. भान्तिकी. [3]N. पाणिना. 375 (C. 424b-425a) [1]C. युग्मौ यौ. [2]C. तस्य. 376-378 (C. 425b-428a) [1]MN. put 378a after 379a. 379 (C. 428b-429a) [1]C. पादान्तमिश्रिते. M. [0]संश्रिता. N. [0]संश्रितैः. 380 (C. 429b-430) [1]N. पादद्वितयान्विता. [2]C. breaks off after सन्निपातस्य ; the rest 381 (C. 430b-431a) [1]N. चञ्चत्पुटेन संयोज्या (omitted by CM.).

चतुर्भिः सन्निपातैश्च सम्यक् पादान्तसंस्थितैः ।
[1]पादान्तस्यान्त्यतालस्य [2]द्विमात्रान्तं प्रयोजयेत् ॥ ३८२ ॥
मात्राद्वयं तु [1]काले तु [2]झंकारैः समतां नयेत् ।
[3]किञ्चिद्विनातिरिक्तायां मात्राभिर्यत्र चेत् कला ॥ ३८३ ॥
स्यात् समत्वं नयेत्तां तु क्षयवृद्ध्या प्रयोगवित् ।
वर्णप्रकर्षेण च स्यात् तालानामपि वर्धनम् ॥ ३८४ ॥
स्याद् झंकारो नियुक्तानामक्षरे च कलान्तरम् ।
कलातालप्रमाणेण यत्स्याच्छुष्ककुट्टनम्[1] ॥ ३८५ ॥
तथा ध्रुवाणां सर्वेषु कलातालौ प्रयोजयेत् ।
भङ्गतालश्च कर्तव्यो नत्कुटानां यथाविधि ॥ ३८६ ॥
[1]कलापातेन संयुक्तस्तालश्चञ्चत्पुटो भवेत् ।
एष एव पुनस्त्र्यस्रः [2]खञ्जके ताल इष्यते ॥ ३८७ ॥
[1]पुनः प्रकृतयो ह्येष भङ्गस्त्वाक्रीडितो भवेत् ।
[2]यान्यङ्गानि [प्रयुक्तानि] ध्रुवास्वथ भवन्ति हि ॥ ३८८ ॥
[1]तान्यष्टकलयोगेन योजयेत् षट्कलेन वा ॥
एवमेष मया तालो ध्रुवाणां परिकीर्तितः ॥ ३८९ ॥
चतुष्पदावसाने तु सम्प्रवक्ष्यामि लक्षणम् ।
[1]यद् देव्या सुकुमाराद्यं [2]शृङ्गाररससंश्रयम् ॥ ३९० ॥
[1]नृत्तं विकल्पितं तस्य काललक्षणमुच्यते ।
नारीप्रयोज्यं [2]तज्ज्ञेयमाश्रितं तु चतुष्पदम् ॥ ३९१ ॥
त्र्यस्रा वा चतुरस्रा वा द्विविधा वा चतुष्पदा ।
एकस्या वा बहूनां वा द्वयो र्वा वाक्ययोजनात् ॥ ३९२ ॥

382 (C. 431b-432a) [1]MN. पादान्तस्यन्तताल: स्यात्. [2]N. द्विमात्रां तां. 383 (C. 432b-433a) [1]N. कालं त. [2]M. झंकारै. C. झंकारौ. [3]M. [0]रिक्ताया. 384 (C. 433b-434a). 385 (C. 434b-435a) [1]C. [0]कुट्टनात्. 386 (C. 435b-436a), 387 (C. 436b-437a) [1]N. विकला पातसंयुक्त. [2]C. खञ्जखेलेति चेष्यते. 388 (C. 437b-438a) [1]C. पुनप्रकृतयाः. [2]C. यान्यङ्गानि ध्रुवासु स्युः. MN. om. ध्रुवासु स्युः. 389 (C. 438b-439a) [1]C. तानि चाष्टकयोगेन. 390 (C. 439b-440a) [1]MN. यद्द देव्या सुकुमाराद्यः. C. यद्द देव्या कुसुमावाद्यः. [2]C. MN. [0]संश्रयः. 391 (C. 440b-441a) [1]C. MN. वृत्तं for नृत्तं. [2]C. न ज्ञेयम्. 392 (C. 441b-442a).

तथा शृङ्गारभूयिष्ठा त्रिविधा स्याच् चतुष्पदा ।
प्रवृत्तसंज्ञा विज्ञेया [2]स्थितसंज्ञाश्रया तथा ॥ ३९३ ॥
स्थितप्रवृत्तसंज्ञा च त्रिविधा स्यात् पुनश्च सा ।
[1]निष्कामश्चैव शम्या च तालशम्या तथैव च ॥ ३९४ ॥
तदोत्तमश्च निष्कामः सन्निपातस्तथान्तिमः ।
अष्टाविंशति विकल्पा बुधैर्ज्ञेया चतुष्पदा ॥ ३९५ ॥
तस्या विकल्पान् वक्ष्यामि यथावदनुपूर्वशः ।
प्रवृत्ताख्या द्रुतलया स्थिताख्या च विलम्बिता ॥ ३९६ ॥
स्थितप्रवृत्तसंज्ञा च ज्ञेयामध्यलयाश्रिता ।
ज्ञेयश्चच्चत्पुटस्तस्य तथा चापपुटः पुनः ॥ ३९७ ॥
द्विकलेन विधानेन तस्य [1]पातविधिस्त्वयम् ।
बह्वक्षरा च विपुला मागधी चार्धमागधी ॥ ३९८ ॥
समाक्षरपदा चैव तथा च विषमाक्षरा ।
तस्यान्त्यापहरणा विज्ञेया चाप्यनीकिनी ॥ ३९९ ॥
[1]अवसानापहरणा अन्तापहरणा तथा ।
अभ्यन्तरापहरणा तथा चैवार्धनर्कुटा ॥ ४०० ॥
अर्धखंजा च मिश्रा च तथा [1]चैवाथ शीर्षका ।
एकावसाना विज्ञेया तथा च नियताक्षरा ॥ ४०१ ॥
अर्धप्रवृत्ता एतासां लक्षणं श्रुयतामिदम् ।
व्यक्तवाक् या लघुप्राया लघ्वक्षरसमन्विता ॥ ४०२ ॥
द्रुतवाक्या द्रुतलया ज्ञेया बह्वक्षरेति सा ।
गुरुप्लुताक्षरप्राया स्वल्पवाक्या यदा तथा ॥ ४०३ ॥
त्रिलया पृथुला (विपुला)ख्या च सुकुमारविधौ स्मृता ।
त्रिलया त्रियतिश्चैव त्रिप्रकाराक्षरान्विता ॥ ४०४ ॥
एकविंशतितिाला च मागधी सम्प्रकीर्तिता ।
गुरुलघ्वक्षरकृता द्रुतमध्यलयान्विता ॥ ४०५ ॥

393 (C. 442b-443a) [1]C. तथा च स्थितसंश्रया. 394 (C. 443b-444a). 395 (C. 444b-445a). 396 (C. 445b-446a). 397 (C. 446b-447a). 398 (C. 447b-448a) [1]C. चापविधि⁰. 399 (C. 448b-449a). 400 (C. 449b-450a) [1]C. अवसानापहरणा. 401 (C. 450b-451a) [1]C. चैवान्तगीर्वका. 402-403 (C. 451b-453a). 404 (C. 453b-454a). 405 (C. 454b-455a).

[1]मागध्येवार्धतालेन युक्ता स्यादर्धमागधी ।
गुरुलाघवमात्राभिः पदवर्णैस्तथैव च ॥ ४०६ ॥
लयतालैः समैश्चैव समाक्षरपदा स्मृता ।
अक्षरैर्विषमायां तु मात्रापादैस्तथैव च ॥ ४०७ ॥
लयतालैरनियमा सा ज्ञेया विषमाक्षरा ।
[1]यत्स्यात्त्वन्त्यः सन्निपातश्च सानुस्वारोऽन्त्य इष्यते ॥ ४०८ ॥
[1]आद्यान्तापहरणा च सानुस्वारकृता तथा ।
मध्याद्यन्तैः सन्निपातैरनुस्वारकृताक्षरैः ॥ ४०९ ॥
[1]शेषैरनियता पादैर्विज्ञेया सा त्वनीकिनी ।
अवसानापहरणा नित्यं ज्ञेयाऽमिताक्षरा ॥ ४१० ॥
अनुस्वारद्रुता चैवमन्तापहरणा स्मृता ।
द्वितीया सन्निपातेन मध्येऽक्षरसमन्विता ॥ ४११ ॥
अभ्यन्तरापहरणा सानुस्वारेव सा स्मृता ।
अर्धेन भिद्यते या तु विज्ञेया साऽर्धनर्कुटा ॥ ४१२ ॥
त्र्यस्रा ह्यनेन विधिना ह्यर्धखञ्जेन कीर्त्यते ।
खञ्जनर्कुटनाभ्यां तु मिश्रभावो यदा भवेत् ॥ ४१३ ॥
त्र्यस्रा वा चतुरस्रा वा तद[ा] मिश्रेव कीर्त्यते ।
उपक्षेपेण यस्यास्तु स पदार्धः समाप्यते ॥ ४१४ ॥
शीर्षकं सा तु विज्ञेया [1]शीर्षकेण विभूषिता ।
एकपादावसानस्तु यस्य: स्यादर्धवर्णतः ॥ ४१५ ॥
[1]एकावसाने विबुधैः सा ज्ञेया तु चतुष्पदा ।
पूर्वपादेन तस्य स्यात् सर्वत्र गुरुलाघवम् ।
[2]पादे पादे तु विज्ञेया शीर्षकेण विभूषिता ॥ ४१६ ॥
[1]एकपादावसाने च सा ज्ञेया नियताक्षरा ।
यस्या [2]स्थितं प्रवृत्तं वा भवत्यर्धनिवेशितम् ॥ ४१७ ॥

406 (C. 455b-456a) [1]C. ⁰तालि च. 407 (C. 458b-459a). 408 (C. (457b-458a) [1]MN. यस्यात्त्वन्त्यः. C. सात्त्वन्त्यः. 409 (C. 458b-459a) [1]C. समाद्यन्तापहरणां च. 410 (C. 459b-460a) [1]C. शेषैरनिलया⁰. N. शेषैरनियतावादे⁰. 411-415 (C. 460b-465a) [1]C. शीर्षितेन. 416 (C. 465b-466a) [1]C. एतावसानेव बुधैः. [2]MC. om. this hem. 417 (C. 466b-467a). [1]C. पादे पादाव⁰. [2]C. स्थितप्रवृत्त.

अर्धप्रवृत्ता सा तु स्यादुभाभ्यामपि वा कृता ।
निष्कामश्चैव शम्या च तालः शम्या तथैव च ॥ ४१८ ॥
आवापः सन्निपातश्च षडस्या ग्राहकाः स्मृता ।
उपोहनं तु त्रिविधं सुकुमारे प्रकीर्तितम् ॥ ४१९ ॥
द्व्यवरं त्रिपरं तस्य कलाभिः प्रत्युपोहनम् ।
[1]द्विकलाख्यं चान्तकलं सन्निपातपरं स्मृतम् ॥ ४२० ॥
सन्निपातापहरणा आदौ मध्येऽन्ततोऽपि वा ।
वाक्यद्वयाभिनिष्पन्ना नानावाक्यापि सा स्मृता ॥ ४२१ ॥
एकपादा द्विपादा वा त्रिपादा च प्रकीर्त्यते ।
चतुष्पादापि वा भूत्वा नातः परमिहेष्यते ॥ ४२२ ॥
कृत्वा तु पादबहुलां न शोभां जनयिष्यति ।
वर्णस्य [1]प्रकृति ह्यन्यदङ्गव्यक्तिं निरस्यति ॥ ४२३ ॥
तस्मात् स्थिता स्याद् द्विपदा एकेनैव पदा स्मृता ।
चतुष्पदा प्रवृत्ता तु[1] सम्यक् प्रोक्ता प्रयोक्तृभिः ॥ ४२४ ॥
तत्रैकरूपैकपदा [1]सा हि पादपाता स्मृता ।
द्वात्रिंशत्परमा सा हि सन्निपातपदा भवेत् ॥ ४२५ ॥
[1]आभ्यां मध्यप्रमाणे तु त्रिपादः परिकीर्त्यते ।
सन्निपातप्रमाणेन ज्ञेयो मध्यलयस्तथा ॥ ४२६ ॥
लास्यमित्येव यत्पूर्वं मया वः परिकीर्तितम् ।
लक्षणं तस्य वक्ष्यामि प्रयोगश्च यथाक्रमम् ॥ ४२७ ॥
[1]लासानाल्लास्यमित्युक्तं स्त्रीपुंभावसमाश्रयम् ।
[2]भाणवच्चैकहार्यं [3]स्याद्बहुवस्तु च तद्भवेत् ॥ ४२८ ॥
एकार्थं पृथगर्थं वा तदङ्गेषु प्रकीर्तितम् ।
अङ्गानि दश चैवास्य तेषां वक्ष्यामि लक्षणम् ॥ ४२९ ॥

418-419 (C. 467b-469a). 420 (C. 469b-470a) [1]MN. विकलाद्यन्तं. 421-422 (C. 470b-472a). 423 (C. 472b-473a) [1]C. प्रकृतिर्ह्यन्यद्रङ्गव्यक्तिर्हि······स्यति. MN. ⁰न्यद्राङ्गव्यक्तिं निरस्यति. 424 (C. 473b-474a). 425 (C. 474b-475a) [1]C. स हि पादपता. M.N. सन्निपातपदा. 426 (C. 475b-476a) [1]MN. आभ्यामध्य⁰. 427 (C. 476b-477a). 428 (C. 477b-478a) [1]C. लासनाल्लासमि⁰. [2]C. ⁰देकहास्यं. [3]C. स्याद्दवस्त. 429 (C.478b-479a).

[1]गेयपदं [2]स्थितपाठ्यमासीनं पुष्पगण्डिका[3] ।
[4]प्रच्छेदकस्त्रिमूढश्च सैन्धवाख्यं द्विमूढकम् ॥ ४३० ॥
उत्तमोत्तमकं चैव विचित्रपदमेव च ।
उक्तप्रत्युक्तभावश्च लास्याङ्गानि प्रकीर्तिताः ॥ ४३१ ॥
लास्ये दशविधं ह्येतदङ्गनिर्देशलक्षणम् ।
आसीनकाख्यं योज्यं स्यात् प्रयत्नादासनस्थया ॥ ४३२ ॥
[1]स्थितपाठ्यं [पुनश्चैव] भौमीभिश्चारीभिर्युतम् ।
नृत्तकाले च वाद्ये च [2]ग्रहमोक्षे तथैव च ॥ ४३३ ॥
गीताङ्गानां विधिर्यः स्यात् स [1]लास्ये प्रायशः स्मृतः ।
अङ्गान्येतानि लास्ये स्युर्दशोक्तानि समासतः ॥ ४३४ ॥
एतेषां चैव वक्ष्यामि प्रयोगं लक्षणं तथा ।
स्थापितैर्भाण्डविन्यासैः पटे चैवापकर्षिते ॥ ४३५ ॥
[1]ब्राह्मणः [पुष्प]वर्षेषु चासने परिकल्पिते ।
[1]मार्जितेषु मृदङ्गेषु त्रिसाम्नि प्रतियोजिते ॥ ४३६ ॥
प्राक् शुष्कासारितं कार्यं [1]तत् त्रिवेणुप्रयोजितम् ।
मार्गासारिततालेन ततश्चासारितं बुधैः ॥ ४३७ ॥
[1]परिवृत्तैस्त्रिभिर्युक्तमतश्चोपोहनं भवेत् ।
त्र्यस्रेण [2]द्विकलेन स्यात् ततश्च परिधानकम् ॥ ४३८ ॥
प्रयोक्तव्यं प्रयोगज्ञैः परिवर्तात्मकं तथा ।
परिवर्ते तथैवास्य पुंवाक्यं प्राक् समाचरेत् ॥ ४३९ ॥
त्रिवाक्यं [1]पुरुषश्च स्यात् [2]चतुर्वाक्याङ्गना स्मृता ।
कार्यं तथा निर्वहणं [3]प्राप्त्यर्थं परिधानके ॥ ४४० ॥

430 (C. 479b-480a) [1]C. गेयपादं. [2]C. स्थितं वाद्यं M. ⁰पाद्यमा⁰. N. ⁰पाठ्यमा. [3]C. पुष्पगन्धिका (v.l. ⁰गण्डिका). [4]C. प्रच्छेदका⁰. 431 (C. 480b-481a). 432 (C. 481b-482a). 433 (C. 482b-483a) [1]C. स्थितवाद्यञ्च. [2]C. ग्रहमोक्ष्ये. 434 (C. 483b-484a) [1]C. लासी. 435 (C. 484b-485a). 436 (C. 485b-486a) [1]C. ब्रंहणः पूर्ववर्षेषु. N. ब्राह्मणं पूर्वर्षेषु. [2]C. मार्दितेषु. 437 (C. 486b-487a) [1]C. सं. 438 (C. 487b-488a) [1]N. परिवर्त्तौ. [2]N. विकला न, MC. विकलेन. 439 (C. 488b-489a). 440 (C. 489b-490a ; K. 299) [1]C. पुरुषश्चास्य. [2]K. ⁰ङ्गता, [3]K. प्रतीरकं.

इत्येतत्प्रथमं ह्यङ्गं [1]गेयपदमिति स्मृतम् ।
[2]स्थितपाठ्यस्य वक्ष्यामि विधानञ्चाप्यतः परम् ॥ ४४१ ॥
वृत्तमेकमथ द्वे वा योजयेत् पञ्चपाणिना ।
अतः परञ्च द्वे [1]भूयः खञ्जके सम्प्रयोजयेत् ॥ ४४२ ॥
चञ्चत्पुटेन कर्तव्या द्विकलेन ततः परम् ।
यथाक्षरेण चायुक्ता सन्निपातैस्तथाऽष्टभिः ॥ ४४३ ॥
[1]अवसाने तु योक्तव्यं [2]त्वरितं पञ्चपाणिना ।
द्विकलेनेति कर्तव्यं [3]स्थितपाठ्यं प्रयोक्तृभिः ॥ ४४४ ॥
उपोह्य तालं त्र्यस्रं च [1]बृहत्पादपदैः समैः ।
[2]आसीनपाठ्यं युञ्जीत सर्वैर्भावैस्तु पौरुषैः ॥ ४४५ ॥
[1]एवं चतुर्भिः पादैस्तु [2]समैरर्थवशानुगैः ।
[3]आसीनपाठ्यं कर्तव्यं विधिवत् पञ्चपाणिना ॥ ४४६ ॥
[1]आसीनपाठ्ये कर्तव्यः प्रयोगः शीर्षकस्य तु ।
अष्टभिः सन्निपातैश्च [2]युक्तस्तालादिनैव तु ॥ ४४७ ॥
[1]यथाक्षरप्रवृत्तेन विधिवत् पञ्चपाणिना ।
द्वितीयपरिवर्तस्य सन्निपाते [2]तथाष्टमे ॥ ४४८ ॥
अतीतयुग्मतालेन [1]श्लोकः कार्यस्ततः परम् ।
[2]आसीनपाठ्ये यद्वाद्यमवनद्धकृतं भवेत् ॥ ४४९ ॥
आसीने [1]गात्रसञ्चारैस्तत्र साम्यं प्रयोजयेत् ।
अष्टादश द्वादश वा पदानि च ततः पुनः ॥ ४५० ॥
कुर्यादुत्तरतालेन [1]ततो निर्वहणं [2]बुधैः ।
एतदासीनपाठ्यस्य विधानं परिकीर्तितम् ॥ ४५१ ॥

441 (C. 490b-491a ; K. 300) [1]C. गेयपाद°. K. लासीत गेयपदं. [2]CK. स्थित(वा)द्यस्य. 442 (C. 491b-492a ; K. 301) [1]C. भूयः खञ्जिते. K. भूयोऽपि युग्मतालेन वा स्मृते. 443 (C. 492b-493a). 444 (C. 493b-494a ; K. 302) [1]K. अवसानं. [2]C. चरितं. N. चरितं. [2]C. स्थितवाद्य°. MN. स्थितपाठ्यं. 445 (C. 494b-495a, K. 303) [1]K. हस्था तैस्तैः समै स्तथा. [2]CK. आसीनवाद्यं. 446 (C. 495a ; K. 304) [1]C. गेयं. [2]C. अर्थपरानुगैः. [3]C. om. this. 447 (C. 495b-496a) [1]K. om. 447. [2]C. युक्तं तालां. 448 (C. 496b-497a) [1]C. यथाक्षर° [2]C. तथाष्टमे. 449 (C. 497b-498a ; K. 305a) [1]C. श्लोकः. [2]K. om. this hem. 450 (C. 498b-499a ; K. 305b) [1]C. शीर्षकाद्वै° 451 (C. 499b-500a ; K. 306) [1]K. ताली for ततो. [2]C. भवेत.

[1]विचित्रवृत्तसंयुक्तं पुंस्त्रियोर्गतिचेष्टितैः ।
अन्योन्यान्तरिते [2]नित्यं गीतवाद्येन भूषितम् ॥ ४५२ ॥
पादे पादेऽङ्गहारैश्च वाद्येन च समन्वितम् ।
स्यात्पुष्पगण्डिका नाम यदङ्गं तन्निबोधतः ॥ ४५३ ॥
तत्रैकं [1]पौरुषं श्लोकं समवृत्तं प्रयोजयेत् ।
[2]चतुर्भिः सन्निपातैश्च ज्ञेयं चञ्चत्पुटाश्रयम् ॥ ४५४ ॥
पादे पादे तथेष्टं च वाद्यं नृत्तं तथैव च ।
ततश्चान्ये स्मृते वृत्ते खञ्जनर्कुटसंज्ञिते[1] ॥ ४५५ ॥
अन्ते निर्वहणे चास्य शीर्षकं पञ्चपाणिना ।
आविद्धचार्यङ्गहारैरुद्धतैस्तत् प्रयोजयेत्[1] ॥ ४५६ ॥
[1]त्र्यङ्गं द्विधातु प्रच्छेदं विद्याल्लास्यप्रयोगवित् ।
ज्योत्स्नायां मन्दिरे वाऽपि सलिले दर्पणेऽथवा ॥ ४५७ ॥
[1]छायां संदृश्य कान्तस्य [2]प्रहर्षणविभूषितम् ।
[3]नृत्तप्रधानं क्रीडाढ्यं हेलादिभिरलंकृतम् ॥ ४५८ ॥
[1]अङ्गं प्रच्छेदकं तत्रं [2]विद्याल्लास्यप्रयोगवित् ।
चञ्चत्पुटस्य [3]तालेन तस्य प्रकीडितं [4]भवेत् ॥ ४५९ ॥
मात्रावृत्तसमैः पादैः [1]सन्निपातैस्तथाष्टभिः ।
बह्वक्षरार्थसंयुक्तं तोटकं पञ्चपाणिना ॥ ४६० ॥
द्विकलेन प्रकर्तव्यं मिश्रेणैककलेन वा ।
[1]शीर्षकं च प्रकर्तव्यं गुरुप्रायाक्षरान्वितम् ॥ ४६१ ॥
यथाक्षरेण त्र्यस्रेण सन्निपातैस्तथाष्टभिः ।
[1]विविधैककसंयुक्तं [2]कौशिकीजातिसंश्रयम् ॥ ४६२ ॥

452 (C. 500b-501a) [1]C. विचित्रवृत्तसंयुक्तं. [2]C. नित्य°. 453 (C. 501b-502a ; K. 307a). 454 (C. 502b ; K. 307b-308a) [1]C. पौरुषं. [2]C. om. this hem. 455 (K. 308b-309a) [1]C. om. 455. 456 (K. 309b-310a) [1]C. om. 456 457 (C. 503 ; K. 310b) [1]K. om. this hem. 458 (C. 504ab ; K. 311) [1]K. छायासदृश°. [2]K. प्रहर्षाय. [3]K. नृत्तं प्रसाद क्रीयायां. C. वृत्तप्रधानं क्रीडाढ्यं. 459 (C. 504c ; K. 312) [1]K. अङ्गप्रस्वेदकं. [2]C. विद्यां. [3]K. भेदेन. [4]C. स्मृतम् 460 (C. 505 ; K. 313) [1]K. श्लोकबन्धो भवेदथ. 461 (C. 506 ; K. 314) [1]K. परीचकं च. 462 (C. 507 ; K. 315) [1]C. विविधै°. [2]M जातिसंश्रितम्. K. जातिमाश्रिता.

[1]अङ्गं प्रच्छेदकं [2]कुर्याद् युक्तं प्रक्रीडितादिभिः ।
अनिष्ठुरश्लक्ष्णपदं गान्धारीजातिमाश्रितम् ॥ ४६३ ॥
चञ्चत्पुटेन योक्तव्यं [1]त्रिमूढं द्विकलेन तु ।
चतुःषष्टिः सन्निपातास्तस्मिंश्चैव प्रकीर्तिता ॥ ४६४ ॥
यथामार्गकलोपेता विदारीविविधान्विता ।
अङ्गहारान् [1]सविष्कम्भान् नैव चात्र प्रयोजयेत् ॥ ४६५ ॥
केवलं पौरुषैर्भावैः [1]पाठ्यं नाट्ययुतं नयेत् ।
नत्कुटं खञ्जकं चैव [2]विधानेन प्रयोजयेत् ॥ ४६६ ॥
[1]इति त्रिमूढमुद्दिष्टं नानारससमाश्रयम् ।
नातिरूपष्टाङ्गहारं तु [2]नातिरेचकभूषितम् ॥ ४६७ ॥
सैन्धवीमाश्रितं भाषा ज्ञेयं सैन्धवकं बुधैः ।
[1]रूपं वाद्यादिसंयुक्तं सैन्धवं स्यादथोद्धतम् ॥ ४६८ ॥
न [1]पाठ्यं स्वल्पमप्यत्र प्रकुर्वीत विचक्षणः ।
[2]वितस्तालत्रिलेशाढ्यं सैन्धवे वाद्यमिष्यते ॥ ४६९ ॥
[1]मृदङ्गहारबहुलं गुरुप्रायाक्षरान्वितम् ।
आक्रीडितस्य भागेन युग्मतालकृतेन हि[2]॥ ४७० ॥
[1]विंशत्या सन्निपातानां युक्तं सैन्धवकं भवेत् ।
मुखप्रतिमुखोपेतं तथा [2]चापपुटाश्रयम् ॥ ४७१ ॥
[1]यथाक्षरैः सन्निपातैस्तथा द्वादशभिर्युतम् ।
नैकयुक्तिविचित्रार्थं पौरुषं भावमाश्रितम् ॥ ४७२ ॥
एकाङ्गं [1]शीर्षकाङ्गं वा द्विमूढं परिकीर्तितम् ।
[2]उत्तमोत्तमके त्वादौ नत्कुटं सम्प्रयोजयेत् ॥ ४७३ ॥

463 (C. 508 ; K. 316) [1]K. वाङ्ग० [2]K. विद्याद्. 464 (C. 509 ; K. 317) [1]K. निविमूढं कलेन तु. 465 (C. 510 ; 318) [1]N. सनिष्कम्भान्. 466 (C. 511 ; K. 319) [1]C. वाद्यं &c. K. ०वाक्यं नाम्नापि तेन यत्. 467 (C. 512) [1]K. om. 467. [2]C. नातिरेचित०. 468 (C. 513 ; K. 320) [1]K. रूपवाद्यादि०. C. रूपकाद्यादि०. 469 (C. 514 ; K. 321b-321a) [1]C. वाद्यं. [2]M. वितस्तलत्रि०. K. वितस्तालत्रिमार्गेण. 470 (C. 515) [1]C. मृदङ्ग०. [2]K. om. 470. 471 (C. 516 ; K. 322a) [1]N. om. 471. [2]K. चञ्चत्पुटा०. 472 (C. 517 ; K. 322b-323a) [1]N. om. 472. 473 (C. 518 ; K. 323b-324a) [1]K. ०शीर्षकं गत्या त्रिभवं. [2]C. प्रयोगमे नत्कुटवसत्वाद्यैः सम०.

ततः [1]श्लोकं विचित्रार्थं [2]तथाचैवोपपादयेत् ।
[3]ततश्च वस्तुकं कार्यम् अपरान्तकशाखया ॥ ४७४ ॥
यथाक्षरेण कार्यं तु शीर्षकं पञ्चपाणिना ।
[1]उत्तमोत्तमकं प्रोक्तं हेलाभावविभूषितम् ॥ ४७५ ॥
कोपप्रसादबहुलं [1]साधिक्षेपैरुपक्रमैः ।
[2]संलापरुचिरैर्नित्यमुक्तप्रत्युक्तमिष्यते ॥ ४७६ ॥
[1]वस्त्वर्धेन [2]प्रकर्यास्तु तस्य तालविधिः स्मृतः ।
ततस्तु शीर्षकं कार्यं [3]संयुक्तं पञ्चपाणिना ॥ ४७७ ॥
[1]यत्र संपि(पि)ष्टकं चैव तासां त्र्यस्त्रोऽत्र एव च ।
उक्तप्रत्युक्तम् एवं [2]हि प्रसादान्तं प्रयोजयेत् ॥ ४७८ ॥
दशाङ्गं लास्यमित्येन्मया वः परिकीर्तितम् ।
प्रकरणे[1] दशाङ्गानि [2]यत्रैकस्मिन् भवन्ति हि ॥ ४७९ ॥
सञ्चार इति विज्ञेयो लास्यच्छेदे विपर्ययात् ।
एवमेतद् बुधैर्ज्ञेयं [1]गीततालविकल्पनम् ॥ ४८० ॥
[1]यत्र कार्यः प्रयत्नस्तु [2]नाट्यं ताले प्रतिष्ठितम् ।
सर्वस्येव हि नाट्यस्य आतोद्यानां तथैव च ॥ ४८१ ॥
[1]तालं कालेन संयुक्तो भवेन्नित्यं प्रमाणतः ।
हीनं प्रकृष्टवर्णं वा गानं तालेन धार्यते ॥ ४८२ ॥
तस्मादेतत् प्रयत्नेन विज्ञातव्यं प्रयोक्तृभिः ।
[1]ऋग्गाथापाणिकादिकं सप्तरूपं [2]प्रकीर्णकम् ॥ ४८३ ॥
चतुष्पदा [1]वर्धमानं ताले चैव विभाव्यते ।
तस्मात् [2]सर्वप्रयत्नेन कार्यं तालावधारणम् ॥ ४८४ ॥

474 (C. 519 ; K. 324b-325a) [1]K. स्तोकं, विचित्रार्थपदं. [2]C. ततश्चैवोपपादयेत्. [3]C. अपरान्तर शाखा च आदौ वस्तु विधीयते. 475 (C. 520, K. 325b-326a) [1]C. नैकाङ्गहार गहनं 476 (C. 521 ; K. 326b-327a) [1]K. सविक्षेपै०. [2]C. सल्लाप०. 477 (C. 522 ; K. 327b-328a) [1]K. वस्त्वर्धेन. [2]C. प्रकर्यास्तु. [3]C. प्रयुक्तं. 478 (C. 523 ; K. 328b) [1]K. om. 478a. [2]K. यथोक्तं परिकीर्तितम्. 479 (C. 524) [1]C. द्वादशो. [2]C. तथैव च. 480 (C. 525 ; K. 329a) [1]K. मानं तालप्रमाणतः. 481 (C. 526) [1]C. ततः. [2]C. नाट्यताले प्रतिष्ठितः. 482 (C. 527) [1]C. ततः. 483 (C. 528 ; K. 329b) [1]C. ऋग्गाथा पाणिका चैव. K. ०पाणिकादीनां. [2]K. प्रकीर्तितम्. 484 (C. 529 ; K. 330b) [1]C. वर्धमाने. [2]C. पूर्वप्रयत्नेन ।

यस्तु तालं न जानाति न स गाता न वादकः ।
अङ्गभूता हि तालस्य यतिपाणिलयाः स्मृताः ॥ ४८५ ॥
[1]पूर्वोक्तं वै विधानं च तच्च मे सन्निबोधत ।
त्रयो लयाश्च विज्ञेया [2]द्रुतमध्यविलम्बिताः ॥ ४८६ ॥
[1]मार्गेषु व्यक्तिमायान्ति [2]गीतवाद्योभयात्मिकाः ।
तिस्रस्तु यतयश्चान्या मार्गेषु लयसंश्रया ॥ ४८७ ॥
छन्दोऽक्षरपदानां हि [1]समत्वं यत्प्रकीर्तितम् ।
[2]कलाकालान्तरकृतः स लयो मानसंज्ञितः ॥ ४८८ ॥
[1]समा स्रोतोगता चैव गोपुच्छेति यथाक्रमम् ।
[2]पदवर्णप्रकर्षाणामक्षराणामथापि च ॥ ४८९ ॥
[1]नियमोऽथ यतिः सा तु गीतवाद्यसमाश्रया ।
आद्यन्ते चैव मध्ये च लयवर्णपदैः समा ॥ ४९० ॥
वाद्यप्रधाना भूयिष्ठा चित्रा ज्ञेया समा यतिः ।
क्वचिच्चैवावतिष्ठते क्वचिच्चैव प्रधावति ॥ ४९१ ॥
[1]वाद्यश्रुतपथावृत्तौ ज्ञेया स्रोतोगता यतिः ।
गुरुभिर्लघुभिश्चैवमविभावितमक्षरम् ॥ ४९२ ॥
लम्बिता गेयभूयिष्ठा गोपुच्छा दक्षिणे यतिः ।
[2]समपाण्यवपाणिश्च तथा उपरिपाणिकम् ॥ ४९३ ॥
[1]पाणिस्तु त्रिविधो ज्ञेयो गीतवाद्यसमाश्रयः ।
[2]लयेन यत् समं वाद्यं समपाणिः स उच्यते ॥ ४९४ ॥
[1]लयाद् यदवकृष्टं तु [2]सोऽवपाणिस्तु संज्ञितः ।
लयस्योपरि [3]वाद्यं स्यात् तथा चोपरिपाणिकम् ॥ ४९५ ॥

485 (C. 530 ; K. 330a, 331a). 486 (C. 531 ; K. 331b) [1]K. om. 486a. [2]K. °विलम्बिते. 487 (C. 532) [1]K. om. 487. [2]C. गीतं वाद्योभयात्मकम्. 488 (C. 534b-535a ; K. 332) [1]C. समर्थं. [2]K. कलाकला°. 489 (C.533 ; K. 333) [1]K. श्रोतोगता च गोपुच्छा समा चात्र विधाय च. [2]C. पाद°, K. निलयतभत्य वर्णानामचराणामथापि वा. 490 (C. 534a, 535b ; K. 334a) [1]K. नियमौ यो यति स्यात्तु. 491 (C. 535c-536a). 492 (C. 536b-537a) [1]C. वाद्यश्रुतप्रधा°. 493 (C. 537b-538a ; K. 334b) [1]MN. गेय. C. येन. [2]K. समपाणिश्च. 494 (K. 335b) [1]K. om. 494a. [2]K. लयेन यं समं. N. reads 494 though CM. om it. 495 (K. 336) [1]N. reads 495 though CM.

यत्युपान्ताक्षराणां च समवायो लयो भवेत् ।
लयात् प्रभृति एतेषां प्रमाणं परिवर्तते ॥ ४९६ ॥
[1]हानिः कलानां कार्या तु शेषेष्वन्येषु पाणिषु ।
[2]तत्र स्थितलयो यो वै सन्निपाते [3]भवेदथ ॥ ४९७ ॥
[1]स तु मध्यलयं प्राप्य सन्निपातद्वयं भवेत् ।
[2]द्रुतं चापि लयं प्राप्य सन्निपातचतुष्टयम् ॥ ४९८ ॥
[1]यो तत्र चान्तरकृतो [2]द्रुतमध्यलयो हि सः ।
[3]सोऽवपाणिस्तु [4]विज्ञेयस्तज्ज्ञै द्रुतलयाश्रयः ॥ ४९९ ॥
मध्ये च यान्तरकला [1]द्रुत[मेककला] च सा ।
उपर्युपरिपाणिश्च [2]स ज्ञेयो वाद्यसंश्रयः ॥ ५०० ॥
अतः ऊर्ध्वं कलानां तु [1]प्रमाणं न विधीयते ।
यतयः पाणयश्चैव लयाश्चैव प्रयोक्तृभिः ॥ ५०१ ॥
यथाक्रमं हि कर्तव्यं गीतयुक्तिमवेक्ष्य च ।
एवं ध्रुवतालविधिः कर्तव्यः तालयोगतः ।
अत ऊर्ध्वं प्रवक्ष्यामि ध्रुवाणामङ्गकल्पनम् ॥ ५०२ ॥

इति भारतीये नाट्यशास्त्रे तालव्यञ्जको नाम एकत्रिंशोऽध्यायः ॥

496 (C. 538b-539a) [1]C. यत्युपान्त्या°. N. यत्युवान्य°. 497 (C. 539b-540a ; K. 337a) [1]CMN. गानिः (N. हानिः) कलां गां क (गो कार्या, MN). [2]C. स्थितिलय°. K. ततः स्थित . [3]C. विधीयते. 498 (C. 540b ; K. 337b-338a) [1]C. om. 498a. [2]K. कृतं चापि. 499 (C. 541 ; K. 338b-33a) [1]K. यावत्तत्रान्तरकृता. C. या तत्र चान्तरकला. [2]C. द्रुत एव लयो हि सः. K. ह (द्रु)तमध्यलयो हि सः. [3]C. सोऽपपाणिस्तु K. सोऽर्धपाणिस्तु. [4]K. °यास्तनै रत्ह (द्रु) तलयाश्रयाः. N. °लयाश्रितः. 500 (C. 542.) [1]C. द्रुकुले (?) च. N. द्रुत······च. [2]C. संज्ञी यो. N. संज्ञ यो. 501 (C. 543 ; K. 339b) [1]C. प्रमाणेन. 502 (C. 544-545).

द्वात्रिंशोऽध्यायः

[1]ध्रुवेति संज्ञितानि स्युर्नारदप्रमुखैर्द्विजैः ।
[2]यान्यङ्गानीह उक्तानि तानि मे सन्निबोधत ॥१॥
या ऋचः पाणिका गाथा सप्तरूपाङ्गमेव च ।
[1]सप्तरूपप्रमाणं हि [2]सा ध्रुवेत्यभिसंज्ञिता[3] ॥ २ ॥
[1]एभ्यस्त्वङ्गेभ्य उद्धृत्य नानाछन्दःकृतानि च ।
[2]ध्रुवात्वं यानि गच्छन्ति तानि वक्ष्याम्यहं द्विजाः ॥ ३ ॥
मुखं प्रतिमुखं चैव [1]वैहायसकमेव च ।
[2]स्थितप्रवृत्ते वज्रं च सन्धिः संहरणं तथा ॥ ४ ॥
[1]प्रस्तारश्चोपवर्तश्च माषघातस्तथैव च ।
[2]चतुरस्रोपपाते च प्रवेणी शीर्षकं तथा ॥ ५ ॥
[1]संपिष्टकान्ताहरणे महाजनिकमेव च ।
ध्रुवाणामङ्गसंज्ञानि पञ्चानामपि नित्यशः ॥ ६ ॥
[1]एकवस्तु ध्रुवा ज्ञेया द्विवस्तु परिगीतिका ।
त्रिवस्तु मद्रकं ज्ञेयं चतुर्वस्तु चतुष्पदा ॥ ७ ॥
[1]वाक्यवर्णा ह्यलंकारा [2]लया यत्यथ पाणयः ।
ध्रुवमन्योन्यसम्बद्धा यस्मान्तस्माद् ध्रुवा स्मृता ॥ ८ ॥
ध्रुवाश्च पञ्च विज्ञेया नानावस्थासमाश्रयाः ।
एतासां चैव वक्ष्यामि सप्तरूपाङ्गकल्पनम् ॥ ९ ॥
[1]उपपातः प्रवृत्तश्च प्रावेशिक्यां प्रकीर्त्यते ।
वज्रं च शीर्षकञ्चैव ध्रुवायां शीर्षकं स्मृतम् ॥ १० ॥

1 (C. 1 ; K. 1) [1]K. ध्रुवा संज्ञानि तानि. [2]K. गीताङ्गानीह सर्वाणि विनियुक्तान्यनेकशः. 2 (C. 2 ; K. 2) [1]C. सप्तरूपं. [2]K. सद्ध्रुवेत्यभिसंज्ञितम्. [3]N. om. 2 and 3. 3 (C. 3 ; K. 3) [1]K. एभ्यस्त्वङ्गान्यथोद्धृत्य. [2]K. वाध्यत्वं. 4 (C. 4 ; K. 4) [1]C. वैहायसिकम्. [2]C. स्थिरप्रवृत्ते वज्रश्च. 5 (C. 5 ; K. 5) [1]K. प्रस्तारो माषघातः स्यादुपवर्तनमेव च. [2]K. उपघातः प्रवेण्यौ च चतुरस्रं सुशीर्षकम्. 6 (C. 6 ; K. 5) [1]C. संविष्टकान्ताहरणे. 7 (K. 7) [1]C. om. 7. 8 (C. 7 ; K. 8) [1]C. ध्रुववर्णा for वाक्यवर्णा. [2]C. लया यत्योपपाणयः. K. यतयः पाणयः लयाः. 9 (C. 8 ; K. 9) [1]K. संप्रवक्ष्यामि. 10 (C. 9 ; K. 10) [1]K. [illegible]

प्रस्तारो माषघातश्च [1]महाजनिकमेवच ।
प्रवेणी [1]ह्युपपातश्च [2]अड्डितायाः प्रकीर्तिताः ॥ ११ ॥
[1]मुखप्रतिमुखोपेता ह्यथकृष्टाभिधीयते ।
[2]वैहायसान्ताहरणे स्थितायां संप्रकीर्तिते ॥ १२ ॥
[1]संहारश्चतुरस्रश्च खञ्जनकुटके तथा ।
सन्धिप्रस्तारसंयुक्तस्त्वन्तरायां प्रकीर्तिताः ॥ १३ ॥
यान्यङ्गानि कलाश्चैव गीतकान्तर्गतानि तु ।
तानि छन्दोगतैर्वृत्तैर्विभाव्यन्ते[1] ध्रुवास्त्वथ ॥ १४ ॥
त्र्यस्रश्च चतुरस्रश्च तालः कार्यो [1]ध्रुवात्मकः ।
षट्कलोऽष्टकलश्चैव यस्तु पूर्वं [2]प्रकीर्तितः ॥ १५ ॥
[1]सर्वेषामेव गीतानां यान्यङ्गानि स्मृतान्यथ ।
[2]तेषां वृत्तं सविविधमेककं च भविष्यति ॥ १६ ॥
[1]पदवर्णसमाप्तिस्तु विदारीत्यभिसंज्ञिता ।
एतेषां [2]चैव वक्ष्यामि विधिं प्रकृतिसम्भवम् ।
[3]उत्तमानां भवेद् वृत्तं मध्यानां विवधं स्मृतम् ॥ १७ ॥
[2]नीचानामेककं कार्यं ध्रुवापञ्चविधौ बुधैः ।
त्र्यस्रं वा [2]चतुरस्रं वा [3]योगं ज्ञात्वा प्रयोगजम् ॥ १८ ॥
तेन प्रमाणयोगेन ध्रुवा कार्यावसानिकी ।
गायत्र्याश्चातिशक्कर्या अन्तरे [2]या व्यवस्थिताः ॥ १९ ॥
तेषां [1]पादप्रमाणेन ध्रुवा कार्यावसानिकी ।
शक्कर्याश्चातिकृत्या ये[2] चान्तरे त्वावसानिकी ॥ २० ॥

11 (C. 10 ; K. 11) [1]K. माहाजनिक^0. [3]K. ह्यवपात^0. [4]K. चड्ड (ड्ड) तायां. 12 (K. 12) [1]C. om. 12. 13 (K. 13) [1]C. om. 13. 14 (C. 11 ; K. 14) [1]C. ^{0}विभाव्यन्ते. [2]C. ^{0}ध्रुवास्तथा. 15 (C. 12 ; K. 15) [1]C. ध्रुवास्त्वथ. 16 (C. 13 ; K. 16) [1]K. पूर्वेषा^{0}. [2]N. तेषां वृत्त सविविधं. C. तेषां सविविधं. K. मध्यात्तासु कार्यो मघकं विवधोऽथ वा. 17 (C. 14 ; K. 17, 18a) [1]C. om. 17a. [2]K. संप्रवक्ष्यामि. [3]K. जेष्ठानां वृत्तसंयुक्तं कुर्यादादौ तथैव च. 18 (C. 15ab ; K. 18b-19a) [1]K. विवधं चैव मध्यानां नीचानामेककं तथा. [2]C. चतुस्रं. [3]C. श्लोकं. 19 (C. 15c-16a ; K. 19b-20a) [1]K. गायत्र्यां चातिशक्कर्याम^0. [2]C. वा. 20 (C. 16b-17a ; K. 20b-21a) [1]K. प्रमाण योगेन. [2]C. नत्वे वसानिकी (in 17b). N. यो च तत्वसानिकी.

[1]तेषामध्यर्धविहिता ध्रुवा [2]पादमयी स्मृता ।
यतिच्छन्दोविधानेन गुरुलघ्वक्षरान्वितः ॥ २१ ॥
कार्यो मात्राप्रमाणेन ध्रुवापादोऽवसानिकः ।
मध्योत्तमानां कर्तव्या चतुरस्रावसानिकी ॥ २२ ॥
[1]अथाधमानां कर्तव्या ध्रुवा त्र्यस्राऽवसानिकी ।
[2]अर्थ पूर्णपदी या तु तस्यां वृत्तं प्रयोजयेत् ।
तत्रेष्टवृत्तप्रामाण्याद् ध्रुवा [3]कार्यावसानिकी ॥ २३ ॥
ध्रुवाश्च पञ्च विज्ञेया नानावृत्तसमुद्भवाः ।
यथाख्यानरसोपेता [1]उत्तमाधममध्यमाः ॥ २४ ॥
[1]कनिष्ठिकाग्रहा चैव सन्निपातग्रहा परा ।
तथा [2]चापग्रहा चैव त्रिविधा तु ध्रुवा स्मृता ॥ २५ ॥
[1]प्रावेशिकी तु प्रथमा द्वितीयाक्षेपिकी स्मृता ।
प्रासादिकी तृतीया च चतुर्थी चान्तरा ध्रुवा ॥ २६ ॥
नैष्क्रामिकी च विज्ञेया पञ्चमी च ध्रुवा बुधैः ।
एतासां चैव वक्ष्यामि छन्दोवृत्तनिदर्शनम् ॥ २७ ॥
[1]गान्धर्वं यन्मया प्रोक्तं स्वरतालपदात्मकम् ।
पदं तस्य भवेद्वस्तु [2]स्वरतालानुभावकम् ॥ २८ ॥
[1]यत्किञ्चिदक्षरकृतं तत् सर्वं पदसंज्ञितम् ।
[2]निबद्धश्चानिबद्धश्च तत्पदं द्विविधं स्मृतम् ॥ २९ ॥
अतालश्च सतालश्च द्विप्रकारश्च [1]तद्भवेत् ।
सतालश्च ध्रुवार्थेषु निबद्धं [2]तच्च वै स्मृतम् ॥ ३० ॥

21 (C. 17-18a ; K. 21b-22a) [1]CMN. तेषां मध्यार्धविहिता. K. तेषां मात्रा द्विर्विहिता. [2]C. om. पादमयी स्मृता. 22 (C. 18b-19a ; K. 22b-23a) [1]K. मध्यमास्तमयी. [2]C. ध्रुवा त्र्यस्रा. 23 (C. 20bc ; K. 23b-24) [1]C. om. 23a. K. reads this as मध्यावसाना &c. [2]K. अर्थपूर्णपदी. [2]K. कार्या प्रमाणतः. 24 (C. 21 ; K. 25) [1]K. ह्युत्तमा[0]. 25 (C. 22 ; K. 26) [1]C. कनिष्ठका[0]. K. कनीयसी. [2]C. कापि. [3]C. पापग्रहा. K. कारिग्रहा. 26 (C. 23) [1]K. om. 26. 27 (C. 24) [1]K. om. 27. 28 (C. 25 ; K. 27) [1]K. गन्धर्वे यत् स्मृतं पूर्वं. [2]K. [0]लानुभाषितम्. 29 (C. 26 ; K. 28) [1]K. यत्स्यादक्षरसम्बन्धं. [2]K. [0]निबद्धश्चानिबद्धश्च येन येन द्विधा स्मृतम्. 30 (C. 27 ; K. 29) [1]K. तदुच्यते. [2]K. सर्वसाधकम्.

यत्तु वा करणोपेतं सर्वातोद्यानुरञ्जकम् ।
[1]अतालमनिबद्धश्च पदं तु ज्ञेयमेव च ॥ ३१ ॥
नियताक्षरसम्बद्धं छन्दोयतिसमन्वितम् ।
निबद्धं तु पदं ज्ञेयं [1]सताललयनाक्षरम् ॥ ३२ ॥
स्वच्छन्दयतिपादं तु तथा चाऽनियताक्षरम् ।
अनिबद्धं पदं [1]ज्ञेयमताललयनाक्षरम् ॥ ३३ ॥
अनिबद्धाक्षराणि स्युर्यान्यजातिकृतानि तु ।
आतोद्यकरणैस्तेषां [2]विधानमपि निर्दिशेत् ॥ ३४ ॥
[1]पदानि अनिबद्धानि तालेन रहितानि च ।
आतोद्येषु नियुक्तानि [1]यानि तानि तु [रञ्जयेत्] ॥ ३५ ॥
यानि चैव निबद्धानि [1]छन्दोक्षरविधानतः ।
ध्रुवासंज्ञानि वर्णानि तानि वक्ष्याम्यतःपरम् ॥ ३६ ॥

अत्युक्तं च प्रतिष्ठा च मध्या गायत्रीरेव च ।
एताः स्थितापकृष्टासु त्र्यस्रा ज्ञेयास्तु जातयः ॥ ३७ ॥
उष्णिगनुष्टुब् बृहती पंक्तिश्चेतीह जातयः ।
एताः प्रासादिकीनां तु युग्मा ज्ञेयास्तु जातयः ॥ ३८ ॥
अनुष्टुब् बृहती चैव जगत्यथ विलम्बिता ।
द्रुता च चपला चैव उद्गता धृतिरेव च ॥ ३९ ॥
द्रुतानां जातयो ह्येताः प्रयोगेषु प्रकीर्तिताः ।
प्रावेशिकीनां जातिस्तु उद्धतानां निबोधतः ॥ ४० ॥
[1]पंक्तिश्च त्रिष्टुब् जगती तथातिजगती पुनः ।
शक्करी चेति [1]विज्ञेया उद्धतानां तु जातयः ॥ ४१ ॥

31 (C. 28 ; K. 30) [1]K. अतालेन निबद्धं च. 32 (C. 29 ; K. 01) [1]K. सतालपतनाक्षरम्. C. नानाछन्द समुद्भवम्. 33 (C. 30) [1]C. ज्ञेयं महाताल लयाक्षरम्. N. ज्ञेयमताल लयनक्षरम्. 34 (C. 31 ; K. 32) [1]K. विधानमभिनिर्मितम्. 35 (C. 32 ; K. 33) [1]KC. अपदान्यनि[0], [2]KC. तानि (C. यानि). तानि तु रञ्जयेत् (C. योजयेत्). 36 (C. 33 ; K. 34) [1]K. छन्दोवृत्त. [2]ध्रुवासंज्ञानि पूर्वानि तानि सर्वानि रञ्जयेत् and also adds यानि चैव निबद्धानि तानि वक्ष्यामि तत्त्वतः (K. 35a). 37 (C. 34 ; K. 35b-36a). 38 (C. 35 ; K. 36b-37a). 39 (C. 36 ; K. 37b-38a) [1]K. चैवम्. 40 (C. 37 ; K. 38b-39a) [1]K. च after जगती. 41 (C. 38 ; K. 39b-40a) [1]K. निर्दिष्टा उद्धतानां.

सर्वासामेव जातीनां त्रिविधं वृत्तमिष्यते ।
गुरुप्रायं लघुप्रायं गुरुलघ्वक्षरं तथा ॥ ४२ ॥
गुरुप्रायापकृष्टा स्यात् लघुप्राया द्रुता तथा ।
गुरुलघ्वक्षरप्रायाः शेषाः कार्या ध्रुवास्तथा ॥ ४३ ॥
वृत्तान्योजःकृतानि [1]स्युर्मुखे यानि भवन्ति हि ।
तानि द्रुतासु योज्यानि [2]लघुयुग्मकृतानि तु ॥ ४४ ॥
यानि चाल्पाक्षराणि [1]स्युरल्पच्छन्दःकृतानितु ।
[1]तानि द्रुतापकृष्टासु कार्याण्याक्षेपिकीषु च ॥ ४५ ॥
गुर्वादिस्तु [1]स्थिता कार्या लघ्वादिस्तु [2]द्रुता भवेत् ।
यान्योजःयुग्मच्छन्दांसि [3]ज्ञेया साक्षेपिकी स्मृता ॥ ४६ ॥
लघुयुग्मकृता या स्यात् स्थिता साक्षेपिकी भवेत् ।
[1]विषमाल्पाक्षरा वापि ये[चाप्य]र्थवशानुगाः ॥ ४७ ॥
[1]व[र्णं]-प्रकर्षे तेषां तु शम्यातालेन योजयेत् ।
जातीनामथ सर्वेषां छन्दोवृत्तिनिदर्शनम् ।
स्थानप्रमाणसंज्ञाभिर्गदतो मे निबोधत ॥ ४८ ॥

गुरुगाथांशको यस्याः सर्वपादेषु दृश्यते ।
ह्रीरिति ख्यातनामासौ प्रथमा कीर्तिता ध्रुवा ॥ ४९ ॥
यथा— यो गङ्गावित ।[1]
[2]तत्रात्युक्तः सर्वे दीर्घाः ।
यथा— ईशं देवं सर्वं वन्दे[3] ॥ ५० ॥

यत्पदं मध्यतः [1]स्याल्लघुः सा [2]तटिः ।
यथा— शङ्करः शूलभृत् । पातु मां लोककृत् ॥ ५१ ॥

42 (C. 39 ; K. 40b-41a). 43 (C. 40 ; K. 41b-42a). 44 (C. 41 ; K. 42b-43a) [1]K. स्युदुःखदानि. [2]C. लघुयोग॰. 45 (C. 42 ; K. 43b-44a) [1]C. त्रिकापकृष्टासु. N, श्रुतापकृष्टासु. 46 (C. 43 ; K. 44b) [1]C. 47 (C. 44 ; K. 45) [1]C. विषमाघरा. 48 (C. 45 ; K. 46) [1]C. बर्णे:. K. om. 48a. 49 (C. 46 ; K. 47). 50 (C. 47-49 ; K. 48-50) [1]K. has a lacuna. [2]C. तत्रादुक्तः. N. तत्रातुक्तः. [3]NM. श्रीसमिद्धः. 51 (C. 50-51 ; K. 51-52) [1]K. मध्यलघुनाथ विद्वात्पादेन समं विभक्तं । आदित्यलघुना ह्रत्तिः स्याद्गणनाया ज्योतिमात्रे वा. [2]N. तड़ित्.

लघुः स्यात् [2]पादादौ त्रिके या [1]धृतिः सा ।
यथा— उमेशः सुरेन्द्रः ।[3] तवायुर्ददातु ॥ ५२ ॥

[1]लघुनी गुरु चेद् रजनी खलु सा ।
यथा— अधिकं विरहे । मदणो दहदि ॥ ५३ ॥

[1]मध्येत्युक्ते च ज्ञेया सा एता वै वृत्तजातयः ।
[2]प्रतिष्ठासुप्रतिष्ठानां भूयो वक्ष्यामि लक्षणम् ॥ ५४ ॥
[1]द्वितीयं लघु सर्वत्र चतुर्णां यत्र दृश्यते ।
सा प्रतिष्ठा बुधैर्ज्ञेयाः सुप्रतिष्ठा द्वयेन च ॥ ५५ ॥
यथा— [1]सोसअन्तो [2]अंगअम्मि ।
वाइ वाओ [3]पुप्फवाही ॥ ५६ ॥
[1]पदिट्ठा उपकुसुइ (?) आहिज्जइ हंसवइ ॥ ५७ ॥

लघुनो प्राग् गुरुणो द्वे । यदि पादे भ्रमरी सा ॥ ५८ ॥
यथा— वणसंडे [1]विअसंते । वणहत्थी परिखिण्णो ॥ ५९ ॥
[1]लघु गुरू सदा पदे । भवेत्तु या जया हि सा ॥ ६० ॥
यथा— हिमाहए [1]वणन्तए । [2]अस्सुंगओ पवणणओ ॥ ६१ ॥

[चतुर्णां यत्र पादाणां तृतीयं च लघुर्भवेत् ।
विज्ञेया सुप्रयोगज्ञैर्विजया नाम नामतः ॥ ६२ ॥
यथा— [1]मोरुल्लओ णच्चन्तओ । मेहागमे [2]संभन्तओ[3]] ६३ ॥

आद्यमन्त्यं चतुर्थं च सप्तमं दशमं तथा ।
गुरूण्येकादशं चैव [1]संकृतौ वृत्तसञ्चये ॥ ३१४ ॥
लघून्यन्याणि शेषाणि पादे यस्मिन् भवन्ति हि ।
[2]विज्ञेयं शीर्षकं तज्ज्ञैः स्खलितं नामतो यथा ॥ ३१५ ॥

[1]वादसमुद्धतवीचितरङ्गो [2]फडिअमणिणिकर[रुचिर]जलो
[3]वीचिपरम्परघोरणिणादो [4]पडुपवणलुलिदविहगकुलो ।
[5]मीणकुलाकुलभीमतरङ्गो [6]खुभिदघणणिवहसदिसरवो
[7]तुङ्गमहीधरमाणणिरुद्धो [8]रुसिदो इव सपदि सलिलणिधि ॥३१६॥

311 (C. 295 ; K. 270) [1]C. फलिक. K. फटिक. [2]C. कुमुदाभणिरचसदवङ्क K. कुमुदकलाणाकर सदिसवप. [3]C. गहचणिबन्धु. K. महगणबन्धु. [4]K. लोकपदांवो. [5]C. उडुगहणसमभिगतो. [6]C. नवसरसि कुमुदिदजणसुहदो. K. णवसरदमुदितसुखजणणो. 312 (C. 302 ; K. 274-275) [1]C. नययुवतिरिह्य सा. 313 (C. 303 ; K. 276) [1]K. सेलातुच. C. सेलो होचो. [2]K. [0]समरवा. C. समरपो. [3]C. नाविवुजोचलोपो. K. विज्जुज्जोवालोचो. [4]K. घणपटलभुजलधर. C. थणघचणिचयलणिचचजलहरुहरचो. [5]K. ताउम्लारोत[0]. C. तोडङ्गारो पविचरदि रुरकुसुम. [6]K. संछायन्तो लोपइयं भमइ......इव सुभसलिलो C. छादतो लोभचदो पइहरि णिवहइ सुतणुलतो. 314-315 (C. 287-288 ; K. 271-272) [1]K. संस्कृतं वृत्तसंश्रयम्. [2]C. तज्ज्ञेयं. 316 (C. 289 ; K. 273) [1]K. वातसमुद्धतवीचितरङ्ग. C. पाद समुंलदवीचि[0]. [2]K. स्फटिकमणिनिकरइसजनले, CM. पफलिवा (M. ह) णिकरजलो. [3]CN. वीचिपर (M. वरवर) घोणणिणादो. K. पङ्कजरेणुपरागपिषङ्ग. [4]C. पटुपवनललितदविहन-कुलो. K. विलुलितकमलकुवलयदले. [5]C. मीणकुलकुलभीमतरघु. K. मोटितकल्पतरुस्थित-शाखे. [6]CN. खुभिदघण (N. घण) णणिसरवो. [7]C. तुंगमहीरसमाणनिरुद्धो. K. क्रीडित दानसुगन्धमहोर्मे. [8]C. रुम्बिद इव सपदि सलिलणिहो. K. सुरगज इह सुरसरिभितिः.

[अति]कृत्या [1]पञ्चमान्त्ये चाष्टमेकादशे गुरु ।
द्वादशञ्चेति विज्ञेयं नामतश्चपला च सा ॥ ३१७ ॥

यथा— [1]मुणिगणसंथविदोधिअतेजो विधुणिअ [2]तिमिरदिघघणपडं
[3]कमलवणाइं [4]विबोधअमाणो [5]जदिगणमुणिगणपरिपठिदो
[6]भुजगसहस्सविवड्ढिदपादो [7]सुतविदकणअसदिसवपुओ
[8]करणिअरेहि पसादिअ [9]लोअं उदयदि वरतणु
दिवसकरो ॥ ३१८ ॥

पञ्चमं द्वादशं चैव दीर्घमन्त्यं त्रयोदशम् ।
उत्कृत्या यो भवेत् पादे वृत्तं वेगवती [1]तु तत् ॥ ३१९ ॥

यथा— [1]गगणतलङ्गणमभिरुहमाणो [2]उडुगणगहगणसमुपगदो
[3]हलधरआणणसुरुचिररूपो [4]जुवइजणसुहिदो मदकरओ ।
[5]किरणपडंसुअमवकिरमाणो [6]रजदगिरिसिहरसदिसवळू
[7]उदयदि सम्पदि एस जगदीवो [8]कुमुदवणरुचिर-
विमलकरो ॥ ३२० ॥

एता ह्यष्टौ बुधैर्ज्ञेयाः शीर्षकाणां तु जातयः ।
पुनर्नत्कुटानां च लक्षणं सन्निबोधत ॥ ३२१ ॥
अष्टौ नत्कुटानां च तु विज्ञेया मूलजातयः ।
दर्शनं लक्षणं तासां नामानि च निबोधत ॥ ३२२ ॥
रथोद्धता बुद्बुदकमुद्गता वंशपत्रकम् ।
प्रमिताक्षरा केतुमती हंसास्यं तोटकं तथा ॥ ३२३ ॥

317 (C. 298 ; K. 263) [1]CK. प्रकृत्या पञ्चमान्त्ये च (तु) षष्ट०. [2]K. यथा. 318 (C. 299 ; K. 264) [1]C. मुणिगणसंयविचयधिषतेजो. K. मुनिगनणन्तविविड्ढितेजा. [2]C. तिमिरवघणघतव. K. तिमिरपटं. [3]C. कंलपणाइ. [4]C. बोहषमाणो. [5]C. जदिगणमुनिघणपरिपठितो. K. यदिगणपरिपठिदो. [6]C. भुजगसहस्सविवधिदपादो. K. भुजगसहस्सविवधित्या. [7]C. सुतविदकरणअसुसदिसवपूक. K. सो वितविकरणचयो. [8]C. करणिअरेहि पसदिअलोओ. K. उदयति स एव यथावि. [9]C. लोओ. K. लोओ वेरतदिवसकरो. 319 (C. 296 ; K. 277) [1]K. यथा. 320 (C. 297 ; K. 278) [1]C. ०मह्रिरुहमाणो. [2]C. उडुगण गहण समुपगतो. K. उडुगणसमाषगदो. [3]C. ०णरुचिररूप०. K. युवतिजणाणं सुरचितरूपा. [4]C. ज्वलजणसहिदमदकर करको. K. सुखितदयितजणमदणकरो. [5]C. ०पडंसुपपिकिरमाणो. K. ०सहस्सविमुच्चितवन्दो. [6]C. रजदगिरिसहिरसदिसवह्. K. रजतिरिशिखरसदिसवधू. [7]C. उदयदि सपदि षसु. K. उदयदि संपदि षरु. [8]C. कुमुदवणरुचिरमविलमकरो. 321 (C. 304 ; K. 279), 322 (C. 305 ; K. 280). 323 (C. 306 ; K. 281).

प्रथमं च [1]तृतीयं च सप्तमं नवमान्तिकम् ।
गुरूणि त्रैष्टुभे पादे नत्कुटं तद्रथोद्धतम्[2] ॥ ३२४ ॥

यथा— [1]एसिआ [2]कमलब्भगेहआ [3]रेणुपिंजरिदचारुगदिआ ।
[4]सादरं मदकलोपगुंजिदा हिण्डदे सरोवरम्मि छप्पदी ॥ ३२५ ॥

[1]तृतीयं दशमं चान्त्यं नवमैकादशं गुरु ।
बुद्बुदं चातिजगती विज्ञेयं नत्कुटं तु तत् ॥ ३२६ ॥

यथा— [1]तरुसंडअवु (खु M) हि एस रो
घणणादभि हि अ मणो हरो
असुदीण दीणागमणो णु (सं M) किदो
समुपेइ × दायिणि कमल भो स पादव ॥ ३२७ ॥

तृतीयं पञ्चमं चैव नवमं च तथैव च ।
[1]चतुर्दशं द्वादशं च नैधनं च भवन्ति वै ॥ ३२८ ॥
यस्मिन्नष्टिकृते पादे गुरूण्येतानि नित्यशः ।
छन्दोज्ञैर्ज्ञेयमतत् तु नत्कुटं ह्युद्गतं यथा ॥ ३२९ ॥

कमलाअरं कुसुमिदं [1]कलहंससंकुलं
[2]वरहत्थिजूथकलुसोद[अ]सागरोवमं[3] ।
[4]एस मन्द मन्द मधुवाररवाणुकूलदं
[5]कुरं रोरुवेइ [6]तरिदं सरदागमे सरं ॥ ३३० ॥

324 (C. 308 ; K. 282) [1]C. द्वितीयं. [2]C. reads before this 307 as सप्तमं तृतीयकं यत्र चैव नवमं सनैधनम् । गुरूणि त्रैष्टुभे पादतो गुरु भवेद्रथोद्धता त्रैष्टुभं भवति तत्र नत्कुटम् 325 (C. 309 ; K. 283) [1]K. एसिका. C. इंयषा. [2]K. ०गब्भागेहक. C. ०ब्भगहषो. [3]K. रेणुपिञ्जरिदचारुगतिका. C. षोषरेणुषोजरिद साऊपंतिषा. [4]C. सारपडुरगुणंपहतिषा. [5]CM. हाडदे (M. होण्दु) सरवमि छंपषा. K. हिण्डते सिखरम्मिछप्पदम्मो. 326 (C. 310) [1]K. reads this as follows : पञ्चमं सप्तमं चैव निधनं च गुरूण्यथ । पादे तु बृहती संस्थे यत्र तत् बुदबुदं तद् यथा ॥ २८४ ॥ 327 (C. 311) [1]K. gives the ex. as follows : तडिगुणावद्धविवषोसेदखगपसोहिदो णभसि गजी ससुका षोवंवरदिपगमे कत्त × × × २८५ ॥ 328 (C. 312 ; cf. K. 286) [1]K. द्वादशं षोडशं चैव चतुर्दशमथापि च. 329 (C. 313 ; cf. K. 287). 330 (C. 314 ; cf. K. 288) [1]C. हलभरसंकुलं. M. हलहर०. [2]C. वरहथिभाह कलसितष. M. वरहथिजूहकलसिषष. [3]CM. ०सागरोपमं. [4]CM. षसु मंदषसुमं (-द M) मन्द महुषट्टवराणुकुलदं. [5]C. कुररीलोलुवेल. [6]तरिष सदागमे सवायन्तु. [7]K. reads the ex. as follows : षण सण्डकं जहादि कोसिषो वायसाहदो, भयभीदषो च × × × यदि पादवं दीणषो । तरुकोटरं दिसंपदं लोलणेत्तषो × × × समभिद्दुदो णिसिचरो णयंयंदिपोहिदो.

[1]यत्र चतुर्थषष्ठदशमैः प्रथमनिधनकैः
भूषितमक्षरै [2]गुरुकृतैः [3]श्रवणसुखकरैः ।
[4]तत् खलु वंशपत्रपतितं मुनिगणगदितं
[5]नर्कुटकं वदन्ति नियमादुपवृत्तिरचितम् ॥ ३३१ ॥

यथा— [1]चूदवणं पफुल्लतिलअं [2]कुरवअसहिदं
[3]चारुअसोअ[मलि]कलि[दं] कुसुमसमुदिदं ।
माधवकाणणं जुवदिआजणमदजणणं
[4]हिण्डइ कोइलो [एस सदासवण]-मधुरवो ॥ ३३२ ॥

तृतीयं पञ्चमं चैव नवमं नैधनं तथा ।
गुरूण्येतानि पादे तु [1]जागते प्रमिताक्षरम् ॥ ३३३ ॥

यथा— मधुकाणणे भमिअ एस चिरं [1]जुवइमुहासवसमुव्विहिदो ।
कमलाकरे [2]सुरभिपंकजए अवहिण्डदे सरदि हंसजुवा ॥ ३३४ ॥
[कमलायरेसु [1]भमिऊण चिरं [2]भसलीमुहासवपिवासुअओ[3] ।
[4]मधूभूसिदं [5]सुरभिचूदवणं परिहिण्डदे सुतणु छप्पदओ] ॥३३५॥

आद्ये चतुर्दश च मात्रा अन्यत्र च षोडश भवन्ति तथा ।
ज्ञेया हि सा विषमपादे केतुमति नर्कुटं जातिः ॥ ३३६ ॥

यथा— कुअं विलोडिअ [गअवरे] सरे विक[सिअ]पंकअम्मि [ग]दे ।
पंकअं विहाय [भमरजुवा भमइ] भमरीगणं परिगहिअ ॥३३७॥

331 (C. 315 ; K. 289) [1]C. om. यत्र. [2]C. om. गुरुकृतैः. [3]C. तु कविभिः. [4]C. गुरुभिः कविजनायितं. [5]C. तत् खलुवंशपत्रपतिम् चरण विधिगतम्. 332 (C. 316 ; K. 290) [1]K. प्फुल्लिअलअं. C. सूदपणपु लइ तिलतलअ. [2]CM. कुरवक (कुरपअ. M) सहिदं (अंM). [3]C. माहवमासए वणे वणे जुवइसहअरी. [4]C. हिंडइ कोइली सहाकरसासव मंहुरवी. K. हिण्ड × कोकिला फर × × × स वनमहुरवा. 333 (C. 317 ; K. 291) [1]K. यत्र तत्. 334 (C. 318 ; K. 292) [1]C. द्रवइमुहाइकसमंविहिषा. [2]CM. [0]पङ्कअए अवहिसएसरइ सवयि (संवकिN) [3]K. as in 335. 335 (K. 292) [1]K. रभिऊए. [2]K. भमली. [3]K. [0]सुणओ for पिवासुअओ. [4]K. मधुसूसिदं च. [5]K. सुरदि. 336 (C. 319). 337 (C. 320) [1]K. reads 336 as in 339 below. Our reconstruction is conjectural. CM. reads as follows : कुञ्ज (ञ्ज M.) विल (लव. C.) मससेविक पपक अंमिगद (अंश्मिदे, C.) मरणिआ पकं विहाय भीमअभमरिहरण परि सहिआ.

तृतीयं पञ्चमान्त्यानि प्रथमे सचतुर्थकम् ।
षष्ठं च नैधने वाथ गुरूणि ध्वजिनी यथा ॥ ३३८ ॥
[1]विलसन्तिआ कमलसण्डे [2][सु]वसन्तए कुसुमलुद्धा ।
[3]तुरियं णिपीअ मधुमत्ता छप्पदि आकुलं समुपजादि ॥ ३३९ ॥

[1]द्वितीयसप्तमान्त्याश्च चतुर्थकं
गुरु यत्राहि षष्ठो दशमोऽपि वा ।
अथोदितो हि पादेऽथ[च] जागते
भवेदितं हंसास्यमिति संस्मृतम् ॥ ३४० ॥

यथा— [1][सुगन्धवादा वान्ति हि] समाणिओ सरम्मि रम्मए फुल्लअपंकजे ।
तरङ्गसंकुले छप्पआलिअं विलोभअन्तओ पक्ख सणाहिअं ॥ ३४१ ॥
तृतीयं च चतुर्थं च षष्ठं सप्तममेव वा
दशमं नैधनं चैव गुरूणि च भवन्ति हि ॥ ३४२ ॥
पादे तु जागते यत्र शेषाणि च लघून्यथ ।
हंसास्यं नाम विज्ञेयं गदितं नर्कुटं यथा ॥ ३४३ ॥
[1]दिजहंसावतिण्णे[2] सलिले सरे [3]कुसुमामोदलुद्धा कमलाकरे ।
[4]णलिणीपत्तमज्झे परिहिण्डदि भभणायासखिण्णा भमरावली ॥ ३४४ ॥
[1]यदिहान्त्यतृतीयकषष्ठगतैर्नधमे नवमेन च भूषित[क]म् ।
[2]गुरुभिः सहितं त्विह तद्गदितं भुवि तोटकमेव हि नर्कुटकम् ॥ ३४५ ॥

338 (K. 293). 339 (K. 294) [1]See note 1 on 337. [2]K. पुकसुअन्तके. [3]K. तुरिअपपीत. 340 (C. 321) [1]K. as in 342-343 below. 341 (C. 322) [1]CM. हालह (लाहंद M.) ओग (औए M) समणिओ सरंमिरसए बु (पु. M.) लंअपङ्कए तरङ्ग संगु (कु. M) ले चपअकालिए विलोऽन्तओ पक (पंक. M) सणाहिअ. K. as in 344. 342-343 (K. 295-296). 344 (K. 297) [1]C. reads as in 341. [2]K. [0]धकंसे for वतिषे. [3]K. कुसुमोदलुद्धको (क) मलाकरे. [4]K. पत्तामज्जो परिहिण्डे दा. 345 (C. 323 ; K. 298) [1]C. यदि षष्ठतृतीयकनैधनके नवमो च भूमितम षट्पदं, K. [0]भूषि(त)पदम्. [2]K. गुरुभिः सततं त्विह तद्गदितं.

[1]यत्र चतुर्थषष्ठदशमैः प्रथमनिधनकैः
भूषितमक्षरै [2]र्गुरुकृतैः [3]श्रवणसुखकरैः ।
[4]तत् खलु वंशपत्रपतितं मुनिगणगदितं
[5]नर्कुटकं वदन्ति नियमादुपवृत्तिरचितम् ॥ ३३१ ॥

यथा— [1]चूदवणं पफुल्लतिलअं [2]कुरवअसहिदं
[3]चारुअसोअ[मलि]कलि[दं] कुसुमसमुदिदं ।
माधवकाणणं जुवदिआजणमदजणणं
[4]हिण्डइ कोइलो [एस सदासवण]-मधुरवो ॥ ३३२ ॥

तृतीयं पञ्चमं चैव नवमं नैधनं तथा ।
गुरूण्येतानि पादे तु [1]जागते प्रमिताक्षरम् ॥ ३३३ ॥

यथा— मधुकाणणे भमिअ एस चिरं [1]जुवइमुहासवसमुव्विहिदो ।
कमलाकरे [2]सुरभिपंकजए अवहिण्डदे सरदि हंसजुवा ॥ ३३४ ॥
[कमलायरेसु [1]भमिऊण चिरं [2]भसलीमुहासवपिवासुअओ[3] ।
[4]मधूभूसिदं [5]सुरभिचूदवणं परिहिण्डदे सुतणु छप्पदओ] ॥३३५॥

आद्ये चतुर्दश च मात्रा अन्यत्र च षोडश भवन्ति तथा ।
ज्ञेया हि सा विषमपादे केतुमति नर्कुटं जातिः ॥ ३३६ ॥

यथा— कुञ्जं विलोडिअ [गअवरे] सरे विक[सिअ]पंकअम्मि [ग]दे ।
पंकअं विहाय [भमरजुवा भमइ] भमरीगणं परिगहिअ ॥३३७॥

331 (C. 315 ; K. 289) [1]C. om. यत्र. [2]C. om. गुरुकृतैः. [3]C. तु कविभिः. [4]C. गुरुभिः कविजनायितं. [5]C. तत् खलुवंशपत्रपतिम् चरण विधिगतम्. 332 (C. 316 ; K. 290) [1]K. पफुल्लिअलअं. C. सूदपणपुंलइ तिलतलअ. [2]CM. कुरवक (कुरपअ. M) सहिदं (अंM). [3]C. माहवमासए वणे वणे जुवइसहअरी. [4]C. हिंडइ कोइलो सहाकरसासव मंहुरवो. K. हिण्ड × कोकिला फर × × × स वनमहुरवा. 333 (C. 317 ; K. 291) [1]K. यत्र तत्. 334 (C. 318 ; K. 292) [1]C. द्रवइमुहाइकसमंविहिआ. [2]CM. ⁰पङ्कअए अवहिसएसरइ सवयि (संवकिN) [3]K. as in 335. 335 (K. 292) [1]K. रभिऊण. [2]K. भमली. [3]K. ⁰सुणओ for पिवासुअओ. [4]K. मधुसूसिदं च. [5]K. सुरदि. 336 (C. 319). 337 (C. 320) [1]K. reads 336 as in 339 below. Our reconstruction is conjectural. CM. reads as follows : कुञ्ज (ञ्जं M.) विल (लव. C.) मससेविक पपक अंमिगद (अंग्मिदे, C.) मरणिआ पकं विहाय भीमअभमरिहरण परि सहिआ.

तृतीयं पञ्चमान्त्यानि प्रथमे सचतुर्थकम् ।
षष्ठं च नैधने वाथ गुरूणि ध्वजिनी यथा ॥ ३३८ ॥
[1]विलसन्तिआ कमलसण्डे [2][सु]वसन्तए कुसुमलुद्धा ।
[3]तुरियं णिपीअ मधुमत्ता छप्पदि आकुलं समुपजादि ॥ ३३९ ॥

[1]द्वितीयसप्तमान्त्याश्च चतुर्थकं
गुरु यदाहि षष्ठो दशमोऽपि वा ।
अथोदितो हि पादेऽथ[च] जागते
भवेदितं हंसास्यमिति संस्मृतम् ॥ ३४० ॥

यथा— [1][सुगन्धवादा वान्ति हि] समाणिओ सरम्मि रम्मए
फुल्लअपंकजे ।
तरङ्गसंकुले छप्पअआलिअं विलोभअन्तओ पक्ख
सणाहिअं ॥ ३४१ ॥

तृतीयं च चतुर्थं च षष्ठं सप्तममेव वा
दशमं नैधनं चैव गुरूणि च भवन्ति हि ॥ ३४२ ॥
पादे तु जागते यत्र शेषाणि च लघून्यथ ।
हंसास्यं नाम विज्ञेयं गदितं नर्कुटं यथा ॥ ३४३ ॥
[1]दिजहंसावतिण्णे[2] सलिले सरे [3]कुसुमामोदलुद्धा कमलाकरे ।
[4]णलिणीपत्तमज्झे परिहिण्डदि भमणायासखिण्णा
भमरावली ॥ ३४४ ॥
[1]यदिहान्त्यतृतीयकषष्ठगतैर्नैधमे नवमेन च भूषित[क]म् ।
[2]गुरुभिः सहितं त्विह तद्गदितं भुवि तोटकमेव हि
नर्कुटकम् ॥ ३४५ ॥

338 (K. 293). 339 (K. 294) [1]See note 1 on 337. [2]K. पुकसुअन्तके. [3]K. तुरिअपपीत. 340 (C. 321) [1]K. as in 342-343 below. 341 (C. 322) [1]CM. हालह (लाहंद M.) भोण (भीए M) समणिओ सरंमिरसए बु (पु. M.) लंअपङ्कए तरङ्ग संगु (कु. M) ले चपअकालिए विलोऽन्तओ पक (पंक. M) सणाहिअ. K. as in 344. 342-343 (K. 295-296). 344 (K. 297) [1]C. reads as in 341. [2]K. ⁰धकंसे for वतिणे. [3]K. कुसुमोदलुद्धको (क) मलाकरे. [4]K. पत्तामज्जो परिहिण्डेदा. 345 (C. 323 ; K. 298) [1]C. यदि षष्ठतृतीयकनैधनके नवमो च भूमितम षट्पदं, K. ⁰भूषि(त)पदम्. [2]K. गुरुभिः सततं त्विह तद्गदितं.

यथा – [1]रजणीविरमे अदिभीमरवो भयसंजणणो खगकोसिगओ ।
अणुवायसएहि [2]अवहत्थिदओ परिमग्गदे कोटरअं तुरिदं ॥३४६॥

एतास्तु जातयः प्रोक्ता [1]नत्कुटानां समासतः ।
पुनश्च खञ्जकानां तु सम्प्रवक्ष्यामि लक्षणम्[2] ॥ ३४७ ॥
प्रमोदं खञ्जकं पूर्वं [1]भाविनी मत्तचेष्टितम् ।
एतास्तिस्रः समाख्याताः खञ्जकानां तु जातयः ॥ ३४८ ॥
[1]आद्यचतुर्थे षष्ठदशमं स षोडशमथान्त्यमेव च [1]यदि
द्वादशमेव यत्र चरणेषु सप्तदशकात् परं च विहितम् ।
छन्दसि चेत्तथा [3]गुरुभवेद्थाकृतिगतं भवेत्तु सततं
[4]मद्रकामदखञ्जकमतः पुनश्च कथितं प्रमोदकम् ॥ ३४९ ॥
यथा— [1]माधवमाससोहिद समग्गए उववणम्मि फुल्लकुसुमे
[2]णिच्च पर[ग]—पमत्तबहुपक्खिसंघपरिघट्टणादमुहले ।
कुंडिद(?) दसंडसकयार चच्चरविलोलमन्द(?)पवणे
हिण्डदि छप्पदाणुगदे मम्र—उपरदोय(?) इन्दुवदणा[3] ॥ ३५० ॥

आद्यपञ्चममथान्त्य सप्तमं स्यात् तृतीयमेघ दीर्घकम् ।
यस्याः पादयोर्गतो हि सा भाविनीति खञ्जकम् ॥ ३५१ ॥
यथा— [1]जादि वेधुणायमाणओ पुप्फरेणुगुणणिग्गओ ।
[2]कलुपंकदो पसोभिदो छप्पओ दुदं पधाविदो ॥ ३५२ ॥

यदा तृतीयसप्तमं तथाद्यपञ्चमं लघु ।
तदा तु मत्तचेष्टितं बुधा वदन्ति खञ्जकम् ॥ ३५३ ॥
यथा— पफुल्लफुल्लपादवं विहंगमोवसोभिदं ।
वणं पगीदछप्पदं उवेइ एस कोइला ॥ ३५४ ॥

346 (C. 324 ; K. 299) [1]CM. रयविषमे षतिभीमरबी भवषस (सं M) जषणो चर (पर M) कोसिष (षा C.)षो. K. रमणीसहिषो रजनीविराम गगणङ्गणए. [2]CM. पहंघिदषो सारिम (षं. M.) गल कीधरषन्तुरिष. 347 (K. 300) [1]K. नर्कुटानां. [2]C. om. 347-354. 341 (K. 301) [1]K. भावणी. 349 (K. 302) [1]K. [0]चतुर्थे. [2]K. यदि in the next foot. [3]K. चेदथाक्रतिगणं. [4]K. मद्रकामदखञ्जकमदि. 350 (K. 303) [1]K. माधवमा-पसोभिद समग्रके. [2]K. निव्वपरमत्तबह्रुपरिघट्टणाद[0]. [3]K. [0]इद्र(न्दु) वदणा. 351 (K. 304). 352 (K. 305) [1]K. जाति वेघुणयाणमानुवृदरेण गुणिनृगषो. [2]K. कल्लयं कतुपसोभिदो. 353-354 (K. 306-307).

नत्कुटानां [1]तु खञ्जानाम् एता वै मूलजातयः ।
आभ्यो विनिःसृताश्चान्या युग्मौजा विषमाक्षराः ॥ ३५५ ॥
चतुःषष्टि ध्रुवानां च विज्ञेया मूलजातयः ।
समवृत्ताक्षरकृता [1]अतोऽन्या विषमाः स्मृताः ॥ ३५६ ॥
[1][नाना]वृत्तास्तु जायन्ते ध्रुवास्तिस्रस्तु नित्यशः ।
युग्मौजाश्चापि मिश्राश्च [2]विषमार्धसमाः समाः ॥ ३५७ ॥
[1][समवृत्तासु तत्र तु] [2]पञ्चाशीतिः शते स्मृताः ।
[3]तत्रार्धविषमाणां तु षष्ट्यां चार्धश[तं] स्मृताः ।
एतदेव परीमाणं विषमाणां प्रकीर्तितम् ॥ ३५८ ॥
[1]सामान्या एव जायन्ते ध्रुवा विषमपादिका ।
[2]स्वेच्छा नाम्ना तु नाभानि [3]तासां कार्याणि वृत्तयः (?) ॥ ३५९ ॥
एतास्तु जातयः प्रोक्ता नानावृत्तसमुद्भवाः ।
अत ऊर्ध्वं प्रवक्ष्यामि विकल्पान् पञ्चहेतुकान् ॥ ३६० ॥
जाति[:] स्थानं प्रकारश्च प्रमाणं नाम चैव हि ।
ज्ञेया ध्रुवाणां नाट्यज्ञैर्विकल्पा पञ्चहेतुकाः ॥ ३६१ ॥
वृत्ताक्षरप्रमाणं हि जातिरित्यभिसंज्ञिताः ।
[1]समार्धविषमाभिश्च प्रकारः परिकीर्तितः ॥ ३६२ ॥
[1]षट्कलाष्टकले चैव [2]प्रमाणे द्विविधे स्मृते ।
[3]यथा गोत्रकुलाचारैर्नृणां नाम विधीयते ॥ ३६३ ॥
एवं [4]स्थानाश्रयोपेतं ध्रुवाणामपि चेष्यते ।
प्रवेशाक्षेपनिष्क्रामप्रासादिकमथान्तरम् ॥
[स्थ]ानं पञ्चविधं[5] [6]विद्याद् ध्रुवायोगसमन्वितम् ॥ ३६४ ॥

355 (C. 325 ; K. 308) [1]C. बुधैर्ज्ञेया होता. 356 (C. 326 ; K. 309) [1]C. ह्यती. 357 (C. 327 ; K. 310) [1]C. समवृत्तासु. K. समवृत्तास्तु. [2]C. पञ्चाशीतिः शते see 358 below. 358 (C. 327b-328a ; K. 311) [1]Conjectural emendation. [2]See note 2 on 357. [3]C. om. 358b. 359 (C. 328b-329a ; K. 312) [1]K. सामन्योजाश्च. [2]C. स्वच्छा. K. स्वेन. [3]K. सांकार्याणि ब्रहत्तमः. 360 (C. 329b-330a ; K. 313). 361 (C. 330b-331a ; K. 314). 362 (C. 331b-332a ; K. 315) [1]C. समार्धिविषमाणाञ्च. 363-364 (C. 332b-334 ; K. 316-317) [1]K. षट्घनीष्ट[0]. [2]C. प्रमाणं. [3]C. यथाहेतु-कुला[0]. [4]K. नामाभि. [5]CM. गानं. [6]C. ज्ञेयं श्रुयतां चास्य लक्षणम्.

नानारसार्थयुक्ता नृणां या [1]गीयते प्रवेशेषु ।
प्रावेशिकी तु नाम्ना विज्ञेया सा ध्रुवा तज्ज्ञैः ॥ ३६५ ॥
[1]अङ्कान्ते निष्क्रमणे पात्राणां गीयते प्रयोगेषु ।
निष्क्रामोपगतगुणां विद्यान्नैष्क्रामिकीं तां तु ॥ ३६६ ॥
क्रममुल्लंघ्य विधिज्ञैः क्रियते या [1]द्रुतलयेन नाट्यविधौ ।
आक्षेपिकी ध्रुवा सा[ऽ]द्रुता स्थिता वाऽपि विज्ञेया ॥ ३६७ ॥
या च रसान्तरमुपगतमाक्षेपवशात् [1]प्रसादयति रङ्गम् ।
[2]रागप्रसादजननी [3]ज्ञेया प्रासादिकी सा तु ॥ ३६८ ॥
[1]विषण्णे विस्मृते क्रुद्धे सुप्ते मत्तेऽथ संग[रे][2] ।
गुरुभारावसन्ने च मूर्च्छिते पतिते तथा ॥ ३६९ ॥
[1]विषसंमूर्च्छिते भ्रान्ते वस्त्राभरणसंयमे ।
दोषप्रच्छादने या च गीयते [2]सान्तरा ध्रुवा ॥ ३७० ॥
ध्रुवाणां चैव सर्वासां रसभावसमन्वितम् ।
[1]तथा स्थानं प्रवक्ष्यामि यत्र गेयं प्रयत्नतः ॥ ३७१ ॥
द्विविधं तु स्मृतं स्थानं परस्थं स्वात्मसंश्रितम् ।
[1]यत्त्वाक्षेपसमायुक्तं तच्च मे सन्निबोधत ॥ ३७२ ॥
बद्धे निरुद्धे पतिते व्याधिते [1]मूर्छिते मृते ।
अवकृष्टा ध्रुवा कार्या भावे च करुणाश्रये ॥ ३७३ ॥
औत्सुक्ये ह्यवहित्थे च चिन्तायां परिदेविते ।
श्रमे दैन्ये विषादे च स्थिता कार्या ध्रुवा बुधैः ॥ ३७४ ॥
एतेष्वेव तु भावेषु करुणावेदितेषु च ।
ध्रुवा [1]द्रुता तु कर्तव्या [2]तथावेगसमाश्रया ॥ ३७५ ॥

365 (C. 335 ; K. 318) [1]K. नीयते. 366 (C. 336 ; K. 319) [1]C. अङ्कान्ते निष्क्रान्ते या तु भवेत् प्रस्तुतस्तुतियोगे. 367 (C. 337 ; K. 320) [1]C. द्रुतलयेन नृत्तविधौ. C. द्रुतलये तु. 368 (C. 338 ; K. 321) [1]K. द्रुतं प्रसादयति. [2]C. रङ्ग (ङ्गं) wrongly put before 368b. [3]K. विद्यात् प्रासादिकीं तां तु. 369 (C. 339) [1]K. om. 369. [2]C. संगते. 370 (C. 340a ; K. 322) [1]C. om. 370a. [2]K. सान्तराच्छदा. 371 (C. 340b-341a ; K. 323) [1]C. यथास्थानं. 372 (C. 341b-342a ; K. 324) [1]CK. यत्राक्षेप. 373 (C. 342bc ; K. 325) [1]C. साधिते. 374 (C. 343 ; K. 326). 375 (C. 344 ; K. 327) [1]K. हता, C. ध्रुवा. [2]K. करुणे भावसंश्रया;.

यत्र [1]प्रत्यक्षजं दुःखं [2]मृताभिहतदर्शनात् ।
स्थिता तत्र प्रयोक्तव्या करुणे तु रसे बुधैः ॥ ३७६ ॥
[1]उत्पातदर्शने चैव ह्यमर्षेऽद्भुतदर्शने ।
विषादे च [2]प्रमादे च रोषे सत्त्वप्रदर्शने ॥ ३७७ ॥
रौद्रवीरभयाद्येषु प्रत्यक्षावेदितेषु च ।
ध्रुवा द्रुतलया कार्या ह्यावेगे संभ्रमे तथा ॥ ३७८ ॥
[1]प्रसादने याचने च तथानुस्मरणेऽपि च ।
तथातिशयवाक्येषु तथा च नवसङ्गमे ॥ ३७९ ॥
[1]हर्षे च [2]प्रार्थने चैव शृङ्गाराद्भुतदर्शने ।
ध्रुवा प्रासादिकी कार्या तज्ज्ञैर्मध्यलयाश्रया ॥ ३८० ॥
शरीरव्यसने रोषे पुनः सन्धानकर्मणि ।
सानुबन्धा बुधैः कार्या [1]गीतज्ञैरन्तरा ध्रुवा ॥ ३८१ ॥
अध्रुवास्तु प्रवेशाः [1]स्युर्गायतो रुदतस्तथा ।
सम्भ्रमे [2]घोषणे चैव ह्युत्पाते विस्मये तथा ॥ ३८२ ॥
एवमर्थविधिं ज्ञात्वा [1]देशकालमृतुं तथा ।
प्रकृतिं भावलिङ्गं च ततो योज्या ध्रुवा बुधैः ॥ ३८३ ॥
शीर्षकं [1]चोद्धता चैव अनुबन्धो विलम्बिता ।
[2]अड्डिता चापकृष्टा च षट्प्रकारा ध्रुवाः स्मृताः ॥ ३८४ ॥
[1]शिरःस्थानीयमेतद्धि यस्मात्तस्मात्तु शीर्षकम् ।
[2]उद्धता तूद्धतो यस्मात्तस्माद् गेया ध्रुवा बुधैः ॥ ३८५ ॥
आक्रीडितप्रवृत्तो [1]य[स्तद]र्थो लयकारकः ।
[2]नाट्योपचारजनितः सोऽनुबन्धः प्रकीर्तितः ॥ ३८६ ॥

376 (C. 345 ; K. 328) [1]K. प्रत्यक्षरं. [2]C. मृताभिहित⁰. 377 (C. 346 ; K. 329) [1]C. उत्पाते संभ्रमे. K. उत्पात दर्शनं चैव शृङ्गाराद्भुतदर्शने. [2]K. प्रमोदे च रोषसत्त्वस्य दर्शने, 378 (C. 347 ; K. 330). 379 (C. 348 ; K. 331) [1]C. प्रसादने संभ्रमे च. K. प्रसाद-याचने चैव. 380 (C. 349 ; K. 332) [1]C. गर्वे. N. गर्हे. [2]K. प्रार्थनायां च. 381 (C. 350 ; K. 333) [1]C. हितज्ञै⁰. 382 (C. 351 ; K. 334) [1]K. स्युर्गायनो गदतस्तथा. [2]C. प्रेषणे. 383 (C. 352 ; K. 335) [1]C. देशकालमतश्च यत्. 384 (C. 353 ; K. 336) [1]K. चोद्गता. [2]K. इति (आदि) ता. 385 (C. 354 ; K. 337) [1]C. शिरःस्था नीयते तद्धि. [2]K. उद्गता. 386 (C. 356 ; K. 338) [1]C. यं चतुर्थो लोप⁰, K. यश्चतुर्थलेप. N. यं चतुर्थोलय⁰. [2]N. नान्योप⁰.

[1]नातित्वरितसंचारा नाट्यधर्ममनुस्मृता ।
[2]सविलम्बितसञ्चारा [3]भवेदथ विलम्बिता ॥ ३८७ ॥
[1]अड्डिता तूत्कटगुणा शृङ्गाररससम्भवा ।
[2]यस्मात्तस्मात् प्रसन्ना च तस्मादेवाड्डिता स्मृता ॥ ३८८ ॥
[1]अन्यभावेषु कृष्टा च कृष्टा हेतुषु गीयते ।
यस्मात् कारुण्यसंयुक्ता अपकृष्टा भवेत्ततः ॥ ३८९ ॥
[1]या तु प्रावेशिको दीप्ता सा [2]कार्योद्धता नृणाम् ।
या समासित(?) सञ्चारा भवेदथ विलम्बिता ॥ ३९० ॥
[1]या तु प्रासादिकी नाम स्त्रीणां [2]कार्याड्डिता तु सा ।
या स्थिता सापकृष्टा तु या[ऽ] [1]द्रुता सा विलम्बिता ॥ ३९१ ॥
[1]यतो लयवाद्ययतिपद्वर्णस्तथाक्षरम् ।
अनुबन्धाति गीतेषु प्रकारा षट् प्रवेशजा ॥ ३९२ ॥
[1]शीर्षकश्चोद्धता चैव देवपार्थिवयोः स्मृते ।
[2]दिव्यपार्थिववैश्यानां स्त्रीणां योज्या तथाड्डिता ॥ ३९३ ॥
मध्यमानां प्रवेशे च ज्ञेया [1]द्रुतविलम्बिता ।
नीचानां चैव कर्तव्यं नृणां [2]नत्कुटखञ्जका ॥ ३९४ ॥
[1]खञ्जकं नत्कुटञ्चैव स्थानप्रासादिकी तथा ।
[2]कस्माल्ललितभावत्वाद्धास्यशृङ्गारयोर्यतः ॥ ३९५ ॥
कुर्यान्नीचे [1]मृते चैव अनुबन्धं लयाश्रयम् ।
स्त्रीणां राजन्यवैश्यानामपकृष्टास्तथैव च ॥ ३९६ ॥
सन्निपातास्तु चत्वारः प्रावेशिक्या भवन्ति हि ।
[1]शेषा द्विसन्निपातास्तु शीर्षकाः षट्पदाः स्मृताः ॥ ३९७ ॥

387 (C. 358 ; K. 339) [1]K. नाटीत्वरित⁰. [2]C. षविलम्बित. [3]K. जा च द्रुतविलम्बिता. 388 (C. 357 ; K. 340) [1]K. षदिता. [2]K. यस्मात् स्थान⁰. 389 (C. 355 ; K. 341) [1]C. षन्यभावेऽपकृष्टा च द्रव्य हेतुषु साध्यते. 390 (C. 360 ; K. 342a) [1]K. om. 390b. [2]K. कार्यात्वदिता. 391 (K. 342b-343a) [1]C. om. 391. [2]K. यान्तरा सानुषन्धाया. 392 (C. 359, 361 ; K. 344a) [1]K. om. 392a. 393 (C. 362 ; K. 344b-345a) [1]K. शीर्षिका. [2]C. दिव्या. K. दित्या. 394 (C. 363 ; K. 345b-346a) [1]K. द्रुतविल⁰. [2]K. खञ्जकनर्कुटे. 395 (C. 364 ; K. 346b-347a) [1]K. खञ्जकं नर्कुटं चैव. [2]K. कामाल्ल⁰. C. तस्माल्ल⁰. 396 (C. 365 ; K. 347b-348a) [1]C. तथा चैव षनुषन्धाश्रये तु सा. 397 (C. 366 ; K. 348b-349a) [1]C. शीर्षाद्दि. K. शेषा हि.

[1]स्थिता वाप्यड्डिता वापि नीचानां न हि कारयेत् ।
सर्वभावाश्रयगतौ तेषां कार्यं तु [1]नत्कुटम् ॥ ३९८ ॥
त्रयो भावा भवन्त्येषां [2]हास्यशोकभयाश्रयाः ।
एवं भावान् विदित्वा तु ध्रुवा योज्या प्रयोक्तृभिः ॥ ३९९ ॥
वस्तु प्रयोगं [1]प्रकृतिं [2]रसभावमृतुं वयः ।
देशं कालमवस्थां च ज्ञात्वा योज्या ध्रुवा बुधैः ॥ ४०० ॥
[1]वस्तु देशसमुत्थं च नगरारण्यसंभवम् ।
प्रयोगश्चैव विज्ञेयो दिव्यमानुषसंश्रयः ॥ ४०१ ॥
उत्तमाधममध्या तु त्रिविधा प्रकृतिः स्मृता ।
रसभावौ तु पूर्वोक्ता[1]वृतुः कालकृतस्तथा ॥ ४०२ ॥
शिशुयौवनवृद्धत्वं वयश्चैव प्रकीर्तितम् ।
कक्ष्यादिभेदजनितो देशस्तु [1]विविधः स्मृतः ॥ ४०३ ॥
कालो रात्रिंदिवकृतो [1]मासपक्षविनिर्मितः ।
अवस्था चैव विज्ञेया [2]सुखदुःखकृता तथा ॥ ४०४ ॥
स्थानान्येतानि तु बुधैर्नानावस्थानि नित्यशः ।
प्रयोगे [1]तु प्रयोज्यानि रसभावौ समीक्ष्य तु ॥ ४०५ ॥
यानि [1]वाक्यैस्तु न ब्रूयात्तानि गीतैरुदाहरेत् ।
[2]गीतैरेव हि [3]वाक्यार्थैः रसपाको [4]बलाश्रयः ॥ ४०६ ॥
ध्रुवाणामाश्रयाः कार्या [1]औपम्यगुणसंभवाः ।
उत्तमाधममध्यानां स्त्रीणां नृणामथापि च ॥ ४०७ ॥
[1]चन्द्राग्निसूर्यपवना [2]देवपार्थिवयोः स्मृताः ।
दैत्यानां राक्षसानां च मेघपर्वतसागराः ॥ ४०८ ॥

398 (C. 367 ; K. 349b-350a) [1]K. स्थितं चाप्यदितं चैव. 399 (C. 368 ; K. 350b-351a) [1]K. नाटकम्. [2]C. हास्यवीरभयाश्रयाः. K. हास्यशोकभयानकाः. 400 (C. 369 ; K. 351b-352a) [1]KC. प्रकृतं. [2]K. रसभावाश्रितं च. C. रसभावान्वितं. 401 (C. 370 ; K. 352b-353a) [1]C. वस्तुदेशसमर्थं. K. वस्तू द्देश्य समुत्थं. 402 (C. 371 ; K. 353b-354a) [1]C. ऋतुः. 403 (C. 372 ; K. 354b-355a) [1]K. द्विविधः. 404 (C. 373 ; K. 355b-356a) [1]K. वामकादिविनिश्रितः. [2]K. सुखदुःख समुद्भवाः. 40 5 (C. 374 : K. 356b-357a) [1]K. संप्रयोज्यानि. 406 (C. 375 ; K. 357b-358a) [1]C. वाक्यैस्तु. [2]C. गतैरेव. K. नतैरेव. [3]C. वाक्यार्थैरनैः प्राते. [4]K. वलाश्रयाः. C. वलाश्रयैः. 407 (C. 376 ; K. 358b-359a) [1]C. ह्यौपम्य⁰. 408 (C. 377 ; K. 359b-360a) [1]C. ⁰सूर्यपवन. [2]C. दैव⁰.

सिद्धगन्धर्वयक्षाणां [1]ग्रहोडुवृषभाः स्मृताः ।
तपःस्थितानां सर्वेषां सूर्याग्निपवनाः स्मृताः ॥ ४०९ ॥
[1]हव्यवाहस्तु विप्राणां ये चान्ये तपसि स्थिताः ।
एतेषां चैव या नार्यस्तासामौपम्यसंश्रिताः ॥ ४१० ॥
[1]विद्युदुल्कार्करश्मिश्च दिव्यानामपि च स्मृताः ।
देवतायाः प्रयोज्यास्तु नृपाणामपि ते मताः ॥ ४११ ॥
नागसिंहवृषाश्चैव नैते दिव्येषु कीर्तिताः ।
[1]वारणोर[ग]सिंहाश्च नृपाणामपि चेष्यते ॥ ४१२ ॥
महिषा रुरुसिंहाश्च क्रव्यादा पशवश्च ये ।
हिंस्रसत्त्वेषु ते कार्या [1]यक्षराक्षसभूतेषु ॥ ४१३ ॥
[1]उत्तमानां प्रयोक्तव्या नानारससमाश्रयाः ।
मत्तमातङ्गसहिता राजहंसाश्च योक्तृभिः ॥ ४१४ ॥
सारसा शिखिनः क्रोञ्चाश्चक्राह्वाः कुमुदाकराः ।
मध्यमानां प्रयोक्तव्या औपम्यगुणसंश्रयाः ॥ ४१५ ॥
[1]कोकिलः षट्पदो ध्वाङ्क्षः कुररः कौशिको बकः ।
पारावतः सकादम्बो ह्यधमेषु [2]प्रयोजितः ॥ ४१६ ॥
एवमेषां यथोक्तानां [1]स्त्रियो यास्तु भवन्ति हि ।
उत्तमाधममध्यानां तासाञ्चैव निबोधत ॥ ४१७ ॥
शर्वरी वसुधा ज्योत्स्ना [1]नलिनी करिणी नदी ।
नृपस्त्रीणां भवन्त्येता औपम्यगुणसंश्रयाः ॥ ४१८ ॥
दीर्घिका कुररी वल्ली सारसी शिखिनी मृगी ।
मध्यमानां भवन्त्येता [1]वेश्यादीनां तु नित्यशः ॥ ४१९ ॥

409 (C. 378 ; K. 360b-361a) [1]C. ग्राहेभ⁰. K. ग्रहेमः. 410 (C. 379a ; K. 361b-362a) [1]C. om. 410a. 411 (C. 379b-380a ; K. 362b-363a) [1]C. विद्युदुल्कार्करामाश्च. K. विद्युदुल्कार्करश्माद्या. 412 (C. 380b-381a ; K. 363b) [1]वारणे राजसिंहश्च. N. वारणोराज⁰. K. om. this hem. 413 (C. 381bc ; K. 364) [1]C. यक्षराक्षसभूतजाः. 414 (K. 365) [1]C. om. 414. 415 (C. 382 ; K. 366). 416 (C. 383 ; K. 367) [1]K. कोकिलं षटपदं etc. [2]K. प्रयोजयेत्. 417 (C. 384 ; K. 368) [1]C. स्त्रियामपि. 418 (C. 385 ; K. 369) [1]C. नलिनी तरुणी. K. तिन्तिनी करिणी. 419 (C. 386 ; K. 370) [1]K. वेश्यानां चैव.

[1]षट्पदी कुक्कुटी ध्वांक्षी [2]परपुष्टा[थ कौशिकी] ।
अधमानां ध्रुवास्वेताः प्रयोज्यास्तु प्रयोक्तृभिः ॥ ४२० ॥
[1]गत्यर्थोपमिता याश्च चलनार्था भवन्ति हि ।
[2]प्रावेशिक्यां बुधैरेव [3]नैष्क्रामिक्यां तथैव च ॥ ४२१ ॥
[1]प्रावेशिक्याश्रया ये च पूर्वाह्णे चैव ते स्मृताः ।
नक्तन्दिवसमुत्थास्तु [2]नैष्क्रामिक्यां स्वकालजाः ॥ ४२२ ॥
[1]सौम्याः पूर्वाह्णकाले तु मध्याह्ने दीप्तसंश्रयाः ।
अपराह्णे तथा [2]काले सन्ध्यायां करुणाश्रयाः ॥ ४२३ ॥
[1]गमनार्था हि ये प्रोक्ताः प्रावेशिक्यां भवन्ति हि ।
[2]स्थावरा ये च सम्प्राप्ता आक्षेपिक्याश्रया हि ते ॥ ४२४ ॥
[1]आक्षेपिक्याश्रिताः सर्वे द्रुताः स्थितकृतास्तथा ।
[1]आक्षेपा ह्येवमेव स्युर्द्रुताः स्थितगताश्रयाः ।
रोषामर्षसमुद्भूताः शोकाद्भूतभयानकाः ॥ ४२५ ॥
यद्द्रव्यं वसुधासंस्थं [1]भूतदैवतमाश्रितम्
तत्सर्वमुपनेयन्तु [2]गाने युक्तोपमाश्रये ॥ ४२६ ॥
स्थावरे स्थावरं कुर्यात् गतार्थेषु चलं तथा
[1]सुखदुखकृतान् भावान् औपम्यगुणसंश्रयान् ॥ ४२७ ॥
[1][तत्र] रथवाजिकुञ्जरमृगपक्षिशिविकाधिमानानाम् ।
गतिविक्रमं हि दृष्ट्वा कर्तव्याथ ध्रुवा तज्ज्ञैः ॥ ४२८ ॥
[1]रथपत्तिवाजिवारणविमानशिक्यस्थपक्षियानेषु[2] ।
[3]द्रुतपदवर्णविशेषा कर्तव्या वै ध्रुवा तज्ज्ञैः ॥ ४२९ ॥

420 (C. 387 ; K. 371) [1]CK. षट्पदीं कुक्कुटीं &c. [2]CK. परपुष्टां च योजयेत्. 421 (C. 388 ; K. 372) [1]K. गत्यर्थे यमिता याश्च चलनाथा. C. सत्पथा यमजा कार्या श्चपालाये. [2]K. प्रावेशिक्याः. [3]K. नैष्क्रामिक्याः. 422 (C. 389 ; K. 373) [1]K. प्रावेशिक्याश्रया यास्तु पूर्वाह्णे यास्तु ते. [2]C. ⁰क्याश्च कालजा.. 423 (C. 390 ; K. 374) [1]C. साम्या. [2]C. मध्याः. 424 (C. 391 ; K. 375a) [1]K. चलनार्था हि ये प्रोक्ता आक्षेपिक्या भवन्ति. [2]K. om. 424b. 425 (C. 392-393a ; K. 375b-376a) [1]K. om. 425a. 426 (C. 393b-394a ; K. 376b-377a) [1]K. कृतदैवतमाश्रितम्. C. मृतदैवतमानुषे. [2]K. गानयुक्तोपमाश्रये. 427 (C. 394b-395 ; K. 377bc) [1]K. सुखदुःखकृतैर्भावैरौपम्यगुणसंश्रयात्. 428 (C. 396 ; K. 378) [1]K. तुल्य. C. भूमि for तत्र. 429 (C. 397 ; K. 379) [1]C. रथसिंहपक्षिवारण⁰. K. रथपत्रवाजिवारण⁰. [2]C. ⁰शिविकान्तरिक्षयानेषु. K. ⁰सिक्यस्थपक्षियानेषु. [3]K. द्रुतदपद-वर्णवर्णैः कर्तव्या तु.

[1]ओजःकृता हि ये वै गुरुवर्णा [2]वृषगजसिंहर्क्षे[षु] ।
[3]सारसवानरहंसे तथा [4]मयूरे च कर्तव्याः ॥ ४३० ॥
[1]द्रुतगमने लघुवर्णा [2]बिलम्बितकृते तु दीर्घवर्णकृताः ।
एवं [3]स्थितद्रुतानां ज्ञात्वा भावं द्रुताः कार्याः ॥ ४३१ ॥
नास्ति [1]किञ्चिदवृत्तं हि पदं गानकृताश्रयम् ।
[2]तस्माद् गानमभिप्रेक्ष्य तद्वृत्तं योजयेद् ध्रुवम् ॥ ४३२ ॥
[1]तस्माद्वाहनगत्यर्था ध्रुवा कार्याक्षरैरेव ।
अङ्गानां समता यत्र भाण्डवाद्ये [2]भविष्यति ॥ ४३३ ॥
[1]यद् वृत्तं वाहनगतौ [1]ध्रुवा पादे विधीयते ।
तद्वृत्तं तु [2]भवेद् वाद्यं [3]अङ्गपातसमं तथा ॥ ४३४ ॥
[1]पूर्वं गानं ततो वाद्यं ततो [2]नृत्तं प्रयोजयेत् ।
गीतवाद्याङ्गसंयोगः [3]प्रयोग इति संज्ञितः ॥ ४३५ ॥
[1]हृदयस्थस्तु यो भावः [2]साङ्गाभिनयनैरथ ।
[3]निवृत्यङ्कुरसूचासु कार्यत्वभिनयान्वितः ॥ ४३६ ॥
अथ प्रासादिकी योज्या [1]प्रहर्षार्थगुणोद्भवाः ।
आकाशपुरुषो यत्र यत्र चाकाशभाषणम् ॥ ४३७ ॥
[1]अन्वर्था तत्र कर्तव्या [2]ध्रुवा ह्याभाषणाश्रया ।
[3]प्रासादिक्याश्रयाश्चापि ईर्षाक्रोधाश्रयापि वा ॥ ४३८ ॥
शृङ्गाररसमासाद्य ध्रुवान्वर्था प्रयुज्यते ।

430 (C. 398 ; K. 380) [1]K. श्रोजः क्रता तु रुवै × × × गुरुवर्णा. [2]C. वृषगजसिंहर्क्षाः. K. वृषभगजेन्द्रसिंहेषु. [3]N. सारसवाणरहंसैर्विना. C. सारसवानरहंसैस्तथा. [4]C. मयूरैश्च कर्तव्या. K. मयूरे विधातव्या. 431 (C. 399 ; K. 381) [1]C. द्रुतगमनेन लघुवर्ण. [2]K. विततगतौ च. [3]K. स्थितहतानां. C. स्थिते द्रुतानां. 432 (C. 400 ; K. 382) [1]N. तश्चिद्वृत्तं. [2]K. तस्माद्गीतिमभि. 433 (C. 401 ; K. 383) [1]K. तस्माद्वहनगत्यर्थैः. [2]K. करिष्यति. 434 (C. 402 ; K. 384) [1]C. तद्वृत्तं. K. यद्वृत्ती. [2]C. ध्रुवामाने. K. ध्रुवापादो. K. भवेच्चाद्यम्. C. भवेद् गानं. [3]K. अङ्गवाद्यसमं. 435 (C. 403 ; K. 385ab) [1]C. पूर्वंगानं. [2]C. वृत्तं. [3]K. om, प्रयोग. 436 (C. 404 ; K. 385c, 386a) [1]C. हृदयस्थास्तु ये भावाः. [2]C. सोऽङ्गजैरथ निवृत्ता. [3]K. निवृत्ताङ्कुरसूचा तु. 437 (C. 405 ; K. 386b-387a) [1]C. प्रकर्षार्थगुणोद्भवा. 438 (C. 406 ; K. 387b-388a) [1]K. अस्वर्था. [2]K. ध्रुवाद्यो भाषसंश्रयः. [3]K. प्रसादनाश्रया.

यानि [1]प्रासादिकानि स्युः स्थानानि [2]रससंश्रयात् ॥
अन्वर्था तत्र कर्तव्या ध्रुवा प्रासादिकी [3]त्वथ ॥ ४३९ ॥
भाषा तु [1]शूरसेनी स्याद् ध्रुवाणां [2]संप्रयोजने ।
[3]कदापि मागधी यत्र कर्तव्यं नत्कुटं बुधैः ॥ ४४० ॥
दिव्यानां [1]संस्कृतं गानं प्रमाणैस्तु विधीयते ।
अर्धसंस्कृतमेवं तु मानुषाणां प्रयोजयेत् ॥ ४४१ ॥
ये त्वौपम्यकृता दिव्या यदि तेषां प्रयोगतः ।
[1]प्रवेशो नाटकेऽपि स्याच् छृणु तेषां समाश्रयः ॥ ४४२ ॥
यस्तेषां [1]सात्त्विको भावः कर्मसंकीर्तनं च यत् ।
तत् कार्यं गानयोगे तु [2]प्रमाणविधिसंश्रयम् ॥ ४४३ ॥
छन्दः प्रमाणसंयुक्तं दिव्यानां गानमिष्यते ।
[1]स्तुत्याश्रयेण तत्कार्यं कर्मसंकीर्तनादपि ।
[2]ध्रुवापादविधौ कार्यं यच्चौपम्यगुणाश्रयम् ॥ ४४४ ॥
[1]माला वक्त्रं पुटं वृत्तं विश्लोकश्चूलिका तथा ।
उद्गाताऽपरवक्त्रं च कर्तव्यानि प्रयोक्तृभिः ॥ ४४५ ॥
विधानं [1]छन्दसामेषां मया पूर्वमुदाहृतम् ।
जयाशीर्वादयुक्तानि कार्याण्येतानि [2]दैवते ॥ ४४६ ॥
[1]ऋग्गाथा पाणिका ह्येषां [2]बोद्धव्यास्तु प्रमाणतः ।
[3]सुश्रव्याश्चैव यस्मात्तु तस्माद् गीतेषु योजयेत् ॥ ४४७ ॥
[1]गान्धारषड्जमध्यमपञ्चमयुक्ताश्च जातयो याश्च ।
[2]एभिः प्रमाणं गाना[नां] कर्तव्यं धैवतोपेतम् ॥ ४४८ ॥

439 (C. 407-408a ; K. 388b-389) [1]K. प्रसादिकानि. [2]K. रससंश्रयाः. [3]K. तथा. 440 (C. 408b-409a ; K. 390) [1]K. सौरसानां तु. [2]CK. संप्रयोजयेत्. [3]K. यद्यापि मागधी यत्र. C. न भाषाश्चैव मागध्यात्. 441 (C. 409b-410a ; K. 391) [1]KC. संस्कृताङ्गानां. 442 (C. 410bc ; K. 392) [1]C. प्रदेशे नाटकेऽपि. K. प्रवेशे नायकं तु स्याच्. 443 (C. 411 ; K. 393) [1]C. सात्त्विके. [2]C. प्रमाणं विधिसंश्रयम्. K. प्रमाणगुणसंश्रयम्. 444 (C. 413-414a ; K. 394) [1]K. पुण्याश्रयं च. [2]K. om. this hem. 445 (C. 412, 414b-415a ; K. 395) [1]C. its variant also as मालावृत्तं पुटोपेतं. 446 (C. 415 ; K. 396) छन्दसामेतन् etc. [2]K. दैवते. 447 (C. 416 ; K. 397) [1]K. कर्फा था. [2]K. द्रष्टव्याणि. [3]K. सुश्रवश्चैव. 448 (C. 417 ; K. 398) [1]K. गान्धारमध्यमयुतः पञ्चमयुक्तास्तु जातयो यास्तु । [2]C. एभिः प्रगाण गानां. K. ताभिः प्रमाणगणां.

प्रासादिकं स्थितं चैव नैष्क्रामं [1]संप्रवेशजम् ।
[2]प्रमाणमपि कर्तव्यं चतुःस्थानसमन्वितम् ॥ ४४९ ॥
[1]प्रायशः संस्कृतं योज्यमनुष्टुप्छन्दसा कृतम् ।
नाना[2]दैवतकार्येषु अन्तरायं विना तथा ॥ ४५० ॥
[1]वक्त्रं चापरवक्त्रं च माला चेति प्रवेशजम् ।
[2]पुटं च चूलिका चैव नैष्क्रामिकीमथेष्यते ॥ ४५१ ॥
प्रासादिक्युद्गतावृत्तं स्थिते चानुष्टुभिष्यते ।
स्थानान्येतानि योज्यानि [1]प्रमाणविबुधैरथ ॥ ४५२ ॥
यदनुष्टुप्कृतं गानं स्थितस्थानसमाश्रयम् ।
[1]शापभ्रंशाश्रयकृतं [2]चिन्तादुःखसमन्वितम् ॥ ४५३ ॥
गुरुप्रायाक्षरकृतं [1]करुणस्वरजातिकम् ।
[2]प्रकृष्टवर्णबहुलं स्थितस्थानं भवेत्तु तत् ॥ ४५४ ॥
[1]उन्मादनार्थं नृणां तु [2]तथा विहरणेषु च ।
[3]दिव्यान्वयानां कर्तव्यं [4]स्थानमनुष्टुभाश्रयम् ॥ ४५५ ॥
मानुषेष्ववतीर्णस्य दिव्यस्य स्मरणाश्रयम् ।
[1]प्रमाणगानं कर्तव्यं दिव्यभावसमन्वितम् ॥ ४५६ ॥
तस्यैव दुःखविषयं [1]शोकचिन्ताविनाशनम् ।
प्रमाणगानं कर्तव्यं [2]शोकावस्थान्तराश्रयम् ॥ ४५७ ॥
ध्रुवाणां हि विधानस्य आश्रयस्य [1]विभागशः ।
[2]यथा प्रयोगः कर्तव्यः तन्मे सन्निबोधत ॥ ४५८ ॥
स्थापिते भाण्डविन्यासे [1]त्रिसाम्नि [2]परिकीर्तिते ।
[3]आश्रावणकं कर्तव्यं [4]बहिर्गीतप्रयोगकम् ॥ ४५९ ॥

449 (C. 418 ; K. 399) [1]C. संप्रवेशयेत्. [2]C. प्रमाणं परिकर्तव्यम्. 450 (C. 419 ; K. 400) [1]K. प्रायसं. [2]K. दैवतकार्ये तु. 451 (C. 420 ; K. 401) [1]K. विष्कम्भापरवक्त्रं. [2]K. पुनश्च. 452 (C. 421 ; K. 402) [1]K. प्रामाण्यस्य बुधैरथ. 453 (C. 422 ; K. 403) [1]K. स्वर्गभ्रंशा⁰. 454 (C. 423 ; K. 404) [1]K. करुणश्रुतियतिकम्. [2]K. प्रभ्रष्टवर्णं बहुकं. 455 (C. 424 ; K. 405) [1]K. उत्पादनार्थं. [2]C. तथापहरणेन च. [3]K. दिव्यान्वयं तु. [4]K. गानं पावसमाश्रयम्. 456 (C. 425 ; K. 406) [1]K. प्रायेण गानं. 457 (C. 426 ; K. 407) [1]K. शोकचिन्ताविनाशनम्. [2]C. शोकावस्थाश्रयाश्रयम्. 458 (C. 427 ; K. 408) [1]K. विशेषतः. [2]K. तथा. 459 (C. 428 ; K. 409) [1]C. त्रिंशान्ति. [2]C. संप्रकीर्तिते. [3]C. आश्रावणात् यत्. [4]C. प्रयोजयेत्.

[1]प्रयुज्य च बहिर्गीतं पूर्वरङ्गं प्रयोजयेत् ।
[2]पूर्वरङ्गे प्रवृत्ते तु [3]नाट्यद्वारं [4]समाश्रयेत् ॥ ४६० ॥
[1]ध्रुवा तत्र प्रकर्तव्या प्रकृतीनां प्रवेशजा ।
गत्याश्रयेण [2]नाट्यज्ञैर्गानस्य परिवर्तकम् ॥ ४६१ ॥
[1]परिक्रमेण रङ्गस्य [2]गानेनार्थवशेन वा ।
परिवर्ताः प्रयोक्तव्याः षडेव तु बुधैरथ ॥ ४६२ ॥
[1]ध्रुवा तत्र प्रकर्तव्याः देवताभिर्यथा बुधैः ।
तत्र पाताः प्रकर्तव्याः एकविंशतिरेव च ॥ ४६३ ॥
त्र्यस्रा वा चतुरस्रा वा ध्रुवा [1]नाट्ये प्रयोगतः ।
त्रिकलं [2]पादपात[नं] त्र्यस्रायां च विधीयते ॥ ४६४ ॥
[1]चतुष्कलं तु पातनं चतुरस्रगतं भवेत् ।
उत्तमे चतुरस्रा तु त्र्यस्रा चैव तु मध्यमे ॥ ४६५ ॥
[1]खञ्जं नर्कुटकं चैव ह्यधमे च प्रयोजयेत् ।
विधिः स्वरगतो ह्येष [2]भवेच्चरणपातने ॥ ४६६ ॥
संभ्रमोत्पातरोषेषु कलार्धकलमिष्यते ।
[1]त्रिकलाः द्विकलैककलाश्चतुष्कलाश्चैव [2]पादविन्यासः ॥ ४६७ ॥
तत्र च साम्यं कार्यं भाण्डेन समं न गानेन ।
नह्येककला द्विकला ध्रुवाविरामा भवन्ति [1]नाट्यविधौ ।
तस्मात् साम्यं कार्यं भाण्डेन समं न गानेन ॥ ४६८ ॥
[1]ये पूर्वोक्ता [2]भावाः स्थिताश्रया [3]द्रुताश्रया वापि [स्युः] ।
तेषां पादनिपातं ज्ञात्वा साम्यं बुधैः कार्यम् ॥ ४६९ ॥

460 (C. 429a ; K. 410) [1]C. om. 460a. [2]C. पूर्वरङ्गप्रवृत्ते षु. K. प्रयुक्ते पूर्वरङ्गे तु. [3]K. नाट्यागारं. [4]C. प्रयोजयेत्. 461 (C. 429b-430a ; K. 411a) [1]K. om. 461a. [2]K. नाट्यज्ञैः पदैरनुगतैस्तथा. 462 (C. 430b-431a ; K. 411b-412a) [1]C. परिक्रमात् तु. [2]C. तथैवार्थवशेन तु. 463 (C. 431b ; K. 412b-413a) [1]C. om. 463a. 464 (C. 432 ; K. 413b-414a) [1]K. नाट्यैः प्रयोगतः. C. नाट्यप्रयोक्तृभिः. [2]KC. ⁰पतने. 465 (C. 433 ; K. 414b-415a) [1]C. चतुरस्रं. 466 (C. 434ab ; K. 415b-416a) [1]K. वास्रं नर्कुटकं. [2]C. श्वसनपातने. 467 (C. 434c-435a ; K. 416b-417a) [1]N. त्रिकलं द्विकलं चैव. K. त्रिकलद्विकलैककल. [2]C. पादविन्यासः. 468 (C. 435b-436 ; K. 417b-418) [1]C. गानविधौ. 469 (C. 437 ; K. 419) [1]C. om. [2]C. भावस्थिता⁰, [3]K. om,

[1]अपटीक्षेपकृताश्चात्यधिकहर्षशोकरोषाद्याः ।
तत्र [2]परिच्छेऽसमाः [3]कार्यास्तज्ज्ञैः प्रवेशास्तु ॥ ४७० ॥
एवमेते बुधैर्ज्ञेया प्रयोगे [1]परिवर्तजाः ।
अत ऊर्ध्वं प्रवक्ष्यामि ग्रहान् भाण्डसमाश्रयान् ॥ ४७१ ॥
अभाण्डमेकं गानस्य परिवर्तं प्रयोजयेत् ।
यच् चतुर्थे परिवर्ते तस्य भाण्डग्रहो भवेत् ॥ ४७२ ॥
[1]सन्निपातग्रहा काचित् काचिद्वै तर्जनीग्रहा ।
तथाकाशग्रहा काचिद् [2]ध्रुवा गाने भवन्ति हि ॥ ४७३ ॥
[1]ध्रुवायास्तु ग्रहो यस्मात् [2]कलाताललयान्वितः ।
स तु भाण्डेन कर्तव्यस्तज्ज्ञै[3]र्गतिपरिक्रमे ॥ ४७४ ॥
[1]शीर्षकस्योद्धतायाश्च प्रदेशिन्या ग्रहो भवेत् ।
[2]विलम्बिताड्डितायाश्च [3]सन्निपाते तृतीयके ॥ ४७५ ॥
नत्कुटस्याड्डितायाश्च प्रासादिक्यास्तथैव च ।
सन्निपातग्रहः कार्यः [1]द्रुतायाश्चोर्ध्वजो ग्रहः ॥ ४७६ ॥
नैष्क्रामिक्यानुबन्धानां ग्रहो [1]भाण्डसमो भवेत् ।
[2]न तेषां परिवर्तस्तु कार्यो [3]गाने प्रयोक्तृभिः ॥ ४७७ ॥
[1]नत्कुटस्य तु चत्वारो ग्रहाः कार्याः प्रयोक्तृभिः ।
सन्निपातश्च शम्या च तालश्चाकाशजस्तथा ॥ ४७८ ॥
[1]संभ्रमावेगहर्षेषु प्रवेशा ये भवन्ति हि ।
ग्रहो [2]गानसमस्तत्र उद्घात्यः संप्रकीर्तितः ॥ ४७९ ॥
भूषणवासःपतने [1]वैकल्ये विस्मृते परिश्रान्ते ।
[2]दोषाच्छादनहेतोरुद्घात्या ऽन्तराया[वा]स्तु ॥ ४८० ॥

470 (C. 438 ; K. 420) [1]C. अपटाक्षेपकृताद॰. K. अपटाक्षेपकृताश्चात्य॰. [2]K. परिच्छेद-समः. [3]C. कार्यस्तज्ज्ञैः प्रवेशस्तु (प्रदेश K.) 471 (C. 439 ; K. 421) [1]C. परिकीर्तिताः. 472 (C. 440 ; K. 422). 473 (C. 441 ; K. 423) [1]C. ॰ग्रहः always. [2]C. कश्चित् always for काचित्. [2]K. ध्रुवा गाने. 474 (C. 442 ; K. 424-425a) [1]K. ध्रुवायोगस्तु ग्रह. [2]C. कालताललयान्वितः, K. कालताल समन्वितः. [3]C. गतिपराक्रमे. 475 (C. 443 ; K. 425b-426a) [1]K. शीर्षकोश्चोद्ध॰. [2]K. विलम्बिता स्थिता. [3]K. सन्निपातेन कल्पते. 476 (C. 444 ; K. 426b-427a) [1]K. यश्चोर्ध्वजो ग्रहाः. 477 (C. 445 ; K. 427b-428a) [1]K. गानसमो. [2]K. तेषां हि. [3]K. गाने प्रयो॰. 478 (C. 446 ; K. 428b) [1]K. om. 478a. 479 (C. 447 ; K. 429) [1]K. ॰वेगजाश्चै × × × सापेक्षा भवन्ति. [2]K. गानसमानस्तदुपान्त्यः संप्रकीर्तितत्. 480 (C. 448 ; K. 430) [1]C. वैकल्पे. [2]K. ॰च्छादनहेतारुध्वान्त्यो नान्तरीयास्तु. C. ॰द्घात्योरन्तरायास्तु.

एवं प्रयोक्तृभिः कार्यं ध्रुवाणां सन्निवेशनम् ।
यथास्थानाश्रयोपेतं [1]नृत्तनाट्यप्रयोगजम् ॥ ४८१ ॥
यथा वर्णादृते [1]चित्रं [2]शोभते न निवेशनम् ।
[3]एवमेवं विना गानं नाट्यं रागं न गच्छति ॥ ४८२ ॥
पूर्वरङ्गविधाने तु कर्तव्यो गानजो विधिः ।
देवपूजाधिकारश्च [1]तत्र सम्परिकीर्तितः ॥ ४८३ ॥
ततश्च काव्यबन्धेषु नानाभावसमाश्रयम् ।
ग्रामद्वयं [1]च कर्तव्यं तथा [2]साधारणाश्रयम् ॥ ४८४ ॥
मुखे तु मध्यमग्रामः षड्जः प्रतिमुखे स्मृतः ।
साधारितं तथा गर्भे [1]विमर्शे चैव पञ्चमम् ॥ ४८५ ॥
कैशिकं च तथा कार्यं गानं [1]निर्वहणे बुधैः ।
[2]सन्निवृत्ताश्रयं चैव [3]रसभावसमन्वितम् ॥ ४८६ ॥
[1]यथारसकृता याः स्युः ध्रुवाः [2]प्रकरणाश्रयाः ।
नक्षत्राणीव गगनं नाट्यमुद्योतयन्ति ताः ॥ ४८७ ॥

[1]मागधी प्रथमा गीतिस्तथा [2]चैवार्धमागधी ।
संभाविता तृतीया स्यात् पृथुला च तथा परा ॥ ४८८ ॥
विनिवृत्या पदानां तु मागधी समुदाहृता ।
चित्रेऽर्धमागधी चैव द्विर्निर्वृत्तपदाश्रया ॥ ४८९ ॥
वृत्तौ सम्भाविता प्रायो [गुर्वक्षरसमन्विता] ।
[पृथुलायां दक्षिणा च] लघुवाद्याक्षरान्विता ॥ ४९० ॥
[1]गानयोगे चतस्रस्तु योज्या सर्वत्र गायनैः ।
यथाक्षरकृता ह्येताः प्रयुज्यन्ते ध्रुवास्वपि ॥ ४९१ ॥

481 (C. 449 ; K. 431) [1]C. यथावृत्तकृतं तथा. 482 (C. 450 ; K. 432) [1]C. चक्रं. [2]K. न शोभाजननं भवेत्. [3]K. एवमेव विना गीतं नाट्यं रङ्गं. 483 (C. 451 ; K. 433) [1]K. स च पूर्वः प्रकीर्तितः. 484 (C. 452 ; K. 434) [1]C. न, N. प्र॰ .[2]K. तथा. 485 (C. 453 ; K. 435) [1]C. मर्शे कैशिकमध्यमम्. 486 (C. 454 ; K. 436) [1]K. निर्वहणे. [2]C. सन्निवृत्ता-श्रयश्चैव. [3]C. रसभावसमन्वितः. 487 (C. 455 ; K. 437) [1]K. तथा रसकृता नित्यं. [2]K. प्रकरणाश्रिता. 488-489 (K. 438-439) [1]C. om. these. [2]K. चैवोर्ध्वं मागधी. 490 (K. 440a) [1]C. om. 490. See XXIX. 79 and cf. Dattila 239b. 491 (K. 440bc) [1]C. om. 491.

पूर्णस्वरं [1]वाद्यविचित्रवर्णं

[2]त्रिस्थानशोभं [3]त्रियतं त्रिमात्रम् ।

रक्तं [4]समं श्लक्ष्णमलंकृतं च

[5]सुखप्रयुक्तं मधुरं च गानम् ।। ४९२ ।।

गीते प्रयत्नः प्रथमं तु कार्यः

[1]शय्यां हि नाट्यस्य वदन्ति गीतम् ।

गीते च वाद्ये च हि [2]सुप्रयुक्ते

नाट्यप्रयोगो न विपत्तिमेति ।। ४९३ ।।

एतदुक्तं मया सम्यग् ध्रुवाणां लक्षणं महत् ।

अत ऊर्ध्वं प्रवक्ष्यामि गातृवादकयोर्गुणान्[1] ।। ४९४ ।।

गुणात् प्रवर्तते ज्ञानं दोषाच्चित्तं निरस्यति ।

तस्माद् यत्नेन विज्ञेया गुणदोषाः समासतः ।। ४९५ ।।

गाता प्रत्यग्रवया [1]स्निग्धो मधुरस्वरोपचितकण्ठः ।

[2]लयतालकलापातप्रमाणयोगेषु तत्त्वज्ञः ।। ४९६ ।।

[1]रूपगुणकान्ति[2]संस्थानसत्त्वमाधुर्यसम्पन्ना ।

पेशलमधुरस्निग्धानुनादसमरक्तशुभकण्ठा[3] ।। ४९७ ।।

[1]सुविहितसमकविधायिन्यक्षोभ्यगीततालकुशला [च] ।

[2]आतोद्यार्पितकरणा विज्ञेया [3]गायिका श्यामा ।। ४९८ ।।

[1]सुनिविष्टपाणिलययतिनियोगज्ञौ [च] सुमधुरलघुहस्तौ ।

[2]गातृगुणैश्चोपेतौ अवहितमनसौ सुसंगीतौ ।। ४९९ ।।

492 (C. 456 ; K. 441) [1]C. तत विलम्बिवर्णं. [2]K. त्रिस्थानशामि⁰. [3]KC. त्रितयं. [4]K. सम⁰. [5]K. मुखं प्रशस्तं. 493 (C. 457 ; K. 442) [1]C. शय्या. [2]C. सुप्रयुक्तौ. 494 (C. 458 ; K. 443) [1]K. here ends ch. XXXII. and begins ch. XXXIII. (गुणाध्यायः). 495 (K. XXXIII. 1). 496 (C. 459 ; K. XXXIII 2) [1]C. स्निग्ध-स्वर मधुरमांसलोपचितः. [2]C. ⁰कलामानप्रमाण⁰. 497 (C. 460 ; K. XXXIII. 3) [1]K. ⁰कान्तियुक्ता. [2]C. ⁰संस्थान धैर्यमाधुर्यसम्पन्नः. K. माधुर्योपेतसत्त्वसम्पन्नाः. [3]C. ⁰शुभकण्ठः. K. ⁰शुभकण्ठाः. 498 (C. first 461 ; K. XXXIII. 4) [1]C. reads अवसितशरीरमनसो सुनिविष्टो मधुरसञ्चारः. K. सुविहितसमकविधायिन्याक्षोभ्य गीततालयकुशलाः. [2]C. अन्योन्यार्पितकरणा. [3]K. गायिका श्यामाः. C. गायिकाः श्यामाः. 499 (C. second 461 ; K. XXXIII. 7) [1]K. सुनिविष्ट × × वाणिलय नियोगज्ञौ सुमधुरं प्रलयहस्तौ. C. ⁰लययतिविशारदोपमित⁰. [2]C. गात्रगुणै⁰.

[1]स्फुटरचितचित्रकरणौ [2]जितश्रमौ रक्तकण्ठौ प्रवीणौ ।

[3]चित्रादिवाद्यकुशलौ [4]वीणाया वादकौ भवतः ।। ५०० ।।

बलवानवहितबुद्धिर्गीतलयज्ञस्तथा सुसंगीतः ।

श्रावकमधुरः स्निग्धो [1]दृढानिलो वंशवादी स्यात् ।। ५०१ ।।

अविचलितमविच्छिन्नं [1]वर्णालंकारबोधकं मधुरम् ।

स्निग्धं [2]दोषावरणं [3]वेणोरेवं स्मृतं वाद्यम् ।। ५०२ ।।

प्रायेण तु स्वभावात् स्त्रीणां गानं नृणां च [1]पाठ्यविधिः ।

स्त्रीणां स्वभावमधुरः कण्ठो नृणां [2]बलवत्वं च ।। ५०३ ।।

यः स्त्रीणां [1]पाठ्यगुणो भवति नृणां च गानमधुरत्वम् ।

ज्ञेयः सोऽलंकारो [2]नहि स्वभावो भवति तेषाम् ।। ५०४ ।।

यद्यपि पुरुषो नेता गीतविधानं तु लक्षणोपेतम् ।

माधुर्यगुणविहीनं शोभाजननं न [1]तद् भवति ।। ५०५ ।।

एवं स्वभावसिद्धं स्त्रीणां गानं नृणां च [1]पाठ्यविधिः ।

अपरस्परसम्पन्नं कार्यं [2]चायासनिष्पन्नम् ।। ५०६ ।।

प्रायेण दानवासुररक्षयक्षोरगा विविधचेष्टाः ।

वाक्याश्रिताः प्रयोगे भवन्ति पुरुषाङ्गनाबद्धाः ।। ५०७ ।।

स्त्रीभिः कार्यः प्रयत्नेन प्रयोगः पुरुषाश्रयः ।

यस्मात् स्वभावोपहितो विलासः स्त्रीकृतो भवेत् ।। ५०८ ।।

नित्यं व्यायामयोग्याभिर्नृणां भवति सौष्ठवम् ।

स्वभावतस्तु मधुरं स्त्रीणामङ्गविचेष्टितम् ।। ५०९ ।।

एवं स्त्रीणां तु पुरुषैरुपदेष्टव्यमेव हि ।

गानं वाद्यं च पाठ्यं च नानाप्रकृतिसम्भवम् ।। ५१० ।।

500 (C. 462 ; K. XXXIII. 8) [1]K. ⁰विचित्रकरणौ. [2]K. गीतं श्रवणौ च तौ प्रवीणौ च. C. ⁰रक्तकण्ठवीणौ. [3]K. ⁰कुशली. [4]K. वीणाभ्यां वादकौ भवतः. 501 (C. 464 ; K. XXXIII. 9) [1]K. दृढपाणि × × वेदिको ज्ञेयः. 502 (C. 463 ; K. XXXIII. 10) [1]C. वर्णालंकारमोदकं. K. ⁰मविच्छिन्न⁰. [2]K. दोषावारण. C. दोषविहीनं. CN. प्रच्छादक [3]वैणवं . (स्मृतं. N) 503 (C. 465 ; K. XXXIII. 5) [1]KC. वाद्यविधिः. [2]K. सुललितत्वं च. 504 (C. 466 ; K. XXXIII. 6) [1]C. वाद्यगुणो. [2]K. ⁰ऽसौ नहि स्वभावो ह्ययं. 505-506 (C. 467-468) [1]C. न तद्भाति. [2]C. वायस निष्पन्नम्. 507-510 (C. 469-472).

अवैस्वर्यं भवेत् स्त्रीणां गान वाद्य क्रियास्वथ ।
नहि तत् [1][व]र्णमाधुर्यं पुरुषेषु भविष्यति ॥ ५११ ॥
स्मृतिर्मतिश्च मेधा च ऊहापोहस्तथैव च ।
शिष्यनिष्पादनं चैव षडाचार्यगुणाः स्मृताः [1] ॥ ५१२ ॥
मेधा स्मृतिर्गुणा श्लाघा रागः संघर्ष एव च ।
उत्साहश्च षडेवैते शिष्यस्यापि गुणाः स्मृताः ॥ ५१३ ॥

श्रावकोऽथ [1]घनः स्निग्धो [2]मधुरस्त्ववधानवान् ।
त्रिस्थानशोभीत्येवं च [3]षट् कण्ठस्य गुणाः स्मृताः ॥ ५१४ ॥
[1]दूरात्तु श्रूयते यस्मात् तस्माच्छ्रावक उच्यते ।
श्रावको सुस्वरो [2]यस्तु न विक्षिप्तो घनः स्मृतः ॥ ५१५ ॥
[1]सुश्रवः स त्वपरुषः स्निग्धस्तज्ज्ञैः प्रकीर्तितः ।
[2]महास्थानेऽप्यवैस्वर्यं स वै मधुर उच्यते ॥ ५१६ ॥
[1]स्वरेऽधिके च हीने च ह्यविरक्तो ऽवधानवान् ।
[2]शिरःकण्ठेष्वभिहतं [तत्]स्थानमधुरस्वरैः ॥ ५१७ ॥
त्रिस्थानेऽपि हि माधुर्यं यस्य नित्यं विधीयते ।
त्रिस्थानशोभीत्येवं तु [1]स हि तज्ज्ञैः प्रकीर्तितः ॥ ५१८ ॥

[1]कपिलोऽव्यवस्थितश्चैव तथा सन्दष्ट एव च ।
काकी च तुम्बकी चैव पञ्च दोषा भवन्ति हि ॥ ५१९ ॥
[1]वैस्वर्यं च भवेद् यत्र [2]तथा स्याद् [घर्घ]रायितम् ।
कपिलः स तु विज्ञेयः श्लेष्मकण्ठस्तथैव च ॥ ५२० ॥

511 (C. 473) [1]C. कर्णमाधुर्य. 512 (C. 474) [1]After XXXIII. 10, K. has the following: अतेः ज्ञानविज्ञानकरणवचनप्रयोगसिद्धिशिष्यनिष्पादनानि षडाचार्यगुणाः. 513 (C. 475). 514 (C. 476; K. XXXIII. 11) [1]C. घन⁰. [2]K. मधुरो ह्यव⁰. M. मधुरस्वरधाः. [3]K. षट्काङ्गस्य. 515 (C. 477; K. XXXIII. 12) [1]K. हृदात्त. [2]K. यस्मादच्छिद्रः. 516 (C. 478b-479a; K. XXXIII. 13) [1]K. मरुघध्वनि संयुक्तः. [2]K. मान (मनः ?) प्रह्लादनकरः. 517 (C. 478a; K. XXXIII. 14) [1]स्वरेऽधिके च हीने च.C. स्वराधिको विहीनो वा. [2]K. ⁰ष्वभिहितं त्रिस्थान. 518 (C. 479bc; K. XXXIII. 15a) [1]C. सकण्ठो मधुरः स्मृतः. 519 (C. 480; K. XXXIII. 15b-16a) [1]C. कपिलोऽव्यवस्थितः काकी तुम्बी संदष्टकस्तथा । समासतस्त्वमी पञ्च कण्ठदोषा भवन्ति हि. 520 (C. 481a; K. XXXIII. 16b-17a) [1]K. वैस्व (स्व)र्यं भवेत्तत्र. [2]C. तथा गुरुकरार्पितम्.

ऊनताधिकता वापि स्वराणां यत्र दृश्यते ।
कृशत्वदोषतश्चैवः ज्ञेयः स [1]त्वव्यवस्थितः ॥ ५२१ ।
[1]दन्तप्रयोगात् सन्दष्टः स्वाचार्यैः परिकीर्तितः ।
[2]यो न निस्तरति स्थाने स्वरमुच्चारणगतम् ॥ ५२२ ॥
[1]तथा रूक्षस्वरश्चैव स काकीत्यभिसंज्ञितः ।
[2]नासागतस्वरो यस्तु तुम्बकी सोऽभिधीयते ॥ ५२३ ॥
[1]एते गुणाश्च दोषाश्च तत्त्वतः [2]कथिता मया ।
अत ऊर्ध्वं प्रवक्ष्यामि ह्यवनद्धविधिं पुनः ॥ ५२४ ॥
गान्धर्वमेतत् कथितं मया हि
पूर्वं यदुक्तं [1]त्विह नारदेन ।
कुर्याद्य एवं [2]मनुजः प्रयोगं
सम्मानमग्र्यं [3]लभते स लोके ॥ ५२५ ॥

इति भारतीये नाट्यशास्त्रे ध्रुवाविधानं नाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥

521 (K. XXXIII. 17bc) [1]K. त्वम (न)वस्थितः. 522 (C. 482b; K. XXXIII. 18) [1]K. दन्तप्रयोगात्. C. सन्दष्ट दशनी यस्तु स सन्दष्ट इति स्मृतः. [2]C. om. 522b. 523 (C. 481b-482a; K. XXXIII. 19) [1]C. तथा विस्वरश्चैव स काकीति हि संज्ञितः. [2]K. नासाग्रग्रस्तशब्द⁰. 524 (C. 483; K. XXXIII. 21bc) [1]K. reads before this a passage which possibly belonged to the next chapter. [2]C. गदिता. 525 (C. 484; K. XXXIII. 22) [1]K. प्रपितामहेन. [2]K. नरः प्रयोगी. [3]C. कुशलो गच्छेत्.

त्रयस्त्रिंशोऽध्यायः ।

[1]ततातोद्यविधिस्त्वेष मया प्रोक्तः समासतः ।
[2]अवनद्धविभागेन लक्षणं कर्म चैव हि ॥ १ ॥
[1]आतोद्यानां प्रवक्ष्यामि विधिं वादनमेव च ।
[2]मृदङ्गपणवानां च [3]दर्दुरस्य तथैव च ॥ २ ॥
[1]गान्धर्वं चैव वाद्यं च स्वातिना नारदेन च ।
[2]विस्तारगुणसम्पन्नमुक्तं लक्षणकर्मतः ॥ ३ ॥
[1]अनुवृत्त्या तथा स्वातेरातोद्यानां समासतः ।
पौष्कराणां प्रवक्ष्यामि निर्वृत्तिं सम्भवं तथा ॥ ४ ॥
अनध्याये कदाचित्तु [1]स्वातिर्वै दुर्दिने दिने ।
जलाशयं जगामाथ सलिलानयनं प्रति ॥ ५ ॥
[1]तस्मिन् सरो निषण्णे तु [2]प्रविष्टः पाकशासनः ।
[3]धाराभिर्महतीभिश्च [4]कर्तुमेकार्णवं जगत् ॥ ६ ॥
पतन्तीभिश्च धाराभिर्वायुवेगाज्जलाशये ।
[1]पुष्करीणां [2]पटुः शब्दः [3]पत्राणामभवत् तदा ॥ ७ ॥
[1]व[र्षा]धारोद्भवं शब्दं निशम्य [2]सहसा मुनिः ।
आश्चर्यमिति [3]मन्वानश्चावधारितवांश्च तम् ॥ ८ ॥

1 (C. 1 ; K. XXXIV. 1) [1]C. अथातोद्य⁰ ; K. तत वाच्य(द्य)विधानं यन्मयावि(भि)हितं पुरा. [2]K. अवनद्धानस्यापि तस्य वक्ष्यामि लक्षणम्. 2 (C. 2 ; K. XXXIV. 3a) [1]K. om. 2a. [2]K. मृदङ्गानां समासेन लक्षणं पणवस्य च. 3 (C. 3 ; K. XXXIV. 36) [1]C. दर्दुरस्य च संक्षेपाद् विधानं नाद्यमेव च and before 2 occurs in K. the following : यथोक्तं मुनिभिः पूर्वं स्वातिनारदपुष्करैः । सर्वलक्षणसंयुक्तं सर्वातोद्यविभूषितम् । [2]K. om. 3b. 4 (C. 4) [1]K. om. 4. 5 (C. 5 ; K. XXXIV. 4) [1]K. मुनिर्मंहति दर्दुरे. 6 (C. 6 ; K. XXXIV. 5) [1]C. तस्मिन् परी. K. तस्मिन् जलाशये यावत्. [2]C. प्रहृष्टः. K. प्रविष्टः पावकाशनः. [3]K. ⁰महती-भिस्तु. [4]K. पूरयन्निव मेदिनीम्. 7 (C. 7 ; K. XXXIV. 6). K. पुष्करिण्या. [2]C. कलरवः. [3]C. पत्रिणाम्, K. याप्र (पत्रा)णाम⁰. 8 (C. 8 ; K. XXXIV. 7) [1]K. ववाधीरोद्भवं (*kha*), ववांधारोद्भवं. C. तेषां धीरं कलं. K. तु महामुनिः. [3]C. सम्प्राप्तं अवधारितवान् स्वयम्.

ज्येष्ठमध्यकनिष्ठं तु पत्राणामवधार्य च ।
गम्भीरं मधुरं हृद्यमाजगामाश्रमं ततः ॥ ९ ॥
गत्वा सृष्टं [1]मृदङ्गांश्च पुष्करानसृजत्ततः ।
पणवं दर्दुरांश्चैव सहितो विश्वकर्मणा ॥ १० ॥
देवानां दुन्दुभिं दृष्ट्वा चकार मुरजं ततः ।
आलिंग्यमूर्ध्वकं चैव तथैवाङ्किकमेव च ॥ ११ ॥
[1]चर्मणा चावनद्धांस्तान् मृदङ्गान् दर्दुरांस्तथा ।
तन्त्रीभिः पणवं चैवमूहापोहविशारदः ॥ १२ ॥
भूयश्चान्यान्यपि तथा काष्ठायसकृतान्यथ ।
झल्लरीपटहादीनि चर्मनद्धानि तानि तु ॥ १३ ॥
[1]आतोद्यसमवाये तु यानि वाद्यानि वादकैः ।
अङ्गप्रत्यङ्गयोगेन गदतो मे निबोधत ॥ १४ ॥
विपञ्ची चैव चित्रा च दारवीष्वङ्गसंज्ञिते ।
कच्छपी घोषकादीनि प्रत्यङ्गानि तथैव च ॥ १५ ॥
[2]मृदङ्गो दर्दुरश्चैव पणवेष्वङ्गसंज्ञिते ।
झल्लरीपटहादीनि प्रत्यङ्गानि तथैव च ॥ १६ ॥
अङ्गलक्षणसंयुक्तो विज्ञेयो वंश एव हि ।
शङ्खस्तु डक्किनी चैव प्रत्यङ्गे परिकीर्तिते ॥ १७ ॥
नास्ति किञ्चिदनायोज्यमातोद्यं दशरूपके ।
रसभावप्रयोगं तु ज्ञात्वा योज्यं विधानतः ॥ १८ ॥
उत्सवे चैव याने च नृपाणां मङ्गलेषु च ।
शुभकल्याणयोगे च विवाहकरणे तथा ॥ १९ ॥
[पुत्रादिके समु]त्पन्ने संग्रामे [1][योध]संकुले ।
ईदृशेषु च कार्येषु सर्वातोद्यानि वादयेत् ॥ २० ॥
स्वभावगृहवार्तायामल्पभाण्डं प्रयोजयेत् ।
उत्थानकाव्यबन्धेषु सर्वातोद्यानि वादयेत् ॥ २१ ॥

9 (C. 9 ; K. XXXIV. 8). 10 (C. 10 ; K. XXXIII. 9) [1]CK. मृदङ्गानां. 11 (C. 11 ; K. XXXIV. 10). 12 (C. 12 ; K. XXXIV. 11) [1]K. क (च) र्मणा. 13 (C. 13 ; K. XXXIV. 12). 14-19 (C. 14-19 ; K. XXXIV. 13-18 [1]K. आतोद्यन् समवाये. [2]K. मृदङ्गा. 20 (C. 20 ; K. XXXIV. 19) [1]KC. यज्ञसंकुले. 21 (C. 21 ; K. XXXIII. 20).

अङ्गानां तु समत्वार्थं छिद्रप्रच्छादने तथा ।
विप्राप्तिहेतोः [1]शोभा[या] भाण्डवाद्यं [प्र]जायते ॥ २२ ॥
तत्रावनद्धं वक्ष्यामि विधिस्वरसमुत्थितम् ।
नानाकरणसंयुक्तं [1][नाना]जातिविभूषितम् ॥ २३ ॥
यावन्ति [1][चर्म]नद्धानि ह्यातोद्यानि द्विजोत्तमाः ।
216 (C. 201 ; K. XXXIV. 193) [1]K. प्रयाजमुत्तरं यत्र. [2]K. ससुल्लेखः प्रकीर्तितः. 217 (K. XXXIV. 194). 218 (C. 202 ; K. XXXIV. 195) [1]C. सर्वमार्गकृतो. [2]K. °लयाश्रितः. [3]K. समवायकृतस्तु सः. 219 (C. 203 ; K. XXXIV. 196) [1]K. गतिपूर्णार्धविहितप्रकारो. 220 (C. 204 ; K. XXXIV. 197) [1]K. रसभावान् अपेक्ष्य. 221 (C. 205 and the fol. prose ; K. XXXIV. 198 and the fol. prose part) [1]C. एते प्रकारा जात्यश्च. [2]K. तत्र. [3]K. तत्रोपविष्टे प्राङ्मुखैः. [4]K. कुत[प] एव विन्यासः. C. कुतपविनिवेशेषः. [5]K. °गृहयोः कुतप°. [6]C. स्वरङ्गाभिमुखो. [7]C. om. from मौरजिकः to गायिका इति कुतपविन्यासः ; see also note 7 on 227. [8]K. om. from मार्दङ्गिक°..... to दैवतेन च. [9]C. दर्दुरवाद्यमुख्य°. M. दर्दुरवादनमुख्य°. [10]M. चराचरोत्पत्तिस्थिति. C. °चराचरोऽल्पस्थिति.

सक्तेन प्रथमेन साम्ना वामपार्श्वे चन्द्रं संप्रीणयन्ति दक्षिणे पन्नगान् [12]अथान्तरेण जल(जं) [द्वितीयेन] साम्ना [13]मुनीन्, आयतेन [तृतीयेन] बृहत्साम्ना [14]दैवतानि च ।

एवं प्रीणयते यस्मात् दैवतानि यथाक्रमम् ।
[1]तस्मात् त्रिसाम्नि विज्ञेयं [2]त्रिसामत्वं बुधैरिह ॥ २२२ ॥
एवं च [श्रू]यते यस्मात् ब्रह्माणं केशवं शिवम् ।
तस्मादेतत् त्रिसाम तु ऋषिभिः परिकीर्तितम् ॥ २२३ ॥
चतुर्णामपि वेदानामादावोङ्कार उच्यते ।
तथात्र सर्वगीतानां त्रिसाम परिगीयते ॥ २२४ ॥
त्रिप्रकारं त्रिलयकं तथा चैवाङ्गिताश्रयम् ।
षट्कलं त्रिकलं चैव त्रिसाम परिकीर्तितम् ॥ २२५ ॥
त्रिविधं [चा]क्षरवि[धौ] गुरुलघ्वक्षरान्वित[म्] ।
[3]औकारश्च मकारश्च त्रिकैस्त्रिगुणितं भवेत् ॥ २२६ ॥

तस्यैव चान्ते पूर्वरङ्गविधानमनुप्राप्य छन्दःसमेनाक्षरसमेन च वाद्येन बहिर्गीतविधानं तु त्रिलयं वर्तनीयम् । [4]तत्र [5]आसारितप्रयोगे च [6]तत्त्वानुगतं वाद्यं प्रायःप्रयोक्तव्यम् । [7]यत्र त्रिसप्तप्रत्याहारा[य]वतीर्णकोटिस्तत्रवाद्यं प्रवर्तते । [8]तत्रादौ [9]तावद् वामोर्ध्वकप्रहारयुक्तं [10]पश्चादालिंग्यकविमर्दनं गोपुच्छायतिम् [11]आसाद्य विचित्रकरणयुतं [12]चतुर्मार्गं [13]समार्दङ्गिकं सर्वभाण्डिकमपि [14]वाद्यं पश्चात् विपञ्चीवाद्यं प्रवर्तयितव्यम् । [15]कस्मात्, पूर्वं हि भाण्डवाद्येन सिद्धिरुत्पादयति ।

[11]M. मुखाभिसक्तेन. C. °ऽभिसत्त्वेन. [12]C. अर्धान्तरेण जलसाम्ना. M. अथान्तरेण जलं. [13]C. मुनीनायतेन. [14]C. दैवतेन च. 222-226 (C. 206-210 and K. prose after XXXIV. 198) [1]C. त्रिसाम. [2]C. त्रिसामत्वं. [3]C. अकारश्च, K. यकारः ; after कुतपविन्यासः see note 7 above. K. reads this hem. and विना दिसतिजं दुंति चचं दुद्रोह द्वितीयं ति तावा च्छं दुभितिचतीर्यत्तदङ्गपूर्वं रङ्गविधानमनुप्राप्त छन्दसमेकाचरं समेन वाद्येन बहिर्गीतविधानम् अनुवर्तितव्यम्. [4]K. om. तत्र. [5]C. च सारितम् वियोगच्च. [6]C. तथानुगतं. K. तत्त्वानुगतप्रादेयाद्यं विधातव्यम्. [7]C. तत्त वस्तु त्रिसाम्ना च प्रत्याकारोऽयं वर्तनम् । को गीतिवशाद् वाद्यं प्रवर्तते. K. यस्त्रिसप्त प्रत्याहारः यासावतीर्णकोटिस्तत्र वाद्यं प्रवर्तते. [8]C. यत्रादौ. [9]K. तावद्वामार्दकप्रहार. [10]C. °दालिंग विमर्दन. K. पश्चाल्लिङ्गकविमर्दनवरणामूर्च्छां पत्ति. [11]C. सामाद्य. [12]K. om. चतुर्मार्गं. [13]C. om. समा° to वाद्यं. [14]K. बद्धं for वाद्यं. [15]C. om. up to उत्पादयति.

पूर्वं [16]भाण्डेनाभिव्यञ्जितो रङ्गे ध्रुवाविधिः। स्त्रीबालमुर्खाचकीर्णे रङ्गे [17]कुतूहलजननसमर्थं वाद्यं समुत्पन्नं भवति। अपि च

आचार्याः सममिच्छन्ति [1]पदच्छेदं तु पण्डिताः।
[2]स्त्रियो मधुरमिच्छन्ति विकृष्टमितरे जनाः ॥ २२७ ॥

[3]तस्य चान्ते [4]ताण्डवप्रयोगमधिकृत्य [5]नर्तक्या अवतरणकाले [6]लघुवर्णसञ्चयैर्मार्दङ्गिकैरङ्गुलिप्रचलनप्रायं वाद्यं योज्यम्[7]। [8]नर्तक्यवतरणगीतान्ते [9]संनिपाता ज्ञेयाः। [10]लास्यनृत्ताङ्गहारानुगतं करणं [श्रितं] वाद्यं प्रयोज्यम्। [11]करणधातुसंयोगजमित्युच्यते समं रक्तमित्यादि। तत इदानीं वामोर्ध्वैकप्रहारसंयुक्तम् [12]आलिप्तमार्गदेशाकरणसंश्रयं समुत्थापनके वाद्यं योज्यम् [13]यथा—घेङ् मति धङ्गथा घेङ् धिति टित् सं कं कं खोक णे देव्यां केन्तां किट् घेङ् इति पूर्वरङ्गलयपातनिर्दिष्टप्रयोगसमुत्थापनके वाद्यं योज्यमिति।

[14]तयोः परं यत् परिवर्तनं चतुर्मार्गिकशुद्धजात्याश्रयं [15]यथाप्रोक्तम् खोखोणां खोखोणां खखोखोणा एतद् द्रव्यैर्यद् वाद्यं स्यात्।

पुनस्त्रयो न्यासात् खोखो दोखो खकेणां घत्रयन्तांघ नपुंसकपादे। यथा—कोनदुखोङ् मार्गं इति [16]चतुर्थकारप्रवेशे च वाद्यम् [[17]अङ्गुलिप्रचलनप्रायम्]।

[18]वस्तूत्थापनके चापकृष्टायामर्धमपि(?) चार्य[ां]ग्रहो यथा—घेघेन्तां घेङ्ङो घखणादोणां घोघघेघघे इति।

[19]नान्दी शुष्कापकृष्टायां प्रतिशुष्कं करणं श्रितं वाद्यं योज्यमिति—[20]यथा थो घो थो खेखघोघेङ् णादम्यङ् खोद्धो कुतां खखेखेणकसुगुकघेङ् णोखिखेङ्

[16]C. ⁰व्यञ्जिते. [17]C. कुतूहलमुत्पन्नार्थम्, K. कुरुजननसमर्थं. 227 (C. 211 ; K. XXXIV. 199) [1]C. पादच्छेद. [2]C. सुकुमारं स्त्रियश्चैव. [3]K. तस्य चान्ते. C. तत्र भाण्डे, [4]C. ⁰मधिगत्या⁰. [5]C. om. नर्तक्या. [6]C. ⁰सञ्चयमर्दिकैरङ्गुलिप्रचनप्रायं. [7]After this C. reads तत्रान्तराभिमुखी गायकस्य वामपार्श्वे वैणिको वैणिकस्य दक्षिणे मृदङ्गवादकः गातुरभिमुखान् गायकान् included in the passage after 221 ll. 4-5 above. [8]K. गीतका. [9]K. संनिपाते च लास्यमनुवाद्यम्. [10]K. तेन लङ्गहारानुगतं करणं वाद्यं प्रयोज्यम्. [11]K. om. from here to प्रहारसंयुक्तम्. [12]K. आलिप्तमार्गेण जातिकरणाश्रितमुत्थापने वाद्यं प्रयोक्तव्यम्. [13]K. omits from here to वाद्यं योज्यमिति. [14]K. ततः परपरिवर्तनं चतुर्मार्गिक शुद्रजायाश्रयं. [15]K. om. from here to कोन् दुखोङ् मार्गे इति. [16]K. ⁰प्रवेशेषु. [17]C. om. अङ्गुलिप्रचलनप्रायमिति. [18]K. om. from here to घे घ घे इति. [19]K, नान्दीशुष्कायत्तः पद्मकरणाश्रितं वाद्यः [20]K. om. from here to किटि वत्थि इति.

ताङ् खेङ् णम् किटि किटि घघेङ घेकटुकघुदुकलघलाखो खोखोखो वाघ्रु तेटां मालिं ण्म्मां किटि घत्थि इति।

[21]रङ्गद्वारप्रवरणे जर्जर[श्लोक]निग[द]ने चार्यां [चाड्डितामार्गाश्रितं सन्निपातग्रहणं प्रयोक्तव्यम्। [22]महाचार्यां [23]वितस्तमार्गाश्रितं [24]वाद्यं प्रदेशिन्या ग्रहम् [25]अपूर्वं तद्वद् पूर्वरङ्गे ताण्डववाद्यम् उक्तम् [26]सन्निपातग्रहो यथा वामकरेण—खो खो णां दो दो दोकः मोकः दहेण णाथो थो णो घोघ टमटथिघं घोघोकठ कटभंखो खोखित कटकटां घटकमथि घोघो मिथि णां किटि किनां खकवलं इति।

आलिप्तमार्गत्रिकं (मार्गाश्रितं) वाद्यमतःपरमुदाहार्यम्।

वितस्तमार्गस्थितिकं वाद्यं प्रदेशिन्या ग्रहो यथा—णणखोकणणो मधुणां खोखोमथि तकितां तघितां किन्ति कितां किटि किन्तो खोखो मतिता मतिथत्रमति तिकिति केन्तां द्रेन्तां नत केन्तां टघेतान्द्रां कृन्तां द्रां द्रान्तां किन्नां किन्नां केन्तां मुद्रां घ्रें घ्रें क्ले घ्रं घ्रं द्राघ्रां घद्रे द्रां घेन्द्रां घेन्द्रा घङ क्लेङ् इति।

पटक्षेपणात् सिद्धेरेतावच्चतुरस्रं पूर्वरङ्गविधाने भाण्डवाद्यं प्रयोजयेत्। त्र्यस्रे तदेव कालाव्यवहितम्। पुनश्च नाटकादिषु धीरोदात्तधीरोद्धतधीरललितधीरप्रशान्तानां चतुर्णां नायकानां [27]गतिप्रचारे स्वथावस्थासु निर्गतं वाद्यमुपेक्ष्यामः। तत्र घ्रं ध्रं घ्रं भ्राद्रं प्रायो देवानां गतौ प्रयोज्यम्। [28]धेन्तां प्रयोज्य राज्ञाम्। [29]ध्रं क्रुं धटु घेङ् घेटट्टिथिदुन किटिद्रां नां नां भ्रद्रां प्रायो मध्यमपुरुषेषु वाद्यम्। [30]पुनरेव स्थितायां वाद्यविधानं वक्ष्यामि।

[1]त्रिकलद्विकलैककला चतुष्कलाश्चैव पादविन्यासाः।
तत्र तु साम्यं कार्यं भाण्डेन समं च गानेन ॥ २२८ ॥

[2]पुनश्चावस्थाकृतं वाद्यं प्रवक्ष्यामि। त्वरितगमने धं वं घे घे टां इत्येव वाद्यं प्रयोक्तव्यम्। यथा विषमादिकमङ्गुलिप्रचलनकृतं विहितम्। पण्यैव (?)

[21]C. om. from here to ताण्डववाद्यमुक्तम्. K. प्रवराणायां जर्जरि निगनेवार्यं वादितमार्गाश्रितं वाद्यं. [22]C. om. महाचार्या. [23]C. {वितस्तिमार्गस्थितिकं. [24]K. om. वाद्यं. [25]C. om. K. पर्वताव पूर्वरङ्गे ताण्डव वाद्यमुक्तम्. [26]K. om. from here to चतुर्णां नायकानां गतिप्रचारे. [27]K. स्वगति प्रचारे वक्ष्यामः and then *lacuna*. [28]K. धेत्ती ध्वती इति प्रियराज्ञं. [29]K. वभ्रं इन्द्रं घटसच्छिरुण किटिजा वियाणां व्यञ्जकप्रायं मध्यानाम्. [30]K. एवं स्वस्थावस्थागतिप्रचारं विधीयते वाद्यम्। 228 (C. 212 ; K. XXXIV. 200) [1]K. एककला × × × श्चतुष्कलाश्चैववादिविन्यासाः. [2]C. om. पुनश्चा⁰ to वक्ष्यामि.

पूर्वं सम्यग्लिखितं त्वङ्गुलिप्रचारेषु। पुनरत्यवस्थायि वाद्यविधानं वक्ष्यामि।

[1]स्वस्थे गतिप्रचारे वाद्यं त्रिकलं चतुष्कलं वापि।
लयगतिविधानं समीक्ष्य तज्ज्ञैः प्रयोक्तव्यम्॥ २२९॥
न ह्येकद्विकला वा ध्रुवाविरामा भवन्ति वाद्येषु।
तस्माद्भाण्डेन [1]च साम्यं [2]कार्यं न गानेन॥ २३०॥
[1]सर्वत्र त्वरितगमनेषु [2]पाताः [3]पूर्वोक्ता ये गतिप्रचारेषु।
[4]धङ् ध्रङ् घेङ् घेङ् प्रायश्चात्र च वाद्यं प्रयोक्तव्यम्॥ २३१॥
[1]नौरथविमानयाने पक्षिचलाकाशजे[2]ऽङ्गुलिचलनात्।
कार्यं [3]वा चतुष्केऽप्यन्योन्यकराभिहतं च वाद्यम्॥ २३२॥

[4]दुःखार्तिव्यथितेष्टशापक्लेशेष्टजनवियोगविभवनाशवधबन्धव्रतनियमोपपवासादियुक्तेषु [5]पूर्वालिप्तमार्गाश्रितमुत्थापनवाद्यं विधातव्यम्। दैत्यदानवयक्षराक्षसग्रहादीनां [6]धृङ् दङ् खद संयुक्तं घटुतुतन्त तेतोद्रां इत्येवमादिकरणैर्गतिवाद्यं प्रयोजयेत्। [7]खञ्जविकलवामनकुब्जादीनां प्रवृत्तगमनेषु घेतां कटकामिति वाद्यं प्रयोक्तव्यम्। [8]यतिमुनिपाशुपतशाक्यादीनां लिङ्गिनां दो खो द्विविखि दुगुवोओक्कनदोधन्ति किति कि वाद्यं प्रयोक्तव्यम्। [9]विदूषकनिर्मुण्डोपस्थायकवर्षधरादीनां घे घें स्तानो ण्णो दोण्णण्णामिति वाद्यम्। पुनश्चैवाथ वृद्धश्रोत्रियकञ्चुकीस्थूलादीनां [10]धां धों धाङ् द्रोङ् धिङ् द्रीणां खो खो णा इति वाद्यं प्रयोक्तव्यम्। [11]गजवाजीखरोष्ट्ररथविमानयानेषु वंकिटि प्रायम्। सर्वत्रोत्तममध्यमाधमेषु पुरुषेष्वित्थं रसान् भावान् भुवि समीक्ष्य वाद्यं प्रयोक्तव्यम्। एवं तावत् पुरुषवाद्यम्।

229 (C. 213) [1]See note 30 on 227 above. 230 (C. 214) [1]C. adds तं to च. [2]M. कार्यं, C. om. it. 231 (C. 215; K. XXXIV. prose after 200, 4th line) [1]K. om. सर्वत्र. [2]K. भावा. [3]C. पूर्वकाये M. पूर्वाकाये. [4]K. भ्रं भ्रं घे घे प्रायं तत्र तु वाद्य प्रयोक्तव्यं. [2]K. °चलनं कार्यम्. 232 (C. 216; K. as in 231) [1]C. गौरं विमानयाने. K. °विमान नेपथ्यानिलाकाशजे. [3]C. वाश्चतुष्कोऽप्य न्योन्यमाश्रितं (वाद्यमाश्रितं) वाद्यमिति. [4]K. दुःखादितव्याधितेष्टजनवियोगविभावनारा······नियमोपासनादिमयुक्तेषु. C. °वधबन्धप्राते नियमो°. [5]K. आलिप्तमार्गेवधोविधातव्यम्. [6]K. सचन्द्रां चन्द्रा वक्त्रान्ता घे घेटा प्रायम्. [7]K. घेटकुसत्त्वादीनां विटकुखुनेत्यादिकम्. [8]C. om. पाशुपत. M. यतिमुनिपात्तुशम. K. यतिपाशुपत शाक्यादीनां धहु धहु घे घे प्रायम्. [9]K. विधष्कोपस्थापक निर्मुण्डवर्षधारादीनां घे घे टां टां णां णां प्रायम्. [10]K. घो घो खो खो इति प्रायम्. [11]C. om. from here to इति प्रायम्.

स्त्रीणां पुनरपि व्याख्यास्यामः। तत्रोत्तमस्त्रीणां दिव्यानां वंगति किपि धमेट प्रथि घेइतिप्रायम्। [12]अथ राज्ञीनां कथि कथि मथि दो दो खु खु इति प्रायम्। [13]चं किति किथि घटमट थि गे इति ब्राह्मणीनाम्। अथ [14]मध्यमस्त्रीणां [15]वेश्याशिल्पकारिकाणां [16]नाटकीयानां [17]घ खु खु घिकिटमरिथकिण टोणांधो इति। [18]मरथिकुले केडखुखिखि प्रायं गीतम[धम]स्त्रीणाम्। एवं तावत् [19]समासादभिहितं स्त्रीणाम्।

अवस्थान्तरितानां तु त[20] एव पौरुषवाद्यविशेषा भवन्ति। तस्मात् [21]सामान्यतो हि [22]भयक्लेशशोकक्रोधादयो [23]विभावाः समुत्पद्यन्ते। तत्र आसामपि [24]रसभावापेक्षं मार्गाश्रितं [25]वाद्यं योज्यं भवति। अपि च—

[1]जातिमार्गप्रकारैस्तु करणैरक्षरैस्तथा।
[2]वादयेद्यस्तु संकीर्णं स श्रेष्ठो [3]वादकः स्मृतः॥ २३३॥

[4]अथान्तरवाद्यानि च [5]अनुबद्धं विप्रहारिकं [6]सिद्धिग्रहणं परिछिन्नमिति।
[7]तत्रानुबद्धसंज्ञमन्तरवाद्यं यथा—[8]खो खो णे खे घे इति।
[9]वाद्यविरामे प्रहारितं यथा—[10]धं द्रां खो खो इति।
[11]सिद्धिरपि च

ऐश्वर्ये विस्मृते श्रान्ते वस्त्राभरणसंयमे।
[1]सिद्धिर्वादयितव्या तु नानाकरणसंश्रया॥ २३४॥

सा च [2]सिद्धिर्यथामार्गाश्रया कार्या चित्रकरणा पञ्चषट्कला भवति।
अपि च—

[1]पाठ्यविरामे वाद्या कर्मसाधनकृते विरामे च।
[2]वस्त्राभरणनिपाते [3]मुकुटस्य च संयमनकाले॥ २३५॥

[12]C. अथ राज्ञां अविघद्दगों कं खु खु इति. [13]C. om. upto इति ब्राह्मणीनाम्. [14]C. मध्यमानां. [15]K. °कारीणां. [16]K. om. [17]K. किरित्ता तं थं कत्थि मामपि डण किटि किटि प्रायम्. [18]C. om. upto स्त्रीणाम्. [19]K. सामान्यतो. [20]C. एत. [21]K. सामान्यं. [22]K. भयशोकक्रोधादयो हि भावा. [23]K. भावा आसां. [24]K. रसभावाभिनयापेक्षं. C. भ.वापेक्षं. [25]K. वयं भवति. 233 (C. 217; K. XXXIV. 201) [1]C. प्रचारैः. [2]C. वादयेद्द्वैस्तु संकीर्णं. [3]K. वाचकः. [4]C. अन्तर्वाद्यानि. [5]K. अनुबन्धा विप्रहारनं. [6]C. °सिद्धग्रहणम्. [7]C. °बद्धसंज्ञानामन्तरवाद्यम्. [8]K. धे धे ण वेर कधे इति. [9]K. पाद्यविरामे प्रहारितं. [10]K. चन्द्रां खे खे ण इति. [11]K. सिद्धिरपे × ×. 234 (C. 218; K. XXXIV. 202) [1]C. सिद्धिर्वा तत्र कर्तव्या. [2]K. °र्यथा—समार्गकरणाश्रया कार्या विचित्रकला. 235 (C. 219; K. XXXIV. 203) [1]C. वाद्यविरामे वाद्यं. K. पाद्य°. [2]C. वस्त्राहरविनिपाते. [3]C. नत्कुटस्य च, K. कुर्यादभ्यञ्जने°.

[4]अथ परिच्छिन्नं सार्वभाण्डिकं ध्रुवाया ग्रहोपशमे गम्भीरधीरप्रहारमुद्धतं यथा—[5]पञ्चषट्कलञ्च तथोत्तमानां वितस्तमार्गाश्रितं धुं धुं धुं ल्क इति। तथोत्तमस्त्रीणामड्डितवाद्याश्रितं यथा—ण णां खो खो णण्णामिति। अथाधमानां खञ्जनत्कुटविषयं यथा—संकेत किटिधिण्णामिति। अवस्थान्तरेषु पुनरेतदेवार्धकृतं भवति।

[6]अथ प्रासादिकीप्रावेशिक्याक्षेपिक्यवकृष्टासु। [7]तत्र प्रासादिक्यां [8]समपाणौ विभक्तकरणं वाद्यम्। [9]द्रुतायामुपरिपाणिके चित्रकरणम्। स्थितायां × × × × [10]अड्डितायामवकृष्टायामर्धसन्निपातकृतमिति।

एवमेतत् प्रयोक्तव्यं वाद्यं गतिपरिक्रमे।
प्रासादिक्यां ध्रुवायां च त्वन्तरायां तथैव च ॥ २३६ ॥
अभाण्डमेकं गीतं तु [1]परिवर्त्य प्रयोजयेत्।
सन्निपातावसानेषु भाण्डवाद्यग्रहो भवेत् ॥ २३७ ॥

[2]यथा द्रुतविलम्बितायां चेते लघो ष इति। [3]अड्डितायां च ण दे दे दे दे दे खो खो ख इति। अथ नत्कुटखञ्जयोः ण ण्णा वु वु णा णा खो णा ण्णा दे दे दे दे खो खो खो ख इति।

[4]अथोद्धात्यम्—

[1]संभ्रमावेगहर्षेऽथ [2]विस्मयावेगशोकजे।
[3]ग्रहे दानस्य यद् वाद्यं तमुद्धात्यं प्रकीर्तितम् ॥ २३८ ॥

[4]मोक्षमिदानीमुपदेक्ष्यामः। [5]तद् यथा—संहननं संसरणं च। तत्रोद्धतद्रुतानुबन्धे धेत्तां किकिटि दत्तकेत्तिकिं गोदो घघे दो घ टे घो घे यदो इति।

अथ खञ्जनत्कुटयोः—धं द्रां धं द्रां तकितां तकितां गुदुधे इति।

अथ स्थितायाम्—धे धं धेट मटधे घे छिमटं कंटछि मटछि कर्मांक दीघिटी इति।

[4]C. भाण्डिकखातघ्र् वाभूयोपगमन गभीर. [5]K. संवसंकलम्। तवो······इन्द्रं को घ क्लं. [6]C. om up to [0]वकृष्टासु. [7]C. अथ:. K. तत्र प्रावेशिक्यां. [8]C समपादौ विभक्तान्तरेण. [9]K. [0]पाणिकरिवकरणास्थिता × ×. [10]K. × × अवकृष्टायामर्धं सन्निपातजमिति. 236 (C. 220 ; K. XXXIV. 204). 237 (C. 221 ; K. XXXIV. 205) [1]K. परिवर्त. [2]C. om. from here to इति. [3]K. आदितायां यथा एघो खो णं खो चेणं डिक्कणि क्ष्वणुडुष इति। अथ नर्कुधखञ्जयोः यास्तु णा य य य खोदक्कणुञ्ज इति. [4]K. अथोद्घात्यः. 238 (C. 222 ; K. XXXIV. 206) [1]K. [0]वेगहर्षोऽथ, C. [0]वेगामर्षार्थं. [2]K. [0]शोकजम्. [3]K. ग्रहो दानस्य, C. भीगायतस्य. [4]K. [0]दानीं वक्ष्यामः. [5]C. om. from here upto दीघिटि इति.

[6]तत्राड्डिता[यां] किन्त किन्तां इति। अ[थ] स्थितायां घतताम् इति। [7]अवकृष्टायां ववतामिति।

एवमेते ग्रहा मोक्षा ध्रुवाणां गदिता मया।
निष्कामे च प्रवेशे च आक्षेपिक्यन्तरासु च ॥ २३९ ॥

एवं [1]तालकालस्वरज्ञानेन मार्दङ्गिकेण प्रयतितव्यम्।

भवन्ति चात्र श्लोकाः—

अतालज्ञमकालज्ञमशास्त्रज्ञञ्च [1]वादकम्।
चर्मघातकमित्येवं प्रवदन्ति मनीषिणः ॥ २४० ॥
अनेनैव विधानेन [1]वाद्यं योज्यं प्रयोक्तृभिः।
अत ऊर्ध्वं प्रवक्ष्यामि आतोद्यानां तु लक्षणम् ॥ २४१ ॥

[1]त्रिधाक्रिया मृदङ्गानां [2]हरीतकीयवाश्रया।
[3]तथा गोपुच्छरूपा च भवत्येषां स्वरूपतः ॥ २४२ ॥
[1]हरीतक्या[2]कृतिस्त्वङ्की [3]यवमध्यस्ततोर्ध्वकः।
[4]आलिंग्यश्चैव [5]गोपुच्छाकृतिरेषां प्रकीर्तिताः ॥ २४३ ॥
[1]तालास्त्रयोऽर्धतालश्च [2]मृदङ्गाङ्किक इष्यते।
[3]मुखं तस्य च कर्तव्यं द्वादशाङ्गुलयोजितम् ॥ २४४ ॥
तथोर्ध्वकश्च कर्तव्यश्चतुस्तालप्रमाणतः[1]।
[2]मुखं तस्य प्रकर्तव्यमङ्गुलानि चतुर्दश ॥ २४५ ॥
[1]आलिंग्यश्चैव कर्तव्यो [2][द्वय]मात्रमथापि वा।
मुखं तस्याङ्गुलानि स्युरष्टावेव समासतः ॥ २४६ ॥

[6]K. om up to घततामिति. [7]K. अथावकृष्टायां घटमघटधिठ दिगुडुधिटा धीणवंधणणीणण इति. 239 (C. 223 ; K. XXXIV. 207) [1]K. तालकालाज्ञाने. 240 (C. 224 ; K. XXXIV. 208) [1]K. कण्टकम्. 241 (C. 225 ; K. XXXIV. 209) [1]K. वाद्यं कार्यं प्रयत्नतः. 242 (C. 226 ; K. XXXIV. 210) [1]C. विविधा. C. हरिदक्ति. [3]K. तथा नेपथ्य and omits the rest. 243 (C. 227 ; K. XXXIV. 210b) [1]K. om. 243. [2]C. तु तिस्वङ्गा. M. कृतिस्वङ्गा. [3]C. [0]स्ततध्वकः. [4]C. आलिङ्गश्चैव, K. om. [5]K. गोपुच्छा आकृत्या संप्रकीर्तिताः. 244 (C. 228 ; K. XXXIV. 211) [1]CM. तालात्रयो ध्वताश्च (र्ध्वं तालश्च M.) [2]CM. मृदङ्गाङ्गित (MK.) इष्यते. [3]C. मुखे तस्याङ्गुलानिस्तास्त्रयोदश चतुर्दश. 245 (C. 229a ; XXXIV. 212) [1]C. [0]प्रमाणकम्. [2]C. om. 245b. 246 (C 229b ; K. XXXIV. 213) [1]C. om. 246a. [2]K. लयमात्रमथापि.

पणवश्चापि कर्तव्यो [1]दीर्घत्वे षोडशाङ्गुलः ।
[2][कु]शमध्योऽङ्गुलान्यष्टौ पञ्चाङ्गुलमुखस्तथा ॥ २४७ ॥
[1]ओष्ठं तस्य च [2]कर्तव्यं [3]तज्ज्ञैरध्यर्धमङ्गुलम् ।
मध्यं तु सुषिरं तस्य [4]चत्वार्येवाङ्गुलानि च ॥ २४८ ॥
दर्दरश्च घटाकारो [1]भवत्यष्ट्यङ्गुलिस्तथा ।
मुखं च तस्य कर्तव्यं घटस्य सदृशं बुधैः ॥ २४९ ॥
द्वादशाङ्गुलविस्तीर्णं पीनोष्ठं च [1]समन्ततः ।
अत ऊर्ध्वं प्रवक्ष्यामि चर्मलक्षणमुत्तमम् ॥ २५० ॥

न [1]जीर्णोपहतश्चर्म न च [2]काकमुखाहतम् ।
न [3]मेदोपगतं किञ्चित् न च धूमाग्निदूषितम् ॥ २५१ ॥
[1]षड्भिर्दोषैर्विनिर्मुक्तं चर्म [2]निर्वर्तितं गवाम् ।
[3]मुखं पल्लवसंकाशं हिमकुन्देन्दुसप्रभम् ॥ २५२ ॥
स्निग्धामिषविहीनं तु क्लिन्नं चर्म प्रशस्यते ।
विधिनैव मुखोर्णानि चर्माण्याहृत्य बुद्धिमान् ॥ २५३ ॥
शीतोदके निशामेकां स्थापयित्वा समुद्धरेत् ।
बद्धैः सुललितैर्दान्तैर्गोमयैरतिमर्दितैः ॥ २५४ ॥
चन्द्रकैस्तनुभिः पश्चान् मृदङ्गान् योजयेद् बुधः ।
पुष्पावर्तं ततः कुर्यात्रिवर्ति चन्द्रिकाश्रयम् ॥ २५५ ॥
कक्षाख्यं वै परिकरं ग्रीवास्थं स्वस्तिकं तथा ।
शतानि त्रीणि कुर्वीत पुष्करैर्ह्यक्षराणि तु ॥ २५६ ॥
दश हि तत्र बद्धास्तु प्रक्षेप्या वत्ति(?) संश्रयेत् ।
निहित्वा त्वक्षि(ङ्कि)के वाध्ने (?) तृतीये संप्रवेशयेत् ॥ २५७ ॥
सर्वेष्वेव प्रयोगोऽयमक्षि(ङ्कि)केषु विधीयते ।
न वै मृदंगे दातव्यं रोहणं सततं बुधैः ॥ २५८ ॥

247 (C. 230 ; K. XXXIV. 214) [1]C. दीर्घत्वात्. [2]C. क्रशो, K. क्रशा. 248 (C. 231 ; K. XXXIV. 215) [1]K. षोष्ठौ. [2]K. कर्तव्यौ. [3]C. ⁰रध्यार्धमङ्गुलम्. K. ⁰रध्यर्धचाङ्गुलम्. [4]C. चत्वारी वाङ्गुलानि. 249 (C. 232 ; K. XXXIV. 216) [1]C. भवत्यष्टिमुख⁰, K. नवाङ्गुलिमुख. 250 (C. 233 ; K. XXXIV. 217) [1]C. समाश्रतः. 251 (C. 234 ; K. XXXIV. 218) [1]K. ज्वरीपहतं. [2]K. कङ्कमुखाहतम्. [3]K. दोषापहतं [4]K. भूयाग्निदूषितम्. 252 (C. 235a ; K. XXXIV. 219) [1]K. एभिर्दोषै. [2]K. निर्घृतमिति गवा. [3]K. मुख. 253-259 (K. XXXIV. 220-226).

गव्ये घृते च तैले च तिलपिष्टं तथैव च ।
बद्ध्वा ह्यनेन विधिना आङ्किकालिंग्यकोर्ध्वकान् ॥ २५९ ॥
देवताभ्यर्चनं कृत्वा ततः [1]स्थाप्या महीतले ।
चित्रायामथवा [2]हस्ते शुक्ले पक्षे शुभे तिथौ ॥ २६० ॥
उपाध्यायः शुचिर्भूत्वा कुलीनो [3]रागवर्जितः ।
[4]धनज्ञो गीततत्त्वज्ञो मधुरो नियतेन्द्रियः ॥ २६१ ॥
सोपवासोऽल्पकेशश्च शुक्लवासा दृढव्रतः ।
मण्डलत्रयमालिख्य गोमयेन सुगन्धिना ॥ २६२ ॥
ब्रह्माणं शङ्करं विष्णुं त्रिषु तेषु प्रकल्पयेत् ।
आलिंग्यं स्थापयेत् पूर्वं ब्रह्मणो पूर्वमण्डले ॥ २६३ ॥
उर्ध्वकं तु द्वितीयेऽस्मिन् [5]रुद्रनाम्नि [6]निधापयेत् ।
[7]तिर्यग् उत्सङ्गिकं सम्यग् वैष्णवे मण्डले न्यसेत् ॥ २६४ ॥
बलिपुष्पोपहारैश्च नानापुष्पैर्विचित्रितैः ।
[1]आलिंग्ये च बलिं दद्यात् मधुपायसमिश्रितम् ॥ २६५ ॥
[2]अपूपं लो[चि]कामिश्रमांकिके सम्प्रदापयेत् ।
अनन्तरश्च दातव्यः [3]सर्व[प]वोर्ध्वके बलिः[4] ॥ २६६ ॥
स्वस्तिके [1][लोचि]कापूपपिण्डकेण्डरिकैः सह ।
[2]उन्मत्तकरवीरार्कपुष्पैरन्यैश्च [3]भूषितैः ॥ २६७ ॥
बलिः कार्यः प्रयत्नेन रक्तो रक्ताम्बरैः सह ।
वैष्णवे मण्डले [1]स्थाप्य [2]सर्वबीजगतेऽङ्किके ॥ २६८ ॥
[1]स्रग्वस्त्रालेपनैः पीतैः चरुभिश्च सपायसैः ।
याचयित्वा द्विजान् स्वस्तिं दत्वा पूर्वं च दक्षिणाम् ॥ २६९ ॥

260-264 (C. 235b-240a ; K. XXXIV. 227-231) [1]C. स्थाप्य. [2]C. ऽहनि पुष्ये. [3]K. रीगवर्जितः. [4]K. मतिमान्नीतितत्त्व. [5]C. रुद्रनाम्ना. [6]C. निपातयेत्. [7]C. तिर्यक्कुक्षां गतिं. 265-266 (C. 240b-242a ; K. XXXIV. 232-233) [1]C. आलिङ्गे. [2]C. ⁰मिश्रामाङ्किके. [3]C. ⁰मोर्ध्वगे. [4]K. reads for this entire passage बलिपुष्पोपहारैश्च पूजयेत् पुष्करां स्तथा। पायसं घृतमध्वक्तं चन्दनं कुसुमानि च। शुक्लानि चैव वासांसि दत्वालिङ्गे स्वयम्भुवे। त्र्यम्बकाय च दातव्यः सगणायोर्ध्वके बलिः। 267 (C. 242b-243a ; K. XXXIV. 234) [1]C. धूपिकधूपकपर्कैर्वलितैः. [2]C. ⁰करवीरैश्च. [3]C. भूषितैः. 268 (C. 243b-244a ; K. XXXIV. 235) [1]K. स्थाप्यः. [2]K. सर्वबीजगतोऽङ्किके. 269 (C. 244b-245a ; K. XXXIV. 236) [1]C. स्रग्वस्त्रालम्बनैः पीतैः.

[1]पूजयित्वा तु गन्धर्वान् पश्चाद् वाद्यं समाचरेत् ।
तन्त्रीभिः [2]पणवं नह्येत् सुमृष्टाभिः समन्ततः ॥ २७० ॥
[1]ततः पुष्करिकाश्चैव योजयेत्तत्र चर्मणा ।
[2]एवं मृदङ्गपणवाः कर्तव्या दर्दरास्तथा ॥ २७१ ॥
दैवतानि च वक्ष्यामि [1]यान्येषाञ्च भवन्ति हि ।
[2]वज्रेक्षणः शङ्कुकर्णो ग्रामणीश्च तथा महान् ॥ २७२ ॥
एताश्च देवता विप्रा मुरजेषु प्रकीर्तिताः ।
[1]मृन्मयत्वाद् मृदङ्गास्तु भाण्डं भ्रमयतीति च ॥ २७३ ॥
मुरजास्तूर्ध्वकरणादातोद्यं तोदनादपि ।
भाण्डस्यादौ प्रणीतोऽद्य पणवश्च विधीयते ॥ २७४ ॥
[1]दारु यतो दारयति तस्माद्भवति दर्दरः ।
दृष्ट्वा [2]मृदङ्गपणवदर्दरांश्च महामुनिः ॥ २७५ ॥
[1]मेघैस्तु स्वरसंवादान् [2]मृदङ्गानामथासृजत् ।
विद्युज्जिह्वो [3]भवेद् वामे [4]मेघः स तु महास्वनः ॥ २७६ ॥
ऐरावणो महामेघः तथा [1]चैवोर्ध्वके भवेत् ।
[2]आलिंग्ये च तडित्ख्यातो नाम्ना मेघो बलाहकः ॥ २७७ ॥
दक्षिणे पुष्करो मेघः [1]कोकिलो [वा]मतः स्मृतः ।
[2]मृदङ्ग[ए]व नाम्ना [3]च [4]उर्ध्वके नन्द्यथोच्यते ॥ २७८ ॥
[1]आङ्किकसिद्धिरित्येवमालिंग्यश्चा[थ] पिङ्गलः ।
[2]भूतप्रियो बलिस्तेभ्यो दातव्यः सिद्धिमिच्छता ॥ २७९ ॥

270 (C. 245b-246a ; K. XXXIV. 237) [1]K. पूजयित्वादि. [2]C. पणवं तु स्यात् मृष्टाभिः. 271 (C. 246b-247a ; K. XXXIV. 238) [1]C. घातपुष्करिका चैव. [2]C. मृदङ्गपणवा वापि. 272 (C. 247b-248a ; K. XXXIV. 239) [1]K. येषां ते च. [2]C. लचक्षणश्शंकुकर्णो. 273 (C. 248b ; K. XXXIV. 240) [1]C. om. 273b. 274 (K. XXXIV. 241). 275 (C. 249a ; K. XXXIV. 242) [1]C. om. 274a, K. दारयेतो. [2]K. मृदङ्गात्-पणवान् दर्दरश्च. 276 (C. 249b-250a ; K. XXXIV. 243) [1]C. मेघैस्तु रससंवादान्. K. मेघे सुस्वरसंयोग [2]C. मृदङ्गो नाम वापरान्. [3]KC. भवेद् वामी. [4]C. घेघस्य तु. 277 (C. 250b-251a ; K. XXXIV. 244) [1]K. चैवोर्ध्वकी. C. [0]चोर्ध्व गती. [2]C. आलिङ्गे. K. आलिङ्गाकि चव × × × बलाहकः. 278 (C. 251b-252a ; K. XXXIV. 245) [1]K. किकिला. [2]KC. मृदङ्गश्चैव. [3]K. तु. [4]C. ऊर्ध्वगो नान्द्यो[0]. K. ऊर्ध्वकु नन्द्याख्यो. 279 (C. 252b-253a ; K. XXXIV. 246) [1]C. अङ्गारसिद्धिरित्येवमालिङ्गश्चाष्ट. K. आङ्कि सिद्धिरितोवमालिङ्ग्यश्चापि. [2]C. तत्प्रियोऽपि.

[1]पूजयित्वा च तान् देवान् प्रेक्षां रङ्गे प्रकल्पयेत् ।
[2]करीषस्य तु संघाते [3]मृदङ्गं स्थापयेद् बुधः ॥ २८० ॥
[1]पसंघतानं (?) कस्यांश्च तथा चावनताः पुनः ।
आतोद्यपणवैश्चैव नर्तकोपनतास्तथा ॥ २८१ ॥
[1]शान्तिकर्म प्रयुञ्जीत विधिदृष्टेन कर्मणा ।
चत्वारः पणवाः कार्या दशरूपविधौ पुनः ॥ २८२ ॥
[1]आतोद्यान्यपि तान्येव नानावस्थासु वादयेत् ।
[2]नाटकेऽङ्के प्रकरणे वीथ्यां भाणे डिमे तथा ॥ २८३ ॥
[1]मृदङ्गं पणवं चैव दर्दरं [2]चैव वादयेत् ।
एवमेतद् बुधैर्ज्ञेयं मृदङ्गानां तु लक्षणम् ॥ २८४ ॥

अत ऊर्ध्वं प्रवक्ष्यामि उपहस्तस्य लक्षणम् ।
कर्तरी समहस्तश्च हस्तपाणित्रयं तथा ॥ २८५ ॥
[1]वर्तना दण्डहस्तश्च पञ्च शिक्षाकरास्तथा ।
तर्जन्याङ्गुष्ठयोगेन [2]स्वत्रे(?) जातिगतिस्ततः ॥ २८६ ॥
[3]पर्यायपतनैर्ज्ञेया कर्तरी हस्तयोर्द्वयोः ।
समयोः समतालेन [4]द्वयोर्हस्ततलार्धयोः ॥ २८७ ॥
पर्यायतः प्रपातो यः समहस्त इति स्मृतः ।
[5]विभावितस्य वामस्य पार्ष्णिणाङ्गुलिभिस्तथा ॥ २८८ ॥
सकृद्दक्षिणहस्तस्य हस्तपाणित्रयं भवेत् ।
[6]पूर्वं दक्षिणहस्तेन क्रमाद् वामेन [7]पा[त]तः ॥ २८९ ॥
चत्वारो यत्र वर्तन्ते वर्तनाद् वर्तनाः स्मृताः ।
प्रथमं वामहस्तेन गृहीत्वा दक्षिणेण तु ॥ २९० ॥

280 (C. 253b-254a ; K. XXXIV. 247) [1]K. अपूजयित्वा च्च तान् वै नैव प्रेक्षां प्रयोजयेत्. [2]C. रीषस्य for करीषस्य तु. [3]C. मृदङ्ग. 281 (K. XXXIV. 248) [1]C. om. 281. 282 (K. XXXIV. 249) [1]C. om. 282. 283 (C. 254b ; K. XXXIV. 250) [1]C. om. 282b. [2]K. नाटके सप्रकरणे भाणके सप्रहासने. 284 (C. 255 ; K. XXXIV. 251ab) [1]C. मृदङ्ग पणवांश्चापि. [2]C. चोपकारयेत्. 285-289 (C. 256-261) [1]C. पश्चचिन्नाकर. [2]M. स्वते जातिद्रतिस्तत. [3]C. पर्यागापतने[0]. M. पर्यायापतन[0]. [4]C. [0]र्हस्त समाश्रयोः. [5]C. विभावितव्या. [6]C. पूर्वद[0]. [7]C. पादतः. 290 (C. 262).

प्रहारा [1]क्रमपातेन दण्डहस्तः समस्तयोः ।
सौष्ठवं लाघवञ्चैव बाहुल्यं दृढतापि च ॥ २९१ ॥
सर्वेषां चैव हस्तानां गुणाश्चत्वार ईरिताः ।
एवमेतन्मया प्रोक्तं हस्तानामपि लक्षणम् ॥ २९२ ॥

अत ऊर्ध्वं प्रवक्ष्यामि वादकानां तु लक्षणम् ।
[1]गीतवाद्यकलालयग्रहमोक्षविशारदोऽथ लघुहस्तः ।
चित्रपाणिर्विधिज्ञः सिद्धिस्थाने [2]ध्रुवाकुशलः ॥ २९३ ॥
कलाभिरतः मधुरहस्तः सुनिविष्टो [1]रक्तमार्जनो बलवान् ।
सुविहितशरीरबुद्धिः संसिद्धो [2]वादकः श्रेष्ठः ॥ २९४ ॥

आलेपनप्रमाणज्ञश्चतुमार्गकृतश्रमः[1] ।
प्रतिग्रहीता सिद्धीनामङ्गदोषविवर्जितः ॥ २९५ ॥
स्वभ्यस्तकरणः साम्ये गीतज्ञो गुणितग्रहः ।
सुसंगीतप्रयोगज्ञो मृदङ्गी तु भवेद् गुणैः ॥ २९६ ॥

[1]अभ्रान्तोऽथ हस्तकालज्ञश्छिद्रावरणपण्डितः[1] ।
अभ्यस्तकरणैश्चैव भवेत् पाणविको गुणैः ॥ २९७ ॥
निश्चलो निपुणः शीघ्रो लघुहस्तो विधानवित् ।
वादनान्तरवेदी च दर्दरी तु प्रशस्यते ॥ २९८ ॥

एतत् सर्वं नाट्ययोगं समीक्ष्य
प्रोक्तं वाद्यं [1]सर्वलोकानुमानात् ।
नोक्तं [2]यच्चेदागमाच्छास्त्रबुद्ध्या
सद्भिः कार्यं मार्गजातीः समीक्ष्य ॥ २९९ ॥

291-292 (C. 263-264 ; K. XXXIV. 251c) [1]C. क्रमपादेन. 293 (C. 264b-265a ; K. XXXIV. 252) [1]C. गीतवात (M. वाद.) कलावात (M. पात) ग्रहमोक्षविशारदः। अथ लघुहस्तश्चित्रपाणि. K. गीतवादात्तलयाव्यसहस्तोधरविशारदोऽथ लघुहस्तः। किंद्रावणी विज्ञेयः सिद्धिस्थाने ध्रुवाकुशलः। [2]ध्रुवाकुशलः from C. 265b. 294 (C. 265b-266a ; K. XXXIV. 253) [1]C. मार्जनी बलवान्. [2]K. मृदङ्गवादी गुणैरेव. 295 (C. 266b-267a ; K. XXXIV. 254) [1]K. °श्चतुमार्गकृतश्रमः. 296 (C. 267bc ; K. XXXIV. 255). 297 (K. XXXIV. 256) भ्रान्तोऽर्धहस्त°. [2]K. °च्छिद्रावरण पण्डितः. 298 (C. 267bc ; K. XXXIV. 257). 299 (C. 268 ; K. XXXIV. 258) [1]K. °लोकानुभावात्. [2]K. °गमाद्वस्तुबुद्ध्या.

स्फुटप्रहारं [1]विशदं विभक्तं
[2]रक्तं विघुष्टं करलेपनं च ।
त्रिमार्जनं पूरितरागयोगं
मृदङ्गवाद्यं [3]गुणतो वदन्ति ॥ ३०० ॥
वाद्येषु[1] यत्नः प्रथमं तु कार्यः
[2]शय्या हि नाट्यस्य वदन्ति वाद्यम् ।
वाद्ये च गीते च सुप्रयुक्ते
[3]नाट्यप्रयोगो न विपत्तिमेति ॥ ३०१ ॥

इति भारतीये नाट्यशास्त्रे पुष्करवाद्यो नाम त्रयस्त्रिंशोऽध्यायः ॥

300 (C. 269 ; K. XXXIV. 259) [1]M. विषमं. [2]M. सन्नोऽपि घुष्टं रिभितकञ्च. [3]M. गुणमेते. 301 (C. 270 ; K. XXXIV. 260) [1]K. वाद्ये तु. [2]K. शयानि. [3]C. नाटस्य योगी न विनाशमेति. [4]C. वाद्याध्यायी.

चतुस्त्रिंशोऽध्यायः ।

अत ऊर्ध्वं प्रवक्ष्यामि प्रकृतीनां तु लक्षणम् ।
[1]नायकानां च सर्वेषां चतुर्णामपि तत्त्वतः ॥ १ ॥
[1]समासतस्तु [2]प्रकृतिस्त्रिविधा परिकीर्तिता ।
[3]स्त्रीणां च पुरुषाणां च उत्तमा मध्यमाधमाः ॥ २ ॥
[1]जितेन्द्रिया ज्ञानवती नानाशिल्पविचक्षणा ।
दक्षिणाऽथ [2][भोग]दक्षा दीनानां [3]परिसान्त्विनी ॥ ३ ॥
[1]नानाशास्त्रार्थसम्पन्ना गाम्भीर्यौदार्यशालिनी ।
[2]धैर्यत्यागगुणोपेता ज्ञेया प्रकृतिरुत्तमा ॥ ४ ॥
[1]लोकोपचारचतुरा शिल्पशास्त्रविशारदा[2] ।
[3]विज्ञानमाधुर्ययुता मध्यमा प्रकृतिः स्मृता ॥ ५ ॥
[1]रुक्षा वचसि दुःशीलाः कुसत्त्वा [2]शल्यबुद्धिकाः ।
क्रोधना घातकाश्चैव [3]मित्रघ्नाश्छिद्रघातकाः ॥ ६ ॥
[1]वृथारम्भप्रसक्ताश्च यत्किञ्चिद्वादिनोऽल्पकाः ।
[2]पिशुना उद्धता वाक्यैरकृतज्ञास्तथालसाः ॥ ७ ॥

1 (C. 1a ; H, 1) [1]C. om. 1b. 2 (C. 1b-2a ; H. 2 ; BK. XXIV. 1) [1]B. and K. have this as the ch. XXIV and begins from here. [2]K. विविधा. H. विविधा. [3]K. पुरुषाणामथ स्त्रीणामुत्तमाधममध्यमाः. 3 (C. 2b-3a ; B. XXIV. 2) [1]HK. have in its place. अत ऊर्ध्वं प्रवक्ष्यामि नानापुरुषलक्षणम् । नानाशीलगुणे लोके उत्तमाधममध्यमे ॥ प्रयोक्तव्या पृथग् भावैर्विज्ञेया प्रकृतिर्बुधैः । नानाशिल्पादिसम्पन्ना ज्ञानवन्तो जितेन्द्रियाः ॥ ८५-८६, ८७, ८८ ॥ [2]C. भगालक्षा, B. [0]महालक्ष्या. [3]B. परिसान्त्वनी. 4 (C. 3b-4a ; B. XXIV. 3) [1]HK. (87, 88-88, 89) have in its place लोकक्रिया (H. लोके तु ये.) विशेषज्ञा धर्माधर्मविचक्षणाः । शास्त्रेतिहासकुशलाः शीलवृत्तव्यवस्थिताः । अहिंसासत्त्वसम्पन्नाः प्रकृत्या तूत्तमाः स्मृताः । [2]B. धैर्य. 5 (C. 4b-5a ; B. XXIV. 4 ; H. 89b ; K. XXIV. 88b) [1]HK. लोकोपचारतत्त्वज्ञा. [2]HK. विचक्षणाः for विशारदाः. [3]HK. have here मध्यप्राय गुणोपेताः प्रकृत्या मध्यमाः स्मृताः. 6 (C. 5b-6a ; B. XXIV. 5 ; H. 90b-91a ; K. XXIV. 89b-90a) [1]B. रुक्षवाचोऽथ ; HK. रुक्षवाक्या दुराचारा निःसत्त्वा. [2]HK. स्वल्पबुद्धयः, NC. स्वल्पबुद्धिकाः, B. स्थूलबुद्धयः. [3]K. कृतघ्नाश्छिद्रदर्शिनः. H. कृतघ्ना सर्वदर्शिनः. B. मित्रघ्नाश्छिद्रमानिनः. 7 (C. 6b ; B. XXIV. 6a ; H. 91b-92a ; K. XXIV. 90b-91a) [1]CB. om. 7a. [2]HK. पिशुना पापनिरताः स्त्रीलौल्याः (B. लीलाः) कलहप्रियाः.

[1]मान्यामानविशेषज्ञा स्त्रीलोलाः कलहप्रियाः ।
[2]सूचकाः पापकर्माणः परद्रव्यापहारिणः ॥ ८ ॥
एभिर्दोषैस्तु [1]सम्बद्धा भवन्ति ह्यधमा नराः ।
एवञ्च शीलतो [2]नृणां प्रकृतिस्त्रिविधा स्मृताः ॥ ९ ॥
[1]स्त्रीणां पुनस्तु प्रकृतिं व्याख्यास्याम्यनुपूर्वशः ।
[2]मृदुभाषा त्वचपला स्मितभाषिण्यनिष्ठुरा ॥ १० ॥
[1]गुरूणां वचने दक्षा सलज्जा विनयान्विता ।
[2]रूपाभिजनमाधुर्यगुणैः स्वाभाविकैर्वृता ॥ ११ ॥
गाम्भीर्यधैर्यसम्पन्ना [1]उत्तमा प्रकृतिः स्मृता ।
[2]नात्युत्कृष्टैरशिथिलैरेभिरेव वृता गुणैः ॥ १२ ॥
[1]अल्पदोषानुबिद्धा च मध्यमा प्रकृतिः स्मृता ।
अधमा प्रकृतिर्या तु पुरुषाणां प्रकीर्तिता ॥ १३ ॥
[1]विज्ञेया सैव नारीणामधमानां समासतः ।
[2]प्रेष्या चैव हि विज्ञेया संकीर्णा प्रकृतावपि ॥ १४ ॥
नपुंसकश्च विज्ञेयः संकीर्णोऽधम एव च ।
[1]शकारश्चैव विटश्च ये [2]चान्येऽप्येवमादयः ॥ १५ ॥
[1]संकीर्णा प्रकृतिर्ज्ञेया [2]नाटके च द्विजोत्तमाः ।
एते ज्ञेया [3]प्रकृतयः पुरुषस्त्रीनपुंसकाः ॥ १६ ॥

8 (C. 7 ; B. XXIV. 6b-7a ; H. 92b ; K. XXIV. 91b) [1]C. मान्यामानाविशेषज्ञा. B. मान्यामान्याविशेषज्ञा. HK. मान्यामान्यविशेषाणामनभिज्ञाश्च तस्कराः. [2]HK. om. 8b. 9 (C. 8 ; B. XXIV. 7b-8a ; H. 93 ; K. XXIV. 92) [1]HK. संयुक्ताः प्रकृतावधमाः स्मृताः. B. सम्पन्ना भवन्तीह्यधमा नराः. 10 (C. 9 ; B. XXIV. 8b-9a ; H. 110 ; K. XXIV. 108b-109a) [1]HK. अतःपरं प्रवक्ष्यामि स्त्रीणां च प्रकृतिं पुनः. [2]HK. मितभाषा विदग्धा च सलज्जा चाप्य (K. न च) निष्ठुराः. 11 (C. 10 ; B. XXIV. 9b-10a ; H. 111a; K. XXIV. 109b) [1]HK. कुलशीलगुणोपेता गुरूणां शासने रता. C. गुणानां वचने. [2]C. रूपाभिजनमाधुर्या गुणैः स्वाभाविकी स्मृता. 12 (C. 11 ; B. XXIV. 10b-11a. H. 111b K. XXIV. 110a) [1]BC. सा (B. वि) ज्ञेया प्रमदोत्तमाः. [2]HK. om. this. B. नात्युत्कृष्टैरनिखिलै[0]. 13 (C. 12 ; B. XXIV. 11b-12a) [1]HK. om. 13. 14 (C. 13a ; B. XXIV. 12b, 13b ; H. 10b ; K. XXIV. 10a) [1]HK. om. this hem. [2]C. om. this hem. 15 (C. 13b, 14a; B. XXIV. 13a, 14a; H. 11 ; K. 10b-11a) [1]C. विदूषकः शकारश्च. [2]K. संकरे स्थविरश्चैव. H. शकारश्चैव चेटश्च. B शकारश्च विटश्चैव. [2]HK. चान्येऽप्यधमा नरा. 16 (C. 14b-15a ; H. 12 ; K. XXIV. 11b-12a) [1]N. संकीर्णा प्रकृति ज्ञेया[0]. CM. संकीर्णा नाटके ज्ञेया[0]. [2]C. [0]स्तु तज्ज्ञै नाटके बुधैः. B. ह्यधमा नाटके बुधैः. [3]HK. प्रकृत्या तु.

[1]आसां तु संप्रवक्ष्यामि [2]विभागं शीलसंश्रयम् ।
[3]तत्र चत्वार एव स्युर्नायकाः परिकीर्तिताः ॥ १७ ॥
[1]मध्योत्तमायां प्रकृतौ नानालक्षणलक्षिताः ।
[2]धीरोद्धता धीरललिता धीरोदात्तास्तथैव च ॥ १८ ॥
धीरप्रशान्तकाश्चैव नायकाः परिकीर्तिताः ।
देवा धीरोद्धता ज्ञेयाः [1]स्युर्धीरललिता नृपाः ॥ १९ ॥
[1]सेनापतिरमात्यश्च [2]धीरोदात्तौ [3]प्रकीर्तितौ ।
[4]धीरप्रशान्ता विज्ञेया ब्राह्मणा वणिजस्तथा ॥ २० ॥
एतेषां च पुनर्ज्ञेयाश्चत्वारश्च[1] विदूषकाः ।
[2]लिंगिनो [द्विजाऽ]वरजाः शि[ष्य]श्चेति यथाक्रमम् ॥ २१ ॥
[1]देवक्षितिभृतामात्यब्राह्मणानां प्रयोजयेत् ।
[2]विप्रलम्भे सुहृदो[ऽमी] संकथालापपेशलाः ॥ २२ ॥
व्यसनी [1]प्राप्तदुःखो वा [2]युज्यतेऽभ्युदयेन यः ।
तथा पुरुषबाहुल्ये प्रधानो नायकः स्मृतः[3] ॥ २३ ॥
[1]यत्रानेकस्य भवतो व्यसनाभ्युदयौ पुनः ।
[2]प्रकृष्टौ यस्य तौ स्यातां [3]स भवेत् तत्र नायकः[4] ॥ २४ ॥

17 (C. 15b-16a ; B. XXIV. 15b-16a, K. XXIV. 12b, 2a ; H. 13a, 3a) [1]KH. एतेषां चैव वक्ष्यामि विभागं शीललक्षणैः. [2]B. विधानं. [3]KH. नाट्ये चत्वार एवैते, B. भव चत्वार. 18 (C. 16b-17a ; B. XXIV. 16b–17a. H. 3b-4a ; K. XXIV. 2b-3a) [1]K. तबोत्तमायां. [2]HK. read all the terms in singular. 19 (C. 17b-18a ; B. XXIV. 17b-18a. H. 4b-5a ; K. XXIV. 3b-4a) [1]C. ललितास्तु नृपाः स्मृताः 20 (C. 18b-19a; B. XXIV. 18b-19a; H. 5b.6a; K. XXIV. 4b-5a) [1]HK. °मात्याश्च. [2]HK. °दात्ताः. [3]HK. °कीर्तिताः. [4]KH. ब्राह्मणो वणिजश्चैव प्रोक्ता धीरप्रशान्तकाः. 21 (C. 19b-20a ; B. XXIV. 19b-20a ; K. XXIV. 5b) [1]K. चत्वारोऽथ. [2]KH. om. 21b. C. लिङ्गानि ते वरजवा शिष्टाश्चेति. N. लिङ्गान्तस् तेऽवरजा वा शिष्टाश्चेति. 22 (C. 20b-21a ; B. XXIV. 20b-21a) [1]KH. om. 22. [2]C. विप्रलम्भे सुहृद्दासी···पेशला. 23 (C. 21b-22a ; B. XXIV. 21b-22a) [1]C. प्राप्तदुःखा. B. प्राप्यदुःखं. [2]C. युज्यते भूमिपेन सा. [3]KH. om. 73. 24 (C. 22b-23a ; B. XXIV. 22b-23a) [1]C. तत्र. [2]B. सपुष्टौ. [3]B. न भवेत्. [4]KH. om. 24.

एते तु नायका ज्ञेया [1]काव्यबन्धेषु सर्वदाः ।
[3]नायिकाश्चैव वक्ष्यामि चतस्रः पुनरेव तु ॥ २५ ॥
दिव्या च नृपपत्नी च कुलस्त्री गणिका तथा ।
एतास्तु नायिका ज्ञेया नानाप्रकृतिलक्षणाः ॥ २६ ॥
[1]धीरा च ललिता चैव उदात्ता निभृता तथा ।
[2]दिव्या राजाङ्गना ह्येता गुणैर्युक्ता भवन्ति हि ॥ २७ ॥
उदात्ता निभृता चैव [1]भवेत्तु कुलजाङ्गना ।
[2]ललिता चाप्युदात्ता च गणिका शिल्पकारिका ॥ २८ ॥
[1]प्रकृतीनां तु सर्वासामुपचारो द्विधा स्मृतः ।
[2]बाह्यश्चाभ्यन्तरश्चैव तयोर्वक्ष्यामि लक्षणम् ॥ २९ ॥
तत्र राजोपचारो यो [1]भवेदाभ्यन्तरस्तु सः ।
ततो बाह्योपचारस्तु यः स बाह्यक उच्यते ॥ ३० ॥

[1]तत्र राजोपचारेषु अन्तःपुरसमाश्रयम् ।
स्त्रीविभागं प्रवक्ष्यामि [2]उपचारं तथैव च ॥ ३१ ॥
[1]महादेवी तथा देवी स्वामिनी [2]स्थायिनी तथा ।
भोगिनी शिल्पकारिणी [3]नाटकीयाथ नर्तकी ॥ ३२ ॥

25 (C. 23b ; K. XXIV ; 6. H. 6b-7a) [1]C. नानाप्रकृतिलक्षणाः. [2]C. om. 25b ; B. om. 25. 26 (K. XXIV. 7 ; H. 7b-8a). 27 (C. 24 ; B. XXIV. 24b-25a ; K. XXIV. 8 ; H. 8b-9a) [1]HK. read all terms in plural. [2]C. दिव्यानां जातयस्तु स्त्रीगुणैः°. 28 (C. 25 ; B. XXIV. 25b-26a ; K. XXIV. 9 ; H. 9b-10a) [1]C. भवतीव कुलाङ्गना. [2]KH. गणिका शिल्पकारी च उदात्तललिते स्मृते. 29 (C. 26 ; B. XXIV. 26b-27a ; K. XXIV. 12c ; H. 13b) [1]KH. सर्वासां प्रकृतीनां तु प्रकारो द्विविधः स्मृतः. [2]KH. om. 29b. 30 (C. 27 ; B. XXIV. 27b-28a ; K. XXIV. 13 ; H. 14a) [1]CN. भवत्याभ्यन्तरस्तु. K. भवेदभ्यन्तरस्तु. [2]H. om. 30b, [2]K. बाह्योपचारो यतस्तस्माद् विज्ञेयो बाह्य एव च. 31 (C. 28 ; B. XXIV. 28b-29a ; K. XXIV. 14 ; H. 14b-15a) [1]KH. तस्माद्राजोपचारेषु पुनराभ्यन्तराश्रयम्. C. राजोपचारंतमन्तःपुरसमाश्रयम्. [2]C. अन्तःपुरसमाश्रयम्. N. as in HK. B. विभक्तमुपचारतः. 32 (C 29 ; B. XXIV. 30 ; K. XXIV. 15 ; H. 15b-16a) [1]CMN. read all these terms in plural. B. महादेवी. [2]KH. स्थायिनी, CB. स्थापिता. [3]C. नाटकीयाश्च नर्तिका. B. नाटकीयाः सनर्तकाः. B. adds before 32 राजोपचारं वक्ष्यामि ह्यन्तःपुरसमाश्रयम्.

[1]अनुचारिका च विज्ञेया तथा च परिचारिका ।
तथा सञ्चारिका चैव तथा [2]प्रेषणचारिका ॥ ३३ ॥
[1]महत्तरा प्रतीहारी कुमारी स्थविरा अपि ।
[2]आयुक्तिका च नृपतेरयमाभ्यन्तरो जनः ॥ ३४ ॥
तत्र [1]मूर्धाभिषिक्ता या कुलशीलसमन्विता ।
[2]गुणैर्युक्ता वयःस्था च मध्यस्थाऽक्रोधना तथा ॥ ३५ ॥
[1]मुक्तेर्ष्या नृपशीलज्ञा [2]समदुःखसुखा सदा ।
[2]शान्तिस्वस्त्ययने भर्तुः सततं मङ्गलैषिणी ॥ ३६ ॥
[1]शान्ता [2]प्रीतियुता धीरा अन्तःपुरहिते रता ।
एभिर्गुणैस्तु सम्पृक्ता [3]महादेवी उदाहृता ॥ ३७ ॥
एभिरेव गुणैर्युक्ता [1]सत्संस्कारैस्तु वर्जिता ।
[2]गर्विता राजपुत्री च [3]प्रीतिसम्भोगतत्पराः ॥ ३८ ॥
[1]शुचिर्नित्योज्ज्वलाकारा [2]प्रतिपक्षाभ्यसूयिका ।
[3]यौवनादिगुणोन्मत्ता सा देवी अभिधीयते ॥ ३९ ॥
[1]सेनापतेरमात्यानां [2]भृत्यानामथवा पुनः ।
भवेयुस्तनयास्तास्तु [3]प्रीतिसम्मानवर्धिताः ॥ ४० ॥

33 (C. 30 ; B. XXIV. 31 ; K. XXIV. 16 ; H. 16b-17a) [1]See note 1 on 32. [1]KH. अनुचारी तथायुक्ता. [2]HKB. प्रेष(ङ्क. B)णकारिका. 34 (C. 31 ; B. XXIV. 32 ; K. XXIV. 17 ; H. 17b-18a) [1]C. महत्तर्यः,[2] See n. 1 on 32. 35 (C. 32 ; B ; XXIV. 33 ; K. XXIV. 18 ; H. 18b-19a) [1]KH. मूर्धावसिक्ता. [2]K. समतुल्यचरिवा च वयस्या क्रोधवर्जिता. 36 (C. 33 ; B. XXIV. 34 ; K. XXIV. 19 ; H. 19b-20a) [1]HK. अनीर्ष्या. [2]HK. शान्तिस्वस्त्ययनैर्नित्यं भर्तृमङ्गलकाङ्क्षिणी. 37 (C. 34 ; B. XXIV. 35 ; K. XXIV. 20 ; H. 20b-21a) [1]HK. पतिव्रता क्षमायुक्ता अन्तःपुरहिते रता. [2]C. पतियुता, BN. पतिव्रता. [3]C. महादेव्य उदाहृतः. 38 (C. 35 ; B. XXIV. 36 ; K. XXIV. 21 ; H. 21b-22a) [1]HK. बहुमानविवर्जिता. [2]B. सत्संस्कारवि[0]. [2]C. गर्विता स्वतिसौभाग्यात् B. गर्विताश्चाति सौभाग्याः [3]HK. रतिसंयोगतत्परा, B. पतिसंभोग तत्पराः. 39 (C. 36 ; B. XXIV. 37 ; K. XXIV. 22 ; H. 22b-23a) [1]HK. बालानित्योज्ज्वलगुणा. HK. प्रतिपक्षेष्व[0]. B. पतिरक्षाभ्य[0]. [3]श्रीरूपगुणाढ्यास्तु यास्ता देव्यः प्रकीर्तिताः. 40 (C. 37 ; B. XXIV. 38 ; K. XXIV. 23 ; H. 24) [1]H. reads before this रूपिणी पद्मिनी जातिः सावधाना नृपाङ्गना. [2]K. दण्डिता तत्पराश्च या. H. दण्डिनी तत्[0]. [3]B. प्रतिसम्मान[0].

शीलरूपगुणैर्यास्तु सम्पन्ना [1]नृपवल्लभाः ।
[2]स्वगुणैर्लब्धमाहात्म्याः स्वामिन्य इति ताः स्मृताः ॥ ४१ ॥
रूपयौवनशालिन्यः कर्कशा [1]विभ्रमान्विताः ।
[2]रतिसम्भोगकुशलाः [3]प्रतिपक्षाभ्यसूयिकाः ॥ ४२ ॥
[1]उत्थिताश्चाप्रमत्ताश्च त्यक्तालस्या ह्यनिष्ठुराः ।
मान्यामान्यविशेषज्ञाः स्थायिन्यः [2]संप्रकीर्तिताः ॥ ४३ ॥
[1]दक्षाः स्फुटा ह्युदात्ताश्च गन्धमाल्योज्ज्वलाः [2]सदा ।
[3]नृपतिच्छन्दवृत्ताश्च [4]सर्वत्रेर्ष्याविवर्जिताः ॥ ४४ ॥
[5]सुशीला लघुसम्माना मृदुर्नात्युद्धतास्तथा ।
मध्यस्था निभृताः क्षान्ता भोगिन्य इति ताः स्मृताः ॥ ४५ ॥
नानाकलाविशेषज्ञा नानाशिल्पविचक्षणाः ।
गन्धशिल्पविभागज्ञा नानालेख्यविशारदाः[1] ॥ ४६ ॥
[1]शयनाशनयानज्ञा मधुराश्चतुरास्तथा ।
दक्षा[2]श्चिवा स्फुटाः [3]श्लक्ष्णा निभृताः शिल्पकारिकाः ॥ ४७ ॥
[1]अथ रूपगुणौदार्यसौभाग्यधैर्यशीलसम्पन्ना[2] ।
[3]पेशलमधुरस्निग्धानुनादिकलचित्रकण्ठा च ॥ ४८ ॥
[1]हेलाभावविशेषज्ञाः सत्त्वेनाभिनयेन च ।
माधुर्येण च सम्पन्ना ह्यातोद्यकुशलास्तथा ॥ ४९ ॥

41 (C. 38 ; B. XXIV. 39 ; K. XXIV. 24 ; H. 25) [1]B. नृपतेर्हिताः. [2]KH. स्वामिसत्कारसम्पन्ना. B. स्वगुणैर्लब्धसम्माना. 42 (C. 39 ; B. XXIV. 40 ; K. XXIV. 25 ; H. 26) [1]KH. ललिता तथा. [2]C. अतिसम्भोग[0]. [3]K. प्रतिपक्षेऽभ्यसूयिका. 43 (B. XXIV. 42 ; K. XXIV. 27 ; H. 28) [1]C. om. 43. [1]HK. उपस्थिता चाप्रमत्ता निद्रालस्या. [2]H. कथिता तथा. 44-45 (K. XXIV. 26, 28 ; B. XXIV. 41, 43 ; H. 27, 29) [1]H. दत्ता. B. दक्षा भर्तुश्च चित्तज्ञा. [2]C. तथा. [3]B. नृपतेश्छन्दवर्तिन्यो नचेर्ष्या-मानगर्विताः. [4]H. सर्वदे[0]. [5]B. कुलशीलबलप्राप्ता मृदवो नातिचोद्धटाः. 46 (K. XXIV. 29 ; B. XXIV. 44 ; H. 30) [1]B. [0]विकल्पिका. 47 (C. 40b-41a ; K. XXIV. 30 ; B. XXIV. 45 ; H. 31) [1]B. शयनाशनभागज्ञा. [2]B. दक्षाः सौम्याः स्फुटाः श्लिष्टा. [3]H. प्तीवा. 48 (C. 46 ; B. XXIV. 50b-51a) [1]C. अर्ध. KH. om. 48. [2]C. सौभाग्यवीर्य सम्पन्नाः. [3]C. पेशल मधुरा स्निग्धा न च विकला श्चित्रकर्म कुशला च. 49 (C. 43 ; B. XXIV. 47b-48a) [1]B. [0]विशेषाढ्या.

[1]स्वरतालयतिज्ञाश्च तथाचार्योपसेविकाः ।
चतुरा नाट्यकुशलाश्चोहापोहविचक्षणाः ॥ ५० ॥
रूपयौवनसम्पन्ना नाटकीयाः प्रकीर्तिताः ।
अङ्गप्रत्यङ्गसम्पन्नाश्चतुषष्टिकलान्विताः ॥ ५१ ॥
चतुराः प्रश्रयोपेताः स्त्रीदोषैश्च विवर्जिताः ।
सदा प्रागल्भ्ययुक्ताश्च [1]त्यक्तालस्या जितश्रमाः ॥ ५२ ॥
नानाशिल्पप्रयोगज्ञा नृत्तगीतविचक्षणाः ।
समागतासु नारीषु रूपयौवनकान्तिभिः ॥ ५३ ॥
न दृश्यते गुणैस्तुल्या यस्याः सा नर्तकी स्मृता ।
[1]सर्वावस्थोपचारेषु या न मुञ्चति पार्थिवम् ॥ ५४ ॥
[1]विज्ञेया [2]नामतः सा तु नृपतेरनुचारिका ।
[3]छत्रशय्यासने युक्ता तथा व्यजनकर्मणि ॥ ५५ ॥
[1]संवाहने च गन्धे च तथा चैव प्रसाधने ।
[1]तथाभरणसंयोगे माल्यसंग्रहणेषु च ॥ ५६ ॥
[1]विज्ञेया नामतः सा तु नृपतेः परिचारिका ।
नानाकक्ष्याविचारिण्यस्तथोपवनसंचराः ॥ ५७ ॥
देवतायतनक्रीडाप्रासादपरिसंचरा[1]ः ।
[1]यामकिन्यस्तथा चैव याश्चैवंलक्षणाः स्त्रियः ॥ ५८ ॥
संचारिकास्तु विज्ञेया नाट्यज्ञैर्भोगवारिता[1]ः ।
[1]प्रेषणे कामसंयुते तथा गुह्यसमुत्थिते ॥ ५९ ॥

50-51 (C. 41b-42, 44a ; B. XXIV. 46, 47a. 48b ; cf. K. XXIV. 31, 32) [1]B. ग्रहमोक्षलयज्ञा या रसभावविकल्पिकाः. 52 (C. 44b-45a ; B. XXIV. 49 ; K. XXIV. 33b ; H. 34b) [1]N. मुक्तालस्या. 53 (C. 45b, 47a ; B. XXIV. 50a, 51b ; K. XXIV. 33a, 34a ; H. 34a ; 35a) K. यौवनादिगुणान्मत्ता. 54 (C. 47b-48a ; B. XXIV. 52 ; K. XXIV. 47, 34b-35a ; H. 35b-36a) [1]HK. सर्वावस्था प्रचारेषु समुगच्छति या नृपम्. 55 (B. XXIV. 53 ; K. XXIV. 35b, 38a ; H. 36b, 39a) [1]C. om. 55. [2]B. दक्षिणादक्ष नाट्यज्ञैरनु⁰. [3]B. शय्यापाली छत्रधारी तथा व्यजनधारिणी. 56 (B. XXIV. 54 ; K. XXIV. 38b-39a ; H. 39b-40a ; cf. C. 48-49) [1]B. संवाहिका गन्धयोक्त्री तथा चैव प्रसाधिका. [2]B. ⁰भरणगन्धयोक्त्री च माल्यसंयोजिका तथा. 57 (B. XXIV. 55 ; C. 50b ; K. XXIV. 39b-40a ; H. 40b-41a) [1]B. एवंविधा भवेयुर्या ता ज्ञेयाः. 58 (C. 51 ; B. XXIV. 56 K. XXIV. 40b-41a ; H. 41b-42a) [1]K यामेषु च नियुक्ता यास्तथा च विविधाश्रये. 59 (C. 52ab ; B. XXIV. 57 ; K. XXIV. 41b-42a ; H. 42b-43a) [1]C प्रेषणैः कामसंयुक्तैः B. प्रेषणेऽकाम. ⁰[2]C. युक्ता गुह्य समुत्थितेः. K. गुह्यागुह्य समुत्थितैः.

[1]या नियुक्ता बुधैस्तास्तु [2]ज्ञेयाः प्रेषणचारिकाः ।
[3]सर्वान्तःपुररक्षायां [4]स्तुतिस्वस्त्ययनादिभिः ॥ ६० ॥
या वृद्धिमभिनन्दन्ति [1]महत्तर्यस्तु ताः स्मृताः ।
[2]सन्धिविग्रहसंबद्धनानाकार्यसमुत्थितम् ॥ ६१ ॥
[1]निवेदयन्ति कार्यं याः प्रतीहार्यस्तु ताः स्मृताः ।
[2]अप्राप्तरतिसंभोगा असंभ्रान्ता अनुद्धताः ॥ ६२ ॥
[1]निभृता याः सलज्जाश्च ताः कुमार्य इति स्मृताः ।
[2]पूर्वराजनयाभिज्ञाः [3]पूर्वराजाभिपूजिताः ॥ ६३ ॥
[1]सर्वानुचरितज्ञाश्च ता वृद्धा इति संज्ञिताः ।
[2]भाण्डागारेष्वधिकृता [3]आयुधाधिकृतास्तथा ॥ ६४ ॥
[1]फलमूलौषधीनाञ्च तथा [2]चैवान्नवीक्षिकाः ।
[3]गन्धाभरणमाल्यानां वस्त्राणां चैव [4]चिन्तिकाः ॥ ६५ ॥
[1]बह्वर्थेषु नियुक्ता या आयुक्ता इति च स्मृताः ।
[2]इत्यन्तःपुरचारिण्यः स्त्रियः प्रोक्ताः समासतः ॥ ६६ ॥

60 (C. 52c-53a ; B. XXIV. 58 ; K. XXIV. 42b-43a ; H. 43b-44a) [1]CN. प्रेष(ष)णीया नृपैर्यास्तु, B. नृपैर्यास्तु नियुज्यन्ते ताः. [2]K. ज्ञेयान्वेषण⁰, H. ज्ञेया प्रेक्षण⁰. B. ज्ञेयाः परिचारिकाः. [3]KH. ⁰रक्षायाम्. B. ⁰रक्षासु. [4]CB. स्तुतिस्वस्त्ययने च याः, KH. आशीस्वस्त्य⁰. 61 (C. 53b ; B. XXIV. 59 ; K. XXIV. 43b-44a ; H. 44b-45a) [1]K. ज्ञेयास्ताः सुमहत्तरा, H. ज्ञेयास्तास्तु महः⁰, B. ता विज्ञेया महत्तराः. [2]C. om. 61b, B. ⁰नानाचार⁰. 62 (B. XXIV. 60 ; K. XXIV. 44b-45a : H. 45b-46a) [1]C. om. this. [2]B. अप्राप्तरससम्भोगाः न संभ्रान्ता न चोद्धताः. 63 (B. XXIV. 61 ; C. 54a ; K. XXIV. 45b-46a ; H. 46b-47a) [1]C. om. 63a, B. निभृताश्च……कुमार्यो बालिकाः स्मृताः. [2]C. पूर्वरङ्गनयाभिज्ञा, B. पूर्वराजनयज्ञा याः. [3]C. पूर्वराज्ञाभि⁰, KH. सर्वराजसु पूजिता. 64 (C. 54b-55a ; B. XXIV. 62 ; K. XXIV. 46b, 36a ; H. 47b, 37a) [1]K. सर्वराजोपचारज्ञा, B. पूर्वराजानुचरितास्ता. [2]KH. भाण्डागारे नियुक्ता या. [3]K. आयुधागारे एव च, B. स्वायुधाधि⁰, C. सायुधा विकृतास्तथा. 65 (C. 55b-56a ; B. XXIV. 63 ; K. XXIV. 36b-37a ; H. 37b-38a) [1]KH. औषधीफलमूलेषु बीजेषु व्यापृता तथा. [2]C. ⁰वान्नवीक्षणा, N. वान्नवीक्षिताः, B. वान्ववेक्षिकौ for वान्नवीक्षिकाः. [3]KH. गन्धाभरणवस्त्रेषु आख्यानकथनेषु च. [4]C. चिन्तकाः. 66 (C. 56b-57a ; B. XXIV. 64 ; K. XXIV. 37b ; H. 38b) [1]C. बह्वाश्रयास्तथा युक्ता विज्ञेया युक्तिकाः स्मृताः. B. बह्वाश्रये तथा युक्ता ज्ञेया ह्यायुक्तिकास्तु ताः. [2]KH. om. 66b.

[1]विशेषणं तु शेषाणां तासां वक्ष्यामि वो द्विजाः ।
या [2]नियुक्ता नियोगेषु प्रयोगेषु [3]तथैव हि ॥ ६७ ॥
[1]न चोद्धटा न चोद्भ्रान्ता न लुब्धा न च निष्ठुराः ।
[2]शान्ताः क्षान्ताः प्रसन्नाश्च जितक्रोधा जितेन्द्रियाः ॥ ६८ ॥
[1]अकामा निभृताश्चैव स्त्रीदोषैश्च विवर्जिताः ।
[2]अनुरक्ताश्च भक्ताश्च नानापार्श्वसमुत्थिताः ॥ ६९ ॥
ता नियोगेषु योक्तव्या [1]वनिता मदवर्जिताः ।
[2]यत्स्यान्नपुंसकं नाम तृतीया [3]प्रकृतिः स्मृताः[4] ॥ ७० ॥
[1]साऽप्यन्तःपुरसञ्चारे योज्या पार्थिववेश्मनि ।
[2]स्नातकाः कञ्चुकीयाश्च तथा [3]वर्षधराः पुनः ॥ ७१ ॥
[1]औपस्थायिकनिर्मुण्डाः कक्षास्थानेषु योजयेत् ।
अपुमांसस्तु ये पुरुषा ये तु स्त्रीभोगवर्जिताः ॥ ७२ ॥
[1]एते त्वन्तःपुरचराः कार्या नित्यं हि नाटके ।
[2][द्वास्थन्तु] स्तातकं कुर्यादार्यमाचारसंयुतम् ॥ ७३ ॥
[1]ब्राह्मणाः कुशला वृद्धा [2]कामदोषविवर्जिताः ।
प्रयोजनेषु देवीनां नियोक्तव्या नृपैः[3] सदा ॥ ७४ ॥
ये [1]विद्यासत्यसम्पन्नाः कामदोषविवर्जिताः ।
ज्ञानविज्ञानकुशलाः कञ्चुकीयास्तु ते स्मृताः ॥ ७५ ॥

67 (C. 57b-58a ; B. XXIV. 65a, 66a ; K. XXIV. 47 ; H. 48) [1]B. विशिषण-विशिषेण, C. विशिषेणं विशिषेण, KH. समासाल्लक्षणं तासां प्रवक्ष्यामि द्विजोत्तमाः. [2]KH. नियोज्या. [3]C. न चोद्गटाः. 68 (C 58b-59a ; B. XXIV. 66b-67a ; K. XXIV. 48 ; H. 49) [1]BC. न चोद्भ्रान्ता न लुब्धा च नातिनिष्ठुरमानसाः. [KH. अनुद्धटा ह्यसंभ्रान्ताः सु (स्व)वेषाचारनिष्ठुराः. [2]KH. शान्ता दीनाः (H. दान्ताः) सुशीलाश्च. 69 (C. 59b-60a ; B. XXIV. 67b, 65b ; K. XXIV. 49a ; H. 50a) [1]C. अकामाश्चापि पूज्याश्च. B. अकामा लोभडी(ही?)नाश्च. [2]KH. om. 69b. 70 (C. 60b-61a ; K. XXIV. 49b-50a ; H. 50b-51a) [1]C. सर्वदोषविवर्जिताः. [2]C. या सा नपुंसका. [3]KH. प्रकृतिस्तु सा. [4]B. om. 70. 71 (C. 61b-62a ; B. XXIV. 68 ; K. XXIV. 50b-51a ; H. 51b-52a) [1]B. सा त्वन्तःपुर^0. [2]BN. कारुकाः, C. कारकाः. [2]CB. वर्षवराः. 72 (K. XXIV. 51b-52a ; H. 52b-53a) [1]BC. om. 72. H. ये स्थायिकाश्च. 73 (K. XXIV. 52b-53a ; H. 54b-55a) [1]C. om. 73. [2]K. वस्तल्वे, (footnote वास्तल्वे), B. *ma*. द्वारस्थां स्नातकान्. 74 (C. 65b-66a ; B. XXIV. 72) [1]KH. om. 74. [2]N. काल, C. कला. 75 K. XXIV. 58 ; H. 59) [1]K. footnote विप्राः. [2]BC. om. 75.

[1]प्रेषणे चार्थसंयुक्ते कञ्चुकीयान्नियोजयेत् ।
तथा वर्षधरांश्चैव कामचारेषु योजयेत् ॥ ७६ ॥
[1]औपस्थायिकनिर्मुण्डान् स्त्रीणां प्रेषणकर्मणि ।
[2]रक्षणे कुमारीणाञ्च बालिकानाञ्च योजयेत् ॥ ७७ ॥
[1]मानकार्येषु नारीणां नियुञ्जीतानुचारिकाः ।
[2]अन्तःपुराधिकारे हि [3]राजचर्यानुवर्तिनम् ॥ ७८ ॥
[1]सर्व[नृ]त्ता[ङ्ग]योगज्ञं [2]नाट्यागारे [3]निवेशयेत् ।
[4]ये त्वल्पसत्त्वाः कुशलाः क्लीवाश्च [5]स्त्रीस्वभाविनः ॥ ७९ ॥
[1]जात्या न दोषिणश्चैव ते वै [2]वर्षधराः स्मृताः ।
[3]नपुंसका ये पुरुषाः स्त्रीस्वभावेन वर्जिताः ॥ ८० ॥
[1]निर्मुण्डा नामतो ज्ञेयाः कामविज्ञानवर्जिताः ।
एतदष्टादशविधं प्रोक्तमन्तःपुरं मया ॥ ८१ ॥

अतःपरं प्रवक्ष्यामि बाह्यपुरुषसञ्चरम् ।
राजा सेनापतिश्चैव [1]पुरोधा मन्त्रिणस्तथा ॥ ८२ ॥
सचिवा प्राड्विवाकाश्च [1]कुमाराधिकृतास्तथा ।
[2]एते चान्ये च बहवः [3]सभास्तारा नृपस्य तु ।
[4]विभागमेषां वक्ष्यामि लक्षणं च पृथक् पृथक् ॥ ८३ ॥

76 (K. XXIV. 53b-54a ; H. 54b-55a) [1]BC. om. 76, H. प्रेरणे. 77 (C. 62b-63a ; B. XXIV. 69 ; K. XXIV. 54b ; H. 55b [1]KH. औ(उ)पस्थायिकनिर्मुण्डाः. [2]KH. om. 77b. 78 (C. 63b ; B. XXIV. 70a ; K. XXIV. 55a ; H. 56a) [1]BC. om. 78a. [2]KH. om. 78b, C. ^{0}धिकारी हि, B. ^{0}धिकारेषु. [3]BC. राजभार्या-(^{0}चर्या. B.)नुवर्तनम्. 79 (C. 64 ; B. XXIV. 70b-71a ; K. 55b-57a ; H. 56b-57a ; [1]KC. सर्व, (K. सद्यो)वृत्तान्त. B. ^{0}न्तसंवाहा. [2]BM. पत्यागारे. [3]KH. नियोजयेत्. [4]C. वनितास्त्वल्पसत्त्वा ये ये. [5]C. ^{0}स्वभावकाः. B. ^{0}स्वाभाविकाः, 80 (C. 65a ; B. XXIV. 71b ; K. XXIV. 56b-57a, H. 57b-58a) [1]C. जात्या न भाषिण^0. KH. जात्या न दुष्टाः कार्ये च. [2]BC. वर्षवराः. [3]BC. om. 80b. 81 (C. 66b ; B. XXIV. 73a ; K. XXIV. 57b, 59a ; H. 58b, 60a) [1]BC. om. 81a. 82 (C. 67 ; B. XXIV. 73b-74a ; K. XXIV. 59b-60a ; H. 60b-61a) [1]KH. कुमारी. 83 (C. 68 ; B. XXIV. 74b-75 ; K. XXIV. 60b-61 ; H. 61b-62) [1]C. कुमारकृतस्तथा, KH. प्रयोगाधि कृतास्तथा. [2]B. एके. [3]BC. मान्या ज्ञेया. [4]BC. विशिषमेव (B. विशिषमेषां) वक्ष्यामि लक्षणानि निबोधत.

[1]शीलवान् बुद्धिसम्पन्नः सत्यवादी जितेन्द्रियः ।
दक्षः प्रगल्भः [2]स्मृतिमान् विक्रान्तो [3]मतिमाञ् शुचिः ॥ ८४ ॥
दीर्घदर्शी महोत्साहः कृतज्ञः [1]प्रियवाक्पटुः ।
लोकपालव्रतधरः [2]कर्ममार्गविशारदः ॥ ८५ ॥
उत्थितश्चाप्रमत्तश्च [1]वृद्धसेव्यर्थशास्त्रवित् ।
[2]नानानयप्रचारज्ञः ऊहापोहविचक्षणः ॥ ८६ ॥
[1]परभावेङ्गितज्ञश्च [2]शूरो धीरः क्षमान्वितः ।
[3]नानाशास्त्रार्थतत्त्वज्ञो [4]नानाशिल्पप्रवर्तकः ॥ ८७ ॥
[1]नीतिशास्त्रे च कुशल[2]स्तथा चैवानुरागवान् ।
[3]स्थानवृद्धिक्षयज्ञश्च परन्ध्रविचक्षणः ।
[4]कृतज्ञोऽव्यसनो चैव [5]गुणैरेभिर्भवेन्नृपः ॥ ८८ ॥
